# सागरिका

अङ्कः 51/3-4 (संयुक्ताङ्कः)

विक्रमसम्वत् 2082 (जून 2025 ई.)








ISSN : 2229-5577

# सागरिका

**त्रैमासिकी पूर्वसमीक्षित-संस्कृतशोधपत्रिका**

अङ्कः 51/3-4 संयुक्ताङ्कः, विक्रमसम्वत् 2082 (जून 2025 ई.)
एकपञ्चाशद्वर्षे तृतीयचतुर्थाङ्कः

**संस्थापकः**
स्व. रामजी उपाध्यायः

**संरक्षकः**
नीलिमा गुप्ता
कुलपतिः

**प्रधानपरामर्शकः**
राधावल्लभत्रिपाठी

**प्रधान सम्पादकः**
राजेन्द्रयादवः

**सम्पादिका**
किरण आर्या

**सम्पादकमण्डलम्**
नौनिहालगौतमः, रामहेतगौतमः, शशिकुमारसिंहः

**सागरिकासमितिः**
संस्कृतविभागः
डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् (म.प्र.)

**ISSN : 2229-5577** **UGC Approved JN. No.-42268**

# सागरिका

**SAGARIKA**

Quaterly Research Journal in Sanskrit (Peer Reviwed)
Vol. 51/3-4
Four Issues Every Year-
अङ्कप्रकाशनं प्रतिवर्षम् आषाढ़-आश्विन-पौष-चैत्रमासेषु

**परामर्शदात्री समितिः**

1. प्रो. मुरलीमनोहरः पाठकः, दिल्ली
2. प्रो. रमाकान्तपाण्डेयः, भोपालः
3. प्रो. विष्णुकान्तपाण्डेयः, जयपुरम्
4. प्रो. व्रजकिशोरः स्वाइं, ओडिशा

**पत्रव्यवहारसङ्केतः**
**डॉ. किरण आर्या**
सहा. प्रा., संस्कृतविभागः
डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् 470003 (म.प्र.)
Email : sanskritsagar1946@gmail.com

**प्रकाशिका – सागरिकासमितिः**
संस्कृतविभागः, डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् (म.प्र.)
पत्रिकेयं विश्वविद्यालयस्य dhsgsu.edu.in इति पोर्टलमध्येऽध्येतुं शक्यते।।

**सदस्यताशुल्कम्**
वार्षिकम् - 100 रुप्यकाणि, आजीवनम् प्रतिव्यक्ति - 1000 रुप्यकाणि,
आजीवनम् प्रतिसंस्थम् - 2000 रुप्यकाणि, प्रत्यङ्कम् - 25 रुप्यकाणि

**शब्दसज्जा : अमनप्रकाशनम्,** नमकमंडी, कटरा, सागरम् (म.प्र.)
**मोबा.** : 9826434225

## सम्पादकीयम्

सुविदितमेव तावत् सर्वैः यत् संस्कृतजगति सागरिकापत्रिका आत्मानं निरन्तरं प्रतिष्ठापयति। गीर्वाणवाणिसमुपासकानां संस्कृतशास्त्रानुसन्धानरतानां कोविदां शोधालेखपुरस्सरमसौ संस्कृतशोधपत्रिका शोधार्थिनां कृते, जिज्ञासूनां कृते, साहित्यप्रेमिणां कृते सर्वदा समुपतिष्ठते। समाजाभ्युदयाय अस्याः शैक्षिकं योगदानं महत्त्वपूर्णम्।

पञ्चाशदधिकर्षेभ्यः सततं प्रकाशमानायाः पत्रिकायाः अस्मिन्नङ्के वेदरामायणमहाभारतभाषाविज्ञानसाहित्यादिविषयानुस्यूताः विविधात्मकाः शोधालेखाः सन्ति। पाठकवर्याणामिह विचारविमर्शाय शोभनावसरः। आगामिष्वङ्केष्वपि भवतां सुहृदयानां मौलिकविचाराणां प्रकाशनं कामयमानयानया सागरिकया आमन्त्र्यन्ते सहर्षं नवीनाः विचाराः समुत्कृष्टशोधालेखाश्च।

पत्रिकाया अयमंङ्कः विश्वव्यापिजालपुटे (सागरिकापोर्टल-मध्ये) समुपलब्धस्तत्रापि द्रष्टुं शक्यते।

**- सम्पादिका**

# अनुक्रमः


| | | | |
|---|---|---|---|
| 1. | ऋग्वेदस्य परिचयात्मकं समीक्षणम् | - *कपिलदेवहरेकृष्णःशास्त्री* | *7* |
| 2. | बौद्धिकसम्पदधिकारस्य वैदिकचिन्तनम् | - *हेमन्तशर्मा* | *23* |
| 3. | वाल्मीकिरामायणे जनजातीयानां *परिचयः* | - *एम. किशनः, उमाशंकरः च* | *35* |
| 4. | महाभारत-ग्रन्थे मानवाधिकारः | - *सुधाश्रीवास्तवः* | *43* |
| 5. | पालिप्राकृतसंस्कृतभाषाणां भाषावैज्ञानिकमध्ययनम् | - *प्रियव्रतमिश्रः* | *48* |
| 6. | भारतीयभाषासु सैद्धान्तिक : व्यावहारिकपक्षश्च (जैनदर्शनसम्बन्धे) | - *शुभम् जैनः* | *54* |
| 7. | नास्तिकदर्शनशास्त्रनिकाये मुक्तिवादः | - *शुभ्रजित् सेनः* | *61* |
| 8. | जीवगोस्वामिविरचितसर्वसंवादिन्यां शब्दप्रमाणविवेचनम् | - *अञ्जनाशर्मा* | *70* |
| 9. | रुद्रटप्रणीतकाव्यालङ्कारमाश्रित्यातिशय-*मूलकालङ्कारविमर्शः* | *आशुकुमारठाकुरः रञ्जनकुमारत्रिपाठी च* | *78* |
| 10. | *मेघदूतप्रयुक्तकाव्यशिल्पसमीक्षा* | - *बाबूलालः मीना* | *87* |
| 11. | *उत्तररामचरिते रसविचारः* | - *आशासिंहरावतः* | *97* |
| 12. | कालिदासस्योपमासु वैष्णवदर्शनस्याभिव्यञ्जना | - *सदानन्दत्रिपाठी* | *107* |
| 13. | प्रेक्षणककारत्वेन श्रीवेङ्कटरमणराघवन्-वर्यस्य महत्त्वाविष्कारः | *भास्वती रायः,सौम्यजित् सेनः* | *117* |

| | | | | |
|---|---|---|---|---|
| 14. | अर्वाचीनसंस्कृतगीतिकाव्यानामुपादेयता | - | *सुकदेवः वाजपेयी* | *131* |
| 15. | आचार्यराधावल्लभकृत-लहरीदशके 'मनुर्भव' इत्युपदेशः | - | *किरण आर्या* | *136* |
| 16. | शिवराजविजयस्य प्रथमनिःश्वासे सांस्कृतिक-तत्त्वानि | - | *माधवगोपालः* | *141* |
| 17. | डॉ. रमाकान्तशुक्लस्य काव्यत्वम् | - | *हेमलता रानी* | *148* |
| 18. | संस्कृतसाहित्ये मुक्तककाव्यपरम्परा | - | *सौरभमिश्रः* | *153* |
| 19. | सन्तचरिताधारितदलितोदयमहाकाव्यस्य दार्शनिकमीमांसा | - | *गुलशनकुमारः* | *159* |
| 20. | भीमायनंमहाकाव्ये छन्दः स्वरूपम् | - | *मिन्टुमण्डलः* | *168* |
| 21. | प्राचीनस्य तालविज्ञानस्य विश्लेषणम् | - | *आकाशः जैनः* | *178* |
| 22. | संस्कृते कथायाः यात्रा | - | *दीपेन्द्रकिशोरार्यः* | *195* |
| 23. | कालिदाससाहित्ये पञ्चमहाभूतविमर्शः | - | *सत्यव्रतपाण्डेयः* | *203* |
| 24. | अग्निपुराणे रसतत्त्वविवेचनम् | - | *प्रवीणकुमारः* | *210* |
| | *लेखक-परिचयः* | | | *217* |

# 1

# ऋग्वेदस्य परिचयात्मकं समीक्षणम्

*कपिलदेवहरेकृष्णः शास्त्री*

विदित एव खल्वयमर्थः सर्वेषामपि विदुषां यत् किल जगन्नियन्त्रकं परमेश्वरं तत्त्वं यथा भारतीयानां सारस्वते प्रतिपादितं नैवमन्यत्र क्वापीति। भारतीयानां च निरतिशय प्रमाणभूता ग्रन्था नाम वेदा एव। तन्मूलकत्वेनैव स्मृति प्रमाणादीनां प्रामाण्यम्। यच्च वेदविरोधि तत्पुनस्त्याज्यमेवेति निश्चिन्वते श्रुतिमात्रनिष्ठा भारतीयाः। सृष्टिनिर्माणविधौ सर्वाद्युतमाः खलु श्रुतयः। तथाहि आर्चिके पौरुषे सूक्ते-

**तस्माद् यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे।**
**छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत।।**

इति सर्वादौ वेदानामाविर्भावमुद्घोष्य तदनन्तरमेव अश्व-गो-मेध-याग-ब्राह्मणादिवर्णा सञ्जाता इति प्रत्यपादि। श्रुतय एव सर्वं ज्ञानविज्ञानानां मूलमिति मन्यन्ते भारतीयाः। सर्वं वेदात् प्रसिद्ध्यति इत्यभियुक्त्योक्तिरेतदेव कथयति। विशेषतः खलु यज्ञार्थमेव वेदानामवतारः। यज्ञश्च नाम परमात्मन उपासना। परमात्मनो ज्ञानमेव परमश्रेयसो मोक्षाख्यस्य सम्पादकमिति ‘‘तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय’’ इति श्रुतिः प्रतिपादयति। सर्वव्यापकः परमात्मैव भगवान् विष्णुः। ‘‘तत्सृष्ट्वा तदेवानुप्राविशत्’’ इति श्रुत्या विष्णुपदार्थो विज्ञायते। विशतीति विष्णुरिति व्यापक इत्यर्थः। एवं प्रकारेण वेदशास्त्राणामधि कृत्यैव-ऋग्वेदस्य परिचयात्मकं समीक्षणम् क्रियते प्रबन्धेस्मिन्।

वेद शब्दस्यार्थः विद्यन्ते धर्मादयः पुरुषार्था यैस्ते वेदाः।[1] इति बह्वृक्प्रातिशाख्यम्, सायणस्तु अपौरुषेयं वाक्यं वेद इत्याह। इष्टप्राप्त्यनिष्ट परिहारयोरलौकिकमुपायं यो वेदयति स वेद इति भाष्यभूमिकायामुक्तम्। प्रमाणमपि तत्रैवोक्तम्-

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।**
**एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता।।**[2]

ऋग्वेद अर्थादृच्यते स्तूयते यया सा ऋक्, तादृशीनामृचां समूह एव ऋग्वेदः। यत्रार्थवशेन पादव्यवस्थाः सा ऋगिति मीमांसकाः। तत्र बहुभिर्भिन्नभिन्नैरृषिभिः सुललितैः भावभव्यैः शब्दैर्विभिन्ना देवताः सादरं स्तुताः सन्ति। पाश्चात्यदृशि भाषाया भावस्य च विचारेण अन्यवेदेभ्योऽतीव प्राचीनोऽस्त्ययमृग्वेदः।

भारतीय-दृष्ट्याऽपि ऋग्वेदस्याभ्यहितत्वं पूजनीयता च वर्तते। तैत्तिरीयसंहितानुसारेण यज्ञस्य यद्विधानं क्रियते, तत्तु शिथिलं भवति किञ्च ऋग्वेदेन विहितानुष्ठानं दृढम्भवति। यथा- **यद्वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तत्। यदृचा तत् दृढमिति।।**[3]

**ऋग्वेदस्य विभागः**

ऋग्वेदस्य प्रथमं सूक्तम् यद्यपि महाभाष्ये ऋग्वेदस्यैकविंशति शाखा निर्दिष्टाः परं शाकल-वाष्कल-अश्वलायन-शाङ्ख्यायन-माण्डूकायन-नामधेयाः पञ्चशाखा सन्ति मुख्याः। स ऋग्वेदः सूक्त-मण्डलभेदेन द्विधा विभक्तः। तत्र सूक्तं चतुर्विधम्-ऋषिसूक्त-देवतासूक्त-च्छन्दःसूक्त-अर्थसूक्तभेदात्। एकर्षिदृष्टमन्त्राणां समूहो ऋषिसूक्तम्। एकदेवताकमन्त्राणां समूहो देवतासूक्तम्। समानच्छन्दसां मन्त्राणां समूहो नामच्छन्दः सूक्तम्। यावदर्थसमाप्तानां मन्त्राणां समूहोऽर्थसूक्तम्। सुष्ठूक्तत्वात्सर्वं सूक्तमित्याख्यायते।

**मण्डलानुवाकभेदः**

ऋग्वेदः सोऽयं मण्डलानुवाकवर्गभेदेन अष्टकाध्यायसूक्तभेदेन च द्विधा। बालखिल्यसूतानि विहाय सम्पूर्णायां ऋग्वेदसंहितायां दशमण्डलानि, पञ्चाशीतिश्चानुवाका, अष्टोत्तरशतमिताश्च वर्गाः (इति प्रथमो भेदः), अष्टौ अष्टकानि, चतुःषष्टिरध्यायाः सप्तदशोत्तरसहस्राणि च सूक्तानि (इति द्वतीयो भेदमार्गः) ।तद्यथा-

**1. अष्टकक्रमः**

समग्रा ऋक्संहिता अष्टाष्टकेषु विभक्ताऽस्ति। प्रत्यष्टकम् अष्टाऽध्यायाः सन्ति। अनेन रूपेण सम्पूर्ण ऋग्वेदचतुःषष्ट्याध्यायेषु विभक्तोऽस्ति। प्रत्येक मध्यायस्य अवान्तरविभागानां संज्ञा 'वर्ग' इत्यस्ति। स नवतः अध्ययन सौकर्याय

एव विभागोऽयमस्ति। वर्गस्तु ऋचां समुदायस्य संज्ञाऽस्ति। किञ्च वर्गेषु ऋचां संख्याऽनिश्चितैवाऽस्ति। बहुधा पञ्चानां मन्त्राणाम् एको वर्गो भवति। किञ्चैकमन्त्रादारभ्य नवमन्त्रपर्यन्तस्य वर्गो लभते। सम्पूर्णे ऋग्वेदे वर्गाणां सङ्ख्या षडाधिकसहस्रद्वयमस्ति।

**2. मण्डल-क्रमः**

ऋग्वेदस्य द्वितीयोऽयं मण्डलक्रमविभागः ह्यतीवमहत्त्व- पूर्णोऽस्ति। ऐतिहासिक-दृष्ट्या किंवा वैज्ञानिक-दृष्ट्या चाप्यस्य महत्त्वमस्ति। बालखिल्यसूक्तानि विहाय सम्पूर्णायामृग्वेद संहितायां दशमण्डलानि, पञ्चाशीतिश्चानुवाकाः, अष्टोत्तरशतद्वयमिताश्च वर्गाः सन्ति। अत्र चानुवाकेषु सूक्तानि, सूक्तेषु मन्त्राश्च सन्ति।

**दशममण्डलस्य अर्वाचीनत्वम्**

दशममण्डलं सर्वतोऽर्वाचीनं मण्डलं वर्त्तते। कारणञ्चास्य वंशमण्डलात् भाषागतविभेदं तथा विषयगतविभिन्नता एव।

**भाषागतभेदम्**

ऋग्वेदस्य प्राचीनतमांशे शब्देषु प्रकारस्य स्थितिर्वर्तते। संस्कृत-भाषा यथैव विकसिता भवति, तथैव तस्यां रेफस्य स्थाने लकारस्य प्रयोगो वर्द्धते। जल-वाचकस्य 'सलिल'-शब्दस्य प्राचीन-रूपम् 'सरिर' इति पदं गोत्र-मण्डलेषु प्रयुक्तोऽस्ति। किञ्च दशम-मण्डले लकारयुक्तशब्दस्यैव प्रयोगो लभते। वैयाकरणस्वरूपेऽपि पार्थक्यं परिलक्ष्यते। प्राचीनांशे आकारान्त-पुंल्लिङ्ग-शब्देषु प्रथमाद्विवचनस्य प्रत्ययः 'आ' इत्येवास्ति। यथा—द्वा सुपर्णा सयुजा सखाया इति।[4] किञ्च दशममण्डले तस्मिन् स्थाने 'औ' इति प्रत्ययस्यापि प्रयोगो लभते। यथा—दृश्मा वामेतौ मा परेतौ रिषाम्[5] सूर्याचन्द्रमसौ धाता।[6] प्राचीनांशे क्रियार्थकक्रियायाः सूचनार्थं तवै, से, असे, अध्यै प्रभृति-प्रत्ययाः प्रयुक्ताः सन्ति, किञ्च दशममण्डलेऽधिकतरः तुमिति प्रत्ययस्यैव प्रयोगो लभते। 'कर्त्तवै, 'जीवसे, अवसे' इत्यादि प्राचीनपदानां स्थाने दशममण्डले 'कर्त्तुम्, जीवितुम्, अवितुम्' इत्यादि प्रयोगाणां प्राचुर्यं परिलक्ष्यते।

**छन्दोगतवैशिष्टयम्**

प्राचीनां शेषोपलब्धानां छन्दसामपेक्षया दशममण्डलस्य छन्दःसु पार्थक्यमस्ति। प्राचीनकाले वर्णानां संख्यायाः उपरि छन्दोविन्यासे एव

विशेषमाग्रहमासीत्। किञ्च दशममण्डले लघु-गुरूणामप्युचित विन्यासेऽपि सर्वत्र विशेषबलं परिदृश्यते। येन पद्यानां पठने सुस्वरस्य लयस्य च विभवोऽतीव रुचिरतया सम्पद्यते। फलतः प्राचीनानुष्टुप् दशममण्डले लौकिकसंस्कृतस्य अनुष्टुप् इवाऽभवत्।

**देवगतवैशिष्ट्यम्**

ऋग्वेदे हि देवताः प्राणशालित्वात् 'असुर' इति प्रोक्ताः। अस्मिन् वेदे देवतानां स्थानमतीव महत्त्वपूर्णमस्ति। वैदिककालस्य महर्षयः प्रकृतिदेव्याः नानालीलावधारयितुं विभिन्नाः देवताः अकल्पयन्। किञ्च दशममण्डलेषूल्लिखितेषु देवेषु बहवो नवीनास्तथाऽनिर्दिष्टपूर्वाः देवताः सन्निविष्टाः अभूवन्। दृष्टपूर्वदेवानां स्वरूपेऽपि रूपपरिवर्तनं दृष्टिगतो भवति। वरुणः समस्तजगतां नियन्ता, सर्वज्ञः, सर्वशक्तिमान् देवस्वरूपेण पूर्वे चित्रितोऽस्ति, किञ्चाऽस्मिन् मण्डले तस्य शासनक्षेत्रं सङ्गीर्णं भूत्वा जलमात्रमवशिष्टमस्ति। विश्वनियन्तृपदाद् अपसृत्य जलदेवतास्वरूपेणैव–दृग्गोचरो भवति। कतिपयाः मानसिक-भावनायाः, मानसिकवृत्त्याश्च प्रतिनिधिस्वरूपे अभिनवाः देवाः कल्पिताः सन्ति। एता–दृक्षु देवेषु 'श्रद्धा'[7] 'मनुयुः'[8] प्रभृतयः परिकल्पिताः सन्ति।

**दार्शनिकतथ्यानामाविष्कारः**

अस्मिन् मण्डलेऽनेकविधानि दार्शनिकसूक्तानि समुपलब्धानि सन्ति। सूक्तान्येतानि स्वविचारधारया आर्याणां तात्त्विकचिन्तन-विकासस्य सूचकानि सन्ति। एतानि चोत्तरकालिकानि प्रतीतानि भवन्ति। एवंविधेषु सूक्तेषु नासदीयसूक्तम्[9] तथा पुरुषसूक्तं[10] विशेषरूपेण समुल्लेखनीयमस्ति। पुरुषसूक्ते सर्वेश्वरवादस्य स्पष्टतः उल्लेखो लभते। सूत्रमिदं प्रौढविचारधारायाः प्रतिपादकत्वेनोत्तरकालिकं तथा अपेक्षा—तमर्वाचीनं प्रतीतो भवति। पाश्चात्यविदुषां विचारे धार्मिकविचारस्य क्रमः अनेन प्रकारेणास्ति। सर्वप्रथमः बहुदेववादस्तत्पश्चात् एकदेववादस्तत्पश्चात् सर्वेश्वरवादः। प्राचीनकाले आर्याणां विश्वासः बहुदेवसत्तायामासीत्। अग्रे गत्वा स एव विश्वासः हिरण्यगर्भ रूपात् परिणतीभूय सर्वेश्वरवादे स्थिरोऽभवत्। अस्य विकासस्य अन्तिमे द्वे कोटी दशममण्डले समुपलब्धे स्तः। फलतस्तस्य गोत्रमण्डलादभिनवत्वं स्वाभाविकमेव।

ऋग्वेदस्य दशममण्डले दर्शनप्रधानानि नासदीयसूक्त-(10.129) पुरुषसूक्त- (10.90) हिरण्यगर्भसूक्त-(10।121) वाक्सूक्त प्रभृतीनि सूक्तानि सन्ति।

सूक्तान्येतानि दार्शनिक-दृष्ट्या यथा गम्भीराणि सन्ति, तथैव प्रातिभानुभूति–दृष्ट्याऽतीव रमणीया, अभिनवकल्पना-दृष्ट्याऽपि च नितान्तानि प्रसिद्धानि सन्ति। नासदीयसूक्त विषये विज्ञालोचकानां मतमस्ति, यदीदं सूक्तं ऋग्वेदीयऋषीणामलौकिकं चिन्तनधारायाः मौलिक-परिचायकमस्ति। जगतः प्रारम्भिकस्थित्या वर्णनं कुर्वन्नस्य सूक्तस्य ऋषिः कथयति- सृष्ट्याः आरम्भकाले न तु असदासीन्नैव 'सत' एव। न दिनमासीत् नैव निशेति, सृष्ट्याः अभिव्यञ्जकं किमपि चिह्नमपि तदा नासीत्। सर्वप्रथमः कामः समुत्पन्नोऽभवत्। कामः अर्थात् सङ्कल्प एवासीत्। अस्यैव कामस्याभिव्यक्तिः सृष्ट्याः विभिन्नस्तरेषु प्रतिफलितोऽभवत्। तदा एक एव तत्त्वमासीत्, यत् विनावातं श्वासग्रहणमकरोत् तथा निजस्वाभाविकशक्त्या जीवितमासीत्।

**आनीदवातं स्वधया तदेकम्। तस्माद्धान्यन्न परः किञ्चनास**[11]

प्रातिभानुभूत्याः उपरि अद्वैततत्त्वस्य प्रतिष्ठा एवास्य गम्भीरमन्त्रस्य गूढरहस्यमस्ति।

**विषयस्य नूतनत्वम्**

मण्डलेऽस्मिन् बहूनि भौतिकविषयसम्बद्धानि आध्यात्मिक-विचारधारया च संवलितानि सूक्तानि सन्ति। भौतिकविषयेषु श्राद्धस्य विवाहस्य च स्थानमग्रगण्यमस्ति। ऋग्वेदस्य(10.85) सूक्ते सूर्यायाः पाणिग्रहणप्रसङ्गः अतीवकौतूहलवर्द्धकोऽस्ति। 'सूर्या' उषायाः अपरपर्यायवाची शब्दोऽस्ति। उषाया विवाहः सोमेन सह भवति। अश्विनो विवाहेऽस्मिन् घटकस्य कार्यं करोति।। सूक्तमिदं साहित्यिक-दृष्ट्या अतीव सुन्दरं तथा सामाजिक-दृष्टया अत्यन्तरोचकमस्ति। गृह्यसूक्तेऽस्यैव सूक्तस्य मन्त्राणां विनियोगस्तथा प्रयोगो विवाहकाले भवति। अस्मिन् सूक्ते वैवाहिकभौतिकरूपेण सहाध्यात्मिकरूपस्यापि सुष्ठु निरूपणमस्ति। समग्रसूक्तमिदं कोमलभावनया सुसम्पृक्तमस्ति। सुष्ठु दाम्पत्य जीवनाय प्रजासमृद्ध्यर्थञ्चोपेदेशः प्रदत्तः अस्ति। यथा -

**इह प्रियं प्रजया ते समृध्यतामस्मिन् गृहे गार्हपत्याय जागृहि।**
**एना पत्या तन्वं सं सृजस्वाधा जिव्री विदथमा वदाथः।।**[12]

शवसंस्कारेण सम्बद्धान्यनेकान्यपि सूक्तानि दशमे मण्डलेऽपि सन्ति। तस्मिन् युगे पृथिव्यां शवस्थापनस्यापि प्रथा प्रायः प्रचलिताऽऽसीत्। यद्यपि सामान्यरीत्या शवदाहसंस्कारस्यैव वर्णनमस्ति। एतेषां मन्त्राणां भावः काव्य-दृष्ट्या

सरलः, रोचकः आवर्जकश्चास्ति। शवहेतवे धरणीविदीर्णाय शवरक्षकृता प्रार्थनाऽतीव मार्मिकाऽस्ति। अस्य प्रसङ्गस्योपमापि मनोहारिणी वर्त्तते-

**माता पुत्रं यथा सिचाऽभ्येनं भूम ऊर्णुहि।**[13]

**'द्यूतकरस्य विषादं'-नाम्ना सूक्तमपि**[14] विलक्षणमस्ति। द्यूतक्रीडायां पराजितस्य द्यूतकरस्य दयनीया भावनाऽपि द्रष्टव्याऽस्ति- पितामाताभ्रातर एनमाहुर्न जानीमो नयता बद्धमेतत्।

अन्ते त्रयोदशमन्त्रे उपदेशोऽस्ति—अक्षैर्मा दीव्यः कृषिमित् कृषस्व वित्ते रमस्व बहुमन्यमानः।।

**संवादसूक्तानि**

ऋग्वेदे दार्शनिकसूक्तानि यथोपनिषदां तात्विकविवेचनैः सह सम्बद्धानि सन्ति, तथैवैतानि प्रबन्धकाव्येन नाटकेनाऽपि च स सम्बन्धं संयोजयन्ति। एवं विधेषु सूक्तेषु कथोपकथनस्य प्राधान्यमस्ति। ऋग्वेदेऽनेकानि कथोपकथनप्रधानानि यमयमी सूक्त-सरमापणिसंवादसूक्तोर्वशीपुरुरवः संवादसूक्तप्रभृतीनि सूक्तानि सन्ति, यान्याधारीकृत्यैव भारतीयनाटकानि जातानि। दृष्टान्तरूपेण उर्वशीपुरुरवसः संवादमूलं कालिदासीयं विक्रमोर्वशीयनाम त्रोटकमुपस्थापयितुं शक्यते। विक्रमोर्वशीयं कालिदासेन लिखितं नाटकम्। एतत् नाटकं पुरूरवसः उर्वश्याः च वैदिककथाधारितम् अस्ति। अस्य कथावस्तु प्रेम्णः कथावस्तु चेदपि अस्य सरणिः एव अन्या। अस्य नाटकस्य निर्माणावसरे कवेः प्रतिभा इतोऽपि अधिका दृश्यते। मालविकाग्निमित्रस्य कथा मानुषप्रपञ्चसम्बद्धा परं विक्रमोर्वशीय कथा दिव्यमानुषी। नायकः राजा पुरूरवः नायिका च स्वर्गलोकस्य अप्सराः उर्वशी। पञ्चाङ्कयुते- ऽस्मिन् नाटके आकाशयानं कृत्वा पुरूरवसं प्रत्यागच्छन् आसीत्। मध्येमार्गम् उर्वशी-नाम्नः अप्सरसं केशिनाम दानवः अपाहरत् इति ज्ञात्वा अप्सरसः आक्रन्दनं कुर्वत्यः आसन्। तदा स्वयं केशिनम् अनुधावन् उर्वशीं मोचयित्वा आनयति। मार्गे स्वरथे उपविष्टायाः तस्याः सौन्दर्यं दृष्ट्वा राजा मोहितः भवति। उर्वशी अपि तस्मिन् अनुरक्ता भवति। अग्रे प्रेम्णः उत्कण्ठता अधिका भवति। 'तिरस्करणी' इति विद्यया तम् अनुनयति। राजा पुरूरवः उर्वश्या सह गन्धमादनपर्वतं गच्छति। तत्र सा लतारूपेण परिणता भवति। ततः इन्द्रस्य निदेशानुसारं तया भूलोकात् प्रतिगन्तव्यं भवति। नाटकं सुखान्तं भवति। अस्मिन् सन्दर्भे भारतीयाः विद्वांसः नाटकानामुदयं वेदस्थित सूक्तमूलकमेवाहुः।

किञ्चास्मिन्विषये पाश्चात्यविद्वत्सु गम्भीरमतभेदो दृश्यते। जर्मनविद्वान् डाक्टर-श्रोदर-महोदयोऽपि विचारमिममनुमोदयति। स हि संवादसूक्तेष्वेषु गानमामनति। तदिदं गायनं नृत्येनाभिनीयते स्म, तदिष्यतेऽस्य संवादसूक्तनिवहस्य धार्मिकनाटकरूपता। एतन्मूलैव च भारतीयनाटकप्रवृत्तिः इत्याह।

**ऋग्वेदस्य लौकिकसूक्तानि**

ऋग्वेदीयदशममण्डलस्य अनेकेषु सूक्तेषु लौकिक-व्यावहारिक-विषयाणाञ्च रोचकं वर्णनमस्ति। इत्थं विषयाः तु अथर्ववेदस्यैव विशिष्टसम्पदः मन्यन्ते। किञ्च ऋग्वेदस्य दशममण्डलेऽपि एवंविधलोक-संस्कृत्या सह सम्बद्धविषयाणां समुपलब्धिः अस्य मण्डलस्य विशिष्टतां सूचयति। यक्ष्माख्याव्याधिर्विनाशाय 161, 163 तथाऽन्यान्यनेकविधानि च सूक्तानि सन्ति। रक्षोहासूक्ते दानवात् गर्भत्राणार्थः मन्त्रोऽस्ति। एकस्मिन् सूक्ते पत्न्याः कष्टमपहाय पत्युः प्राप्त्युपायस्य विवरणं लभते। यथा —

**इमां खनाम्योषधिं वीरुध बलवत्तमम्। यया सपत्नीं बाधते यया संविन्दते पतिम्**[15]

अपरस्मिन् सूक्ते शत्रु-संहाराय प्रार्थना वर्तते - **ऋषभ मां समानानां सपत्नानां विषासहितम्। हन्तारं शत्रूणां धिविराजं गोपतिं गवाम्**[16]

अनेन प्रकारेण (10.164) सूक्ते दुःस्वप्नविनाशाय प्रार्थनाऽस्ति। 10. 58सूक्तस्य नाम एव 'मनः-आवर्त्तनम्' सूक्तमस्ति। वैवस्वत-यम-दिव-भूमि-समुद्रादीनां पार्श्वगतानां जनानां मनसा परावर्त्तनाय प्रार्थनाऽस्ति-

यत् ते यमं वैवस्वतं मनो जगाम दूरकम् । तत्त आवर्तयामसीह क्षयाय जीवसे ऋग्वेद.10.58.

**श्रद्धासूक्तम्**

ऋग्वेदस्य दशममण्डले श्रद्धासूक्तमस्ति। सूक्तेऽस्मिन् श्रद्धायाः स्तुतिः देवतारूपेण। अत्र मन्त्रास्तु षड् एव सन्ति, किञ्च विषयस्य अपूर्वत्वेन स्वल्पकायमपीदं सूक्तं विपूलमहत्त्वस्याभवत्। श्रद्धाशब्दस्य अर्थो भवति-कस्मिंश्चित् कार्यविशेषे अथवा वचनविशेषे स्वान्तःकरणेन आदरातिशयस्य भावना। वस्तुतः श्रद्धया सम्पादितं कार्यमेव लाभदायकं भवति। श्रद्धाविहीनं कर्म कदापि फलदायकं न भवति।(9.113.2) मन्त्रे ऋत-सत्याभ्यामतिरिक्तस्य श्रद्धया सोम-सवनस्य विधानं दर्शितमस्ति। सोमस्याभिषवः यजमानस्य श्रद्धां प्रकटयति

(श्रद्धां वदन् सोमराजन् 9.113.4)। ऋषिभिः कृतस्तोत्रं श्रद्धासमन्वितमनसा इन्द्रेण श्रुतम् (श्रद्धामनसा शृणुतेदभीतये)। वाक्सूक्ते[17] कथितमस्ति- 'श्रुधि श्रुत श्रद्धिवं ते वदामि' अत्र 'श्रद्धिव' इति पदस्य सायणेन कृतमर्थम्- 'श्रद्धाबलेन लभ्यं ब्रह्मात्मकं वस्तु अर्थात् 'बह्म' श्रद्धया ज्ञातो भवति, उपलब्धोऽपि च भवति। अन्येषु मन्त्रेष्वपि ऋषीणां श्रद्धां प्रति अतीव पूज्या भावना वर्तते। श्रद्धासूक्ते तु देवतास्वरूपेणैव श्रद्धा चित्रिताऽस्ति। अस्य मन्त्रस्य ऋषिका श्रद्धाऽस्ति, या कामगोत्रजाऽस्ति, तेनैव कारणेन सा 'कामायनी' इति नाम्ना विख्याताऽस्ति। अस्य सूक्तस्य प्रथममन्त्रे एव स्पष्टीकृतमस्ति यत्, श्रद्धया एवाग्नेः समिन्धनं भवति। श्रद्धया आहवनीयाग्नौ आहुतिः देया भवति इति। अस्य तात्पर्यमिदमस्ति यत्, यज्ञीयकार्येषु श्रद्धायाः महती आवश्यकता वर्तते। अग्निमन्त्रः ज्ञानाग्नेः प्रतीकमपि वक्तुं शक्यते। ज्ञानाग्नेः समिन्धनमपि श्रद्धया एव सम्पादितं भवेत्। विशाला हि श्रद्धायाः व्यापकताऽस्ति। अस्याः उपासना न केवलं मानवाः कुर्वन्ति, अपि तु देवता अपि असुरैः सह युद्धकाले श्रद्धायाः आश्रयं गृहीत्वा स्वकीयमनोरथं साधयितुं कृतकार्या भवन्ति। अपरस्मिन् मन्त्रे मनोवैज्ञानिकतथ्यस्य रोचकं विश्लेषणं वर्तते 'श्रद्धां हृदय्याकूत्या श्रद्धया विन्दते वसु।' हृदये समुत्पन्नसङ्कल्पेन श्रद्धायाः उपासना भवति। प्रथमस्तु साधकस्य चित्ते सङ्कल्पस्योदयो भवति, तदनन्तरमेवासौ कस्मिंश्चिदपि कार्ये स्वनियोगं करोति। श्रद्धया धनस्य प्राप्तिर्भवति। अत्र 'वसु' इत्येतत्पदेन भौतिकद्रव्यस्य सङ्केतो न भवति, प्रत्युत आध्यात्मिककल्याणस्य। आध्यात्मिकं वसु अस्ति अज्ञानस्य विनाशं कृत्वा अमरत्वस्य प्राप्तिः। अमरतायाः समुपलब्धेः प्रधानसाधनमियमेव श्रद्धा वर्तते। अन्तिमा प्रार्थना- श्रद्धे श्रद्धापये ह नः। उपनिषत्सु श्रद्धातत्त्वस्य यद् विपुलं उपबृंहणमस्ति, तस्य बीजमस्मिन्नेव प्रख्यातसूक्ते एव अस्ति।

**पुरुषसूक्तम्**

दशममण्डले स्वदार्शनिकविचाराय, निजमहत्वाय, गाम्भीर्याय, अन्तःपर्यवेक्षणाय च पुरुषसूक्तं नितान्तं विख्यातम् अन्यतमश्चाऽस्ति। अस्मिन् सूक्ते पुरुषस्याध्यात्मिक कल्पनायाः भव्यं निदर्शनमस्ति। पुरुषस्यास्य सहस्राणि शिरांसि,सहस्राणि अक्षीणि, तथैव पादाः च सन्ति। अर्थात् तस्मै पुरुषाय एतेषां शरीरावयवानां कापि इयत्ता नास्ति। अस्य विश्वस्य परिमाणादसावधिकोऽस्ति। विश्वमभितः स्थितस्य परिवेष्टनात् दशाङ्गुलिर्यः अग्रतरोऽस्ति। 'अत्यतिष्ठद्

दशाङ्गुलम्' अत्र दशाङ्गुलं केवलं परिमाणा- धिक्यस्य उपलक्षणमात्रमेवास्ति। विश्वस्य समस्तमरणशीलप्राणिनः तस्य पुरुषस्यैकचतुर्थांश-मात्रमेव सन्ति। तस्यामृतत्रिपादः आकाशेऽवस्थितोऽस्ति। सः सर्वेषां शासको वर्तते। अस्य पुरुषस्य विषये विलक्षणं तथ्यमिदमेवाऽस्ति—'पुरुष एवेदं सर्वं यद् भूतं यच्च भव्यम्' एक एवाऽसौ पुरुषः निखिले विश्वस्मिन् वर्तते, यः प्राचीनकाले समुत्पन्नोऽभवत्, यः भविष्येऽपि समुत्पन्नो भविष्यति। सर्वेश्वरवादस्यायं सिद्धान्तः पाश्चात्यपण्डितानां मते आर्याणां प्रौढ-दार्शनिक-विचारधारायाः परिचायकोऽस्ति। सृष्ट्याः समुत्पादने यज्ञस्य कल्पना कीदृशी जागरूका क्रियाशीला चासीद्, तस्याः अपि परिचयः अस्मिन्नेव सूक्ते वर्णितः। देवताः स्वयज्ञे पुरुषबलिं कृतवन्तः। तेन बलिना जगतः प्राणिनां समुत्पत्तिरभवत्। अस्मिन्नेव सूक्ते ब्राह्मण-क्षत्रिय-वैश्य-शूद्रादीनां समुत्पत्तिस्तस्य पुरुषस्य मुखाद्, बाहोः, ऊरोः, पद्भ्यां क्रमशः जाता। ऋग्वेदस्य कस्याप्यन्यस्मिन् मन्त्रे चतुर्णां वर्णानां चर्चा नाऽस्ति, येन प्रतीतो भवति, अस्मिन् समाजे तस्मिन्नेव युगे चतुर्णां वर्णानां कल्पना समुद्भूताः। अनेन प्रकारेण सूक्तमिदं वैदिकार्याणां सामाजिकाध्यात्मिक-धारणायाः परिचायकत्वेन नितान्तं महत्त्वपूर्णमस्ति।

**वंशमण्डलम्**

पाश्चात्यविदुषां मते ऋग्वेदस्य मण्डलेषु प्राचीनार्वाचीनमन्त्राणां समुदायः सङ्कलितोऽस्ति। द्वितीयमण्डलादारभ्य सप्तममण्डल-पर्यन्तस्य भागाः ऋग्वेदस्य केन्द्रीयभागाः कथ्यन्ते, अत एव एते अंशाः अत्यन्तं प्राचीनाः सन्ति। एतेषु प्रत्येकं मण्डलस्य सम्बन्धः केनाऽपि ऋषिणा तद्वंशजेन सह वा निश्चितरूपेण समुपलब्धो भवति। द्वितीयमण्डलस्य ऋषिरस्ति गृत्समदः, तृतीयस्य विश्वामित्रः, चतुर्थस्य वामदेवः, पञ्चमस्य अत्रिः, षष्ठस्य भरद्वाजः, सप्तमस्य वशिष्ठः च। अष्टममण्डलस्य मन्त्राणामृषिः कण्वस्तथाङ्गिरसवंशोद्भवाः सन्ति। नवम मण्डलेऽखिलाः मन्त्राः सोमदेवताविषयका एव सन्ति। वंशविशेषेण सम्बन्धत्वेन एतानि मण्डलानि आङ्ग्लभाषायां वंशमण्डलं (Family book) इति कथ्यते। वैदिकार्यगणाः हिमप्रदेशे समुत्पन्ना सोमलतायाः रसं स्वेष्टदेवतां समर्प्य स्वयमपि प्रसादरूपेण ग्रहणं कुर्वन्ति। सोमरसपानेन समुत्पन्नस्य अनेकविधाऽऽनन्दोल्लासस्य ललितवर्णनम् अनेकेषां वैदिकसूक्तानां विषयः अस्ति। सोम एव पवमानोऽपि कथ्यते। अतः सोमविषयकमन्त्राणां समुच्चयेन नवममण्डलं 'पवमानमण्डलमि'ति

पदेनापि व्यवह्रियते। प्रथममण्डलं तथा दशममण्डलमपि अन्येषां मण्डलानामपेक्षयाऽर्वाचीनौ स्तः। उभयोर्मण्डलयोः सूक्तानां समानसंख्यायाः (191. सू.) किमपि महत्त्वमस्ति। किञ्च भारतीयाः गृत्समद-विश्वामित्र-वामदेव-अत्रि-भरद्वाज-वसिष्ठादयः ऋग्वेदमन्त्रद्रष्टारो ऋषय एव मन्यन्ते। ऋग्वेदस्य दशसु मण्डलेषु नवमं मण्डलं पवमानमण्डलनाम्ना प्रथितम्। तत्र हि केवलं सोमविषयकमन्त्राणां सङ्कलनं कृतम्। पवमानः-सोमः। पूर्वोक्ताः सप्त अपि मन्त्रद्रष्टारो ऋषयो द्वितीयमण्डलतः सप्तममण्डलपर्यन्त गताभिर्ऋग्भिः सम्बद्धाः, दशममण्डले मन्त्राः नानाऋषिसम्बद्धाः। दशमे मण्डले न केवल देवता स्तुतय एव, अन्यप्रकारका अपि मन्त्राः दृश्यन्ते। द्वितीयमण्डलाद् आरभ्य सप्तममण्डलपर्यन्तस्य ऋग्वेदभागस्य रचना सर्वतः प्राचीना, दशमं मण्डलं सर्वतोऽर्वाचीनम्, शेषास्तु मध्यकालिकाः इति साम्प्रतिका आङ्ग्लाऽऽलोचकाः कथयन्ति। किञ्च भारतीयपारम्परिकाणां विदुषां मतमेतद्भिन्नमस्ति। ऋग्वेदस्य दशसु मण्डलेषु चर्चितानामृषीणां विषये कात्यायनस्य इयमुक्तिः द्रष्टव्या- 'शतर्चिन आद्ये मण्डलेऽन्त्ये क्षुद्रसूक्तमहासूक्ता मध्यमेषु माध्यमाः' कृतेन हि प्रथममण्डलस्य ऋषिः 'शतर्चिनः' एव कथ्यते। अस्य मण्डलस्य प्रथमः ऋषिः विश्वामित्रस्य पुत्रेण मधुच्छन्दा नाम्ना ऋषिणा दृष्टा ऋचः शताधिकैवासन्। अतः छत्रिन्यायानुसारेण समस्तानां ऋषीणां समानाभिधानं 'शतर्चिनः' एवाऽभवत्। आद्यस्य ऋचेर्ऋक्शतयोगेन छत्रिन्यायेन शतर्चिनः सर्वे। द्व्यधिकेऽपि शतोतिबाहुल्यात्।[18] दशममण्डलस्य ऋषिः 'क्षुद्रसूक्तम्' महासूक्तञ्च कथ्यते। षड्गुरुशिष्यस्य विवेचनानुसारेण नासदासीयसूक्तात्पूर्ववर्तीनि सूक्तानि महासूक्तमिति कथ्यन्ते, परवर्तीनि च क्षुद्रसूक्तं मन्यन्ते। सूक्तदर्शित्वेन ऋषीणां नामकरणमपि तदैवाऽभवत्। द्वितीय मण्डलादारभ्य नवममण्डलपर्यन्तं मध्यस्थिततत्वेन तत्रत्याः ऋषिगणा अपि 'माध्यम' इति नाम्ना व्यपदिश्यन्ते। ऋग्वेदस्य ब्राह्मणभागद्वयं ऐतरेयकौषीतकीति, आरण्यकानि ऐतरेय-कौषीतकि-शाङ्खायनादीनि त्रीणि, दश उपनिषदश्च विद्यन्ते।

**ऋग्वेदस्य शाखाः**

यज्ञस्य आवश्यकताम् अभिलक्ष्य उदात्तदृष्ट्या महामुनिना व्यासेन वेदमध्यापितः। यज्ञे चत्वारो ऋत्विजो भवन्ति- 1. होता, 2. अध्वर्युः 3. उद्गाता 4. ब्रह्मा। होता-आह्वानकर्ता, स हि यज्ञावसरे प्रक्रान्तदेवतानां प्रशंसायां रचितान् मन्त्रान् उच्चारयन् देवताम् आह्वयति, सङ्कलिताः मन्त्राः स्तुतिरूपतया ऋचः

समाख्याताः, तेषां सङ्ग्रह एव ऋग्वेदः। एनम् उद्दिश्यम् अभिलक्ष्य व्यासः पेलमृग्वेदं पाठयामास। अध्वर्युर्विधिवद्यज्ञं सम्पादयति, तत्रावश्यकमन्त्रा यजूंषि, तत्सङ्ग्रहो यजुर्वेदस्तदर्थं वैशम्पायनं यजुः पाठितवान्। उद्गाता-उच्चस्वरेण गानकर्त्ता, स हि स्वरबद्धान् मन्त्रानुच्चौर्गायति, तदपेक्षितमन्त्राणां सङ्ग्रहः सामवेदः। व्यासेन कविजैमिनये सामवेदः अध्यापितः। ब्रह्मा—यज्ञनिरीक्षकः कृता—तावेक्षणकर्ता, स हि सर्वविधमन्त्रः, तदपेक्षितो मन्त्रराशिः अथर्ववेद इति कथ्यते। यज्ञनिरीक्षणकार्य-सम्पादनाय मुनिना व्यासेन सुमन्तुमुनये अथर्ववेदः पाठितः।

**तत्रार्ग्वेदधरः पैलः सामगो जैमिनिः कविः वैशम्पायन एवैको निष्णातो यजुषामुत।।**
**अथर्वाङ्गिरसामासीत् सुमन्तुर्दारुणो मुनिः।।**[19]

शाखया सह 'चरण'-शब्दोऽपि सम्बद्धोऽस्ति। सामान्यतः उभयोः शब्दयोः प्रयोगः प्रायः समानार्थे एव भवति। मालतीमाधवस्य टीकाकर्तुः जगद्धरस्य कथनानुसारेण - 'चरणशब्दः शाखाविशेषाध्ययन-परैकतापन्नजटासंघवाची' इति। आसां शाखानां विस्तृतविवरणं पुराणेषु, चरणव्यूहे च लभते। विविधेषु ग्रन्थेषु शाखासंख्यायां विपर्ययो वर्तते। भाष्यकारेण पतञ्जलिनोक्तम्—**'चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्नाः एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः एकविंशतिधा वाह्वृच्यम् नवधाऽर्थवणो वेदः।**[20] यद्यपि महाभाष्ये ऋग्वेदस्य एकविंशतिशाखाः निर्दिष्टाः परं शाकल-वाष्कल-आश्वलायन-शाङ्खायन-माण्डूकायननामधेयाः पञ्चशाखाः सन्ति मुख्याः।

**शाकल-शाखा**

सम्प्रति ऋग्वेदस्य प्रचलिता संहिता शाकलशाखीया एवाऽस्ति। शाकलसंहितान्ते ऋक्परिशिष्टनाम्ना षट्त्रिंशत्सूक्तानि सङ्गृहीतानि सन्ति। एतेषु सूक्तेषु कतिपयानि नितान्त-प्रख्यातानि बहुशः चर्चितानि च सूक्तानि सन्ति। यथा श्रीसूक्तम् (सू.स.11), रात्रिसूक्तम् (सू.स.26), मेघासूक्तम् (सू.स.31),। वाष्कलशाखानुसारेण संज्ञानसूक्तम् ऋग्वेदस्यान्तिमं सूक्तमस्ति। ऋक्परिशिष्टस्य मन्त्रः पुराणेषु वैदिकमन्त्र-दृष्ट्या समुद्धृताः सन्ति। श्रीसूक्तस्य द्वौ मन्त्रौ 'हिरण्यवर्णां हरिणीम्' तथा 'गन्धद्वारां दुराधर्षाम्' पद्मपुराणे समुद्धृतौ स्तः(6.155. 28.30) 'सितासिते सरिते यत्र सङ्गते' स्कन्दपुराणस्य काशीखण्डे (7.44) तथा पद्मपुराणे (6.246.35), समुद्धृतोऽस्ति। द्वयोः स्थानयोः मन्त्रोऽयं

प्रयागपरकोऽस्ति। प्रयागे सिता=गङ्गा, तथा असिता=यमुना तयोः सङ्गमतीर्थस्य विपुलमहिम्नः प्रतिपादकः मन्त्रोऽयमस्ति। ऋक्परिशिष्टस्य मन्त्राः पुराणेषु प्रमाणाय समुद्धृताः सन्ति, तेन एते मन्त्राः विशेषसम्मानार्हाः कथ्यन्ते।

**वाष्कल-शाखा**

यद्यपि सम्प्रति वाष्कलशाखायाः संहिता समुपलब्धा न भवति, तथाप्यस्याः विशिष्टतायाः वर्णनं विविधेषु स्थलेषु लभते। शाकलशाखानुसारेण ऋग्वेदस्यान्तिमो मन्त्रः 'समानी व आकूतिः' (10.191.4) इति अस्ति, किञ्च वाष्कलसंहितानुसारेण 'तच्छ्रेयोरा वृणीमहे' इत्येव अन्तिमो मन्त्रोऽस्ति। इयं ऋक्, ऋक्परिशिष्टस्य अन्तिमसूक्तस्य अन्तिमो मन्त्रोऽस्ति। अस्मादेव सूक्तात् वाष्कलशाखासम्मत-संहितायाः समाप्तिर्भवति। मन्त्राणां संख्याऽपि कुतश्चिदधिकाऽस्ति। शाकलशाखायां सप्तदशाधिक-सहस्रसंख्यकानि (1017) सूक्तानि सन्ति। किञ्च वाष्कलशाखायां पञ्चविंशत्यधिकसहस्रसंख्यकानि (1025) सूक्तानि सन्ति। एतेषु अधिकाष्टसूक्तेषु एकन्तु संज्ञानसूक्तमस्ति। मन्त्रोऽयमस्याः संहितायाः अन्ते निवेशितोऽस्ति। अवशिष्टसप्तसूक्तानि बाल्यखिल्यसूक्तेभ्यः सङ्गृहीतानि सन्ति। अतोऽस्य मण्डलस्य समस्तसूक्तानां संख्या (99) नवनवतिर्भवति।

**एतत् सहस्रं दश सप्त चैवाष्टवतो बाष्कलकेऽधिकानि।**
**तान् पारणे शाकले शैशिरीये वदन्ति शिष्टानखिलेषु विप्राः।**[21]

**आश्वलायन-शाखा**

आश्वलायनसंहितायास्तथा तेषां ब्राह्मणानां कस्मिंश्चित्समये अवश्यमेवासीत्। यतो हि कवीन्द्र आचार्यस्य (17 शताब्याः) सूच्यामेतेषां ग्रन्थानां नामोल्लेखः स्पष्टरूपेणोपलब्धो भवति। सम्प्रति अस्याः शाखायाः गृह्यसूत्रं श्रौतसूत्रञ्चेति समुपलब्धे स्तः।

**शाङ्कायन-शाखा**

अस्याः शाखायाः संहिता तु अनुपलब्धाऽस्ति। किञ्च ब्राह्मणारण्यकौ ग्रन्थौ प्रकाशितौ स्तः। शाङ्कायनस्तथा कौषीतकि-शाखा एकैवाऽस्ति इति मतम् अपि प्रसिद्धम्। किञ्च द्वेऽपि शाखे भिन्ने एव स्तः। शाङ्खायनीयसंहितायाः प्रकाशितशाकलशाखानुयायि-ऋक्संहितायाः मन्त्रसंहितायां भेदो नाऽस्ति। केवलं मन्त्राणां एव क्रमे भिन्नता वर्तते।

**माण्डूकायन-शाखा**

अस्याः अपि शाखायाः ग्रन्थाः अनुपलब्धाः सन्ति। यत्र तत्र समुद्धरणादेव अस्याः अस्तित्वबोधः भवति।[22]

**शाकल्यः**

शाकल्यः हि ऋग्वेदस्य पदपाठं प्रस्तुतवान्। बृहदारण्यकोप- निषदि जनकस्य सभायां याज्ञवल्क्येन सह शाकल्यस्य शास्त्रार्थस्य वर्णनं प्राप्यते (अ.4)। पौराणिक-गाथानुसारेण अयं शाकल्यः ऋग्वेदपदपाठस्य रचयिताऽप्यस्ति । यथा-

**शाकल्यः प्रथमस्तेषां तस्मादन्योरथीतरः वाष्कलिश्च भारद्वाज इति शाखाप्रवर्तकाः ॥**

**देवमित्रश्च शाकल्यो ज्ञानाऽहङ्कारगर्वितः जनकस्य स यज्ञे वै विनाशमगमद् द्विजः**[23]

शाकल्यस्योल्लेखः निरुक्ते, ऋक्प्रातिशाख्येऽपि च अस्ति। अतोऽयम् उपनिषत्कालिकः ऋषिः वर्त्तते।

यास्केन क्वचित् क्वचित् निजनिरुक्ते अस्य पदपाठः नाङ्गीकृतः। यथा निरुक्ते 5.21 'अरुणो मासकृत् वृकः' (10.5.18) यास्कस्त्वत्र 'मासकृत्' इत्येकपदं मत्वा 'मासानां कर्त्ता' इत्यर्थं कृतवान्। किञ्च शाकल्येनात्र 'मा+सकृत्' इति पदद्वयं स्वीकृतम्। निरुक्ते (5.28) वने 'न वायो' (ऋ.10.29.1) इति यास्केनोद्धृतः। अत्र शाकल्येन 'वा+यः = वायः' इति पदद्वयं मन्यते। किश्चास्य पदस्योल्लेखं कृत्वा यास्कस्तु पदद्वयं न स्वीकृतवान् 'वायः' इत्येकपदस्य यास्कसम्मतार्थोऽस्ति 'पक्षीविशेष' इति। अनेन प्रकारेण निजनिरुक्ते यास्केन क्वचित्क्वचिच्छाकल्यस्य अनुमोदनं न कृतम्। एतदतिरिक्तः रावणकृतपदपाठस्य अप्यस्तित्वं यत्र कुत्राऽपि लभते। रावणस्तु ऋग्वेदस्य भाष्यमपि रचयामास तथा तस्य पदपाठोऽपि कृतवान्। अयं हि पदपाठः शाकल्यस्य नानुकरणमस्ति, प्रत्युत नानास्थलेषु निजबुद्ध्यनुसारेण असौ नवीनपदपाठस्यापि योजनां कृतवान्।

**वेदरक्षा**

वेदास्त्वाचूलमूलं धर्म्यप्रवृत्तिकम्। अतो वेदानां परमोपादेयत्वाद्, अतिशयतमहत्त्व- शालित्वाच्च महर्षयस्तान् रक्षितुमपि पूर्णमुपायञ्चक्रुः। वेदा एतावद्दीर्घकालानन्तरमपि लोके समवाप्ताः सन्तीत्यत्र कारणमेव महर्षि कृतः प्रयत्नः। महर्षयो हि वेदरक्षार्थम् अष्टविकृतीनां व्यवस्थां विदधुः। ताः विकृतयः अधःस्थितेन श्लोकेनाभिव्यक्तीक्रियन्ते - जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः। अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः मन्त्राणां प्रकृतोपलब्धः पाठः

'संहितापाठ'-पदेन व्यवह्रियते। अत्र कतिपया एव विकृतयो हि वर्ण्यन्ते। पदच्छेदपूर्वकपाठः 'पदपाठ' इत्युच्यते। क्रमपाठः स भवति यत्र पदपाठगतं प्रतिपदं पूर्वोत्तरपदाभ्यां सङ्गमय्य द्विरुच्चार्यते। जटापाठः स भवति यत्र क्रमपाठम् आलम्ब्य प्रतिपदयुगलं त्रिरुच्चार्यते। एतावान् भेदो यच्छिखायाम् अन्यच्चैकं पदमग्ने संश्लिष्टतां याति। उक्तञ्च -

'पदोत्तरं जटामेव शिखामार्याः प्रचक्षते।' घनपाठो नितरां विलक्षणः क्लिष्टश्च। तत्र पदानाम् आवृत्तिः अनुलोमविलोमक्रमेण जायते। घनस्तु चतुर्विधः भवति। तत्र प्रथमप्रकारको वदति- शिखामुक्त्वा विपर्यस्य तत्पदानि पुनः पठेत्। अयं घन इति प्रोक्तः।

प्रक्षेप-च्युत-व्यवसादादि-विकारेभ्यः परित्रातुं श्रुतिं पद-क्रम-घनजटादिपाठाः आविष्कृताः। एषां सद्भावेन न श्रुतिषु अद्यपर्यन्तम् अणुमात्रमपि दोषलेशः प्रविष्टो भवितुम् अशकत्। प्रातिशाख्यग्रन्था अपि वेदपाठस्य रक्षणार्थं विरचिता अभूवन्।

संहितापाठः

ओषधयः संवदन्ते सोमेन सह राज्ञा।। ऋ010.97.22.

पदपाठः

ओषधयः । सं। वदन्ते। सोमेन। सह राज्ञा

क्रमपाठः

ओषधयः सं। सं वदन्ते। वदन्ते सोमेन। सोमेन सह। सह राज्ञा। राज्ञेति राज्ञा।

जटापाठः

ओषधयः सं, समोषधयः, ओषधयस्, सम्। सं वदन्ते, वदन्ते, सं, सं, वदन्ते।

शिखापाठः

ओषधयः सं, समोषधय, ओषधयः सं वदन्ते। संवदन्ते, वदन्ते सं, संवदन्ते-सोमेन।

घनपाठः

ओषधयः सं, समोषधय ओषधयः संवदन्ते, वदन्ते समोषधय ओषधयः संवदन्ते।
संवदन्ते वदन्ते सं संवदन्ते सोमेन, सोमेन वदन्ते सं, संवदन्ते सोमेन।

अस्य घनपाठस्य परीक्षणेन ज्ञातो भवति यत्, प्रथमपदन्तु पञ्चवारं, द्वितीयपदमपि पञ्वारं, तृतीयपदं त्रिवारमायाति। इयं हि मेधाशक्तेः पराकाष्ठा वर्त्तते। मेधाविनो मुनेः ज्ञानस्योत्कर्ष एवाऽस्ति।

एवं विवेचनानुसारं ऋग्वेदो वैदिकसाहित्यात्, दर्शनदृष्ट्या, सांस्कृतिक परम्परा-दृष्ट्या, लौकिकजीवन- दर्शन-दृष्ट्या च सर्वोन्नतस्थानमधिगच्छति। दशममण्डलं प्राचीनबहुदेववादात् परमदर्शनप्रधानपर्यन्त-विकासस्य प्रतिबिम्बरूपेण प्रतीयते। नासदीयसूक्तस्य आरम्भाद् दर्शनगौरवं पराकाष्ठां गच्छति, पुरुष-सूक्तस्याडम्बरात् चतुर्वर्णव्यवस्थायाश्च दृश्यं विवेचनं जायते। वंशमण्डलानामन्वय विचारे प्राचीनतम-साहित्यस्य मानवीय-विकासेतिहासोपयोगित्वमपि प्रकाशते। अन्ते वेदरक्षणे बहुविधपाठविधीनाम् आवश्यकता, शाखाव्यवस्थायाः संवर्धनमनुवर्तनीयं कार्यमिति विद्वत्समुदाये निश्चितरूपेण स्वीकृतम्।

तस्मात् सर्वथा ऋग्वेदस्य परिचयात्मकं समीक्षणम् अस्मदभिगमं वर्द्धयितुं, भारतीयवैदिकवाङ्मयस्य आध्यात्मिक-दार्शनिक-मौलिकमूल्यानां बोधाय च अत्यन्तोपयोगीति सिद्धमस्ति।

**सन्दर्भाः -**


1. *बह्वृक्प्रातिशाख्यम्*
2. *भाष्यभूमिका*
3. *तै.सं.6.5.10.3.*
4. *ऋग्वेद.1.161*
5. *ऋग्वेद.10.178.2*
6. *ऋग्वेद.10.190.3*
7. *ऋग्वेदे.10.151*
8. *ऋग्वेदे.1.13.84*
9. *ऋग्वेदे.10.129*
10. *ऋग्वेदे.10.90*
11. *ऋग्वेद.10.129.2*
12. *ऋग्वेद.10.85.*
13. *ऋग्वेद.10.11*
14. *ऋग्वेद.10.34*
15. *ऋग्वेद.10.145.1*

16. *ऋग्वेद.10.166*
17. *ऋग्वेद.10.145*
18. *वेदार्थदीपिका पृ. 59*
19. *श्रीमद्भागवतमहापुराणम्,स्क.1.अ. 4.*
20. *पस्पशाह्निकः*
21. *अनुवाकानुक्रमणी, श्लो. 36*
22. *वैदिकवाङ्मय का इतिहास-प्र. भा. पृ. 77-132*
23. *ब्रह्माण्डपुराणम्, पूर्वभागस्य द्वितीयपादः,अ.34.श्लो.32-33*

●●●

# 2

# बौद्धिकसम्पदधिकारस्य वैदिकचिन्तनम्

*हेमन्तशर्मा*

भारतीयसनातनवैदिकसंस्कृतिः आदिकालादेव ज्ञान-विज्ञानसम्पन्नास्ति। अस्यां संस्कृत्यां विलिखिताः नैकेः ग्रन्थाः अस्याः बौद्धिकसम्पदः गौरवं सततं वर्धयन्तः। प्राचीनभारतीयवैदिकी बौद्धिकसम्पदतिविशालसाहित्यसमन्विता आसीत्। प्राचीनवैदिकवाङ्मये चतुर्णां वेदानां 1130 शाखाः उपलभ्यन्ते स्म। तत्र ऋग्वेदस्य 21, यजुर्वेदस्य 100, सामवेदस्य 1000, अथर्ववेदस्य 9 शाखाः इति।[1] प्रत्येकं शाखायाः एकः ब्राह्मणग्रन्थः, एकः आरण्यकग्रन्थः, अथ च एकः उपनिषद्ग्रन्थः उपलभ्यन्ते स्म। अनेन क्रमानुरूपं वेदानाम् अनुक्रमणी-शिक्षा-प्रातिशाख्य-सूत्रादि-ग्रन्थाः अपि आसन्। एतावद् विशालवैदिकवाङ्मयस्य बौद्धिकसम्पदधिकारस्य संरक्षणं निश्चप्रचं दुष्करं कार्यं तथाप्यस्माकं मनीषिभिः स्वनवनवोन्मेषशालिनिप्रतिभया कार्यमिदं समीचीनरूपेण साधितम्। यद्यपि वर्तमाने सम्पूर्णं वैदिकसाहित्यं नोपलभ्यते तथापि यथोपलब्धवैदिकसाहित्यस्य बौद्धिकसम्पदरध्ययनेन स्पष्टं प्रतीयते यत् कृतभूरिपरिश्रमैः ऋषिभिः कियत्तपञ्चरित्वा वैदिकज्ञानस्य संरक्षणं कृतम्। वर्तमाने प्रासङ्गिकविषयः बौद्धिकसम्पदधिकारसंरक्षणं प्राचीनभारतीयसाहित्ये विविधरूपेण व्याप्नोति। सामान्यतया सम्पदं द्विधा विभक्तुं शक्यते भौतिकसम्पद् बौद्धिकसम्पच्च। लोकव्यवहारे धनधान्यादिकं भौतिकसम्पदन्तर्गतं समायान्ति विद्याविवेकादिकं बौद्धिकसम्पदन्तर्गतञ्च। संस्कृतसाहित्ये नैकान्युदाहरणानि उपलभ्यन्ते येषु उभयविधसम्पत्त्योः समुल्लेखः विद्यते। रघुवंशमहाकाव्यस्य प्रथमसर्गस्य श्लोकेऽस्मिन् भौतिकसम्पद्विषयकः उल्लेखः यथा-

**त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना।**
**सानुबन्धाः कथं न स्युः सम्पदो मे निरापदः।।**[2]

एवं विद्यागुणादिबौद्धिकसम्पद्विषयेऽपि उल्लेखः प्राप्यते-

**गुणसम्पदा समधिगम्य परं महिमानमत्र महिते जगताम्।**
**नयशालिनि श्रिय इवाधिपतौ विरमन्ति न ज्वलितुमौषधयः।।**[3]

अपि च

**सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम्।**
**अहार्यत्वादनर्घत्वादक्षयत्वाच्च सर्वदा।।**[4]

वैदिकवाङ्मयेऽनेकास्तथाविधाः मन्त्राः यत्रोभयविधसम्पदोः समुल्लेखः-

**श्रीर्वर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते।**
**धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः।।**[5]

इत्थं स्पष्ट्यते वस्तु पदार्थादिसम्बन्धी भौतिकसम्पद् बुद्धिविवेकादिसम्बन्धी बौद्धिकसम्पच्च प्राचीनभारतीयवाङ्मये समुपलभ्येते। मानवजीवने उभविधसम्पत्त्योः महत्त्वमस्ति। भौतिकसम्पदपेक्षया बौद्धिक-सम्पद्विविधकार्यसम्पादनाय अपरिहार्या वर्तते। बौद्धिकसम्पदा भौतिकाध्यात्मिकोभयविधोन्नतिः भवति। जगतीतलेऽस्मिन् यथा भौतिकसम्पत्तेः स्वामित्त्वं विविधोपायैर्निर्धारितं भवति अथ च तत्संरक्षणाय विविधोपबन्धाः सर्वकारेण क्रियन्ते तथैव बौद्धिकसम्पत्तेरपि कोऽप्यधिकारी स्वामी वा भवत्येव। वैदिकसाहित्ये ऋषीणां मुनीनामाचार्याणां वा बौद्धिकसम्पदधिकारं संरक्षणाय विविधोपायाः दृश्यन्ते ।

**1. बौद्धिकसम्पदधिकारं सरंक्षणाय अधिकारित्वनिर्णयोऽनधिकारिपरिहारश्च-** बौद्धिकसम्पदधिकारं संरक्षणाय वैदिकसाहित्ये विलक्षणोपायाः ऋषिभिर्वर्णिताः। वैदिकर्षयः बौद्धिकसम्पदधिकारविषये गभीरं चिन्तनमकुर्वन्। तैर्न केवलं सामान्यरीत्या बौद्धिकसम्पदधिकारसंरक्षणाय उपायाः प्रदर्शिताः अपितु तेषांचिन्तनं किमपि वैशिष्ट्यमर्हति संरक्षणायास्य। वैदिकपरम्परायान्तु विद्या स्वयमेव स्वबौद्धिकसम्पदधिकारं संरक्षणाय ब्राह्मणं प्रार्थयति यत् मामधिकारिणे प्रयच्छ नत्वनधिकारिणे। अत्र कश्चित् मानवः न कथयति बौद्धिकसम्पद्संरक्षणाय अपितु विद्या स्वयमेव कथयति। बौद्धिकसम्पदधिकारविषये ईदृशं वैशिष्ट्यम् विश्वसाहित्येऽन्यत्र कुत्रापि न दृश्यते। वेदेषु चतुर्दशविद्यास्थानोपबृंहिविद्यायाः ग्रहणेऽधिकारिविशेषस्य अथ च अनधिकारिणश्च उल्लेखश्चतुर्षु मन्त्रेषु प्राप्यते। तत्र विद्या ब्राह्मणं स्वरक्षार्थं कथयति। सा विद्या अनधिकारिणं निकषा न गन्तुमिच्छति। सा कथयति हे ब्राह्मण ! माम् अनधिकारिणमसूयकायं कुटिलं प्रति च

नोपदिश अपितु एभ्यो मां रक्ष। योऽनभ्यासी नाममात्रस्य शिष्यः तमपि मां नोपदिश। सा विद्या ब्रूते भो ब्राह्मण! भवतः यः शिष्यः शुचित्वादिगुणोपेतः प्रमाद-द्रोहादिरहितः गुरुवाक्यपालकः तस्मै सुयोग्याय शिष्याय मां निधिभूतां विद्यां प्रदद। अत्र विद्या कथयति यदि त्वम् ईदृशं करिष्यसि चेदहं तव हृदये स्थित्वा फलप्रदा भविष्यामि-

**विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि।**
**असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती तथा स्याम्।।**
**य आतृणत्यवितथेन कर्णावदुःखं कुर्वन्नमृतं संप्रयच्छन्।**
**तं मन्येत पितरं मातरं तस्मै न द्रुह्येत् कतमच्चनाह।।**
**अध्यापिता ये गुरुं नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा।**
**यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत्।।**
**यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम्।**
**यस्ते न द्रुह्येते कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन्।।**[6]

मनुस्मृतौ अपि अपात्रशिष्याय विद्यादानस्य निषेधः प्राप्यते। तत्रोल्लिखति मनुः धर्मार्थरहिताय गुरुशुश्रूषाहीनाय अपात्राय शिष्याय बौद्धिकसम्पद्रूपाविद्या न दातव्या अपितु सदाचारिणे जितेन्द्रियाय अप्रमादिने शिष्याय बौद्धिकनिधिभूता विद्या प्रदातव्या-

**धर्मार्थौ यत्र न स्यातां शुश्रूषा वाऽपि तद्विधा।**
**तत्र विद्या न वक्तव्या शुभं बीजमिवोषरे।।**
**विद्ययैव समं कामं कर्तव्यं ब्रह्मवादिना।**
**आपद्यपि हि घोरायां न त्वेनामिरिणे वपेत्।।**
**विद्या ब्राह्मणमेत्याह शेवधिस्तेऽस्मि रक्ष माम्।**
**असूयकाय मां मादास्तथा स्यां वीर्यवत्तमा।।**
**यमेव तु शुचिं विद्यान्नियतब्रह्मचारिणम्।**
**तस्मै मां ब्रूहि विप्राय निधिपायाप्रमादिने।।**[7]

ऋग्वेदीयगणपत्यथर्वशीर्षे अशिष्याय बौद्धिकसम्पद्दानस्य प्रतिषेधः प्राप्यते। तत्र वर्णितमस्ति यदि कोऽपि मोहवशात् अशिष्याय निधिभूतां विद्यां ददाति चेत् सः पापीयान् भवति । तद्यथा-

**इदमथर्वशीर्षमशिष्याय न देयम्। यदि मोहाद्दास्यति स पापीयान् भवति।**[8]

श्वेताश्वतरोपनिषदि अनधिकारिणे बौद्धिकसम्पद्रूपविद्यादानस्य निषेधः कृतः अथ च इयं बौद्धिकसम्पद् कुत्र प्रकाशते तदप्युल्लेखः कृतः-

**वेदान्ते परमं गुह्यं पुराकल्पे प्रचोदितम्।**
**नाप्रशान्ताय दातव्यं नापुत्रायाशिष्याय वा पुनः।।**
**यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।**
**तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः।**
**प्रकाशन्ते महात्मनः।।**[9]

अनेन स्पष्टं भवति यत् बौद्धिकसम्पद् अधिकारिणे एव प्रदातव्या। यतो हि अधिकारी एव तद्सम्पदः सम्यक् संरक्षणमुपयोगञ्च कर्तुं शक्यते।

**2. 'कॉपीराइट्' इति बौद्धिकसम्पदधिकारनिर्णायकाः अनुक्रमणीग्रन्थाः-**

अधुना सम्पूर्णविश्वे बौद्धिकसम्पदधिकारसंरक्षणाय प्रमुखत्त्वेनोल्लेखः भवति 'कॉपीराइट्' इति। अनेनाधिकारेण कस्यापि रचयितुः मुख्यलेखकस्य वा बौद्धिकसम्पत्तेः परिरक्षणं क्रियते। अनेन मुख्यलेखकस्य रचनानाम् बौद्धिकसम्पदः अनुकरणस्य, अनुकरणपूर्वकप्रयोगस्य च निरोधः भवति। सामान्यतया लोके प्रायः अनुकरणस्य(कॉपी) त्रिधा प्रवृत्तिः दृश्यते। तत्राद्ये प्रकारे कस्यापि रचनाकारस्य बौद्धिकसम्पदः यथावत् अनुकरणं क्रियते। द्वितीयप्रकारान्तर्गतं कस्यापि रचनाकर्त्तुः बौद्धिकसम्पदः मिश्रितमनुकरणं क्रियते। अपरे तृतीये च प्रकारान्तर्गते रचनाकारविशेषस्य बौद्धिकसम्पदः अध्ययनं कृत्वा स्वानुगुणं प्रयोगः क्रियते। उपर्युक्तेषु त्रिषु प्रकारेषु तृतीयो प्रकारः ग्राह्यः उत्तमश्च। संस्कृतसाहित्यशास्त्रे आचार्यानन्दवर्धनः इमान् प्रकारत्रयान् प्रतिबिम्बवच्चित्राकारवत्तुल्यदेहीवद्रूपेण उपस्थापितवान् ध्वन्यालोके-

**संवादो ह्यन्यसा-दृश्यं तत्पुनः प्रतिबिम्बवत्।**
**आलेख्याकारवत्तुल्यदेहीवच्च शरीरिणाम्।।**[10]

वैदिकसाहित्ये तत्त्वज्ञानाम् ऋर्षीणां बौद्धिकसम्पदधिकारस्यानुकरणं संनिरोधाय तत्कृतबौद्धिकसम्पदधिकारसंरक्षणाय च अनुक्रमणीग्रन्थानामत्यन्त-महत्त्वपूर्णं योगदानमस्ति। प्रत्येकं ऋषिदृष्टमन्त्राणां बौद्धिकसम्पदधिकारस्य संरक्षणमनुक्रमणीग्रन्थेषु विद्यते। अस्माकं पूर्वजाः अनेन विषयेण परिचिताः अत एव ते बौद्धिकसम्पदधिकारस्यानुकरणं निरोधाय अनुक्रमणीग्रन्थान् अरचयन्। ऋक्सर्वानुक्रमणी यजुसर्वानुक्रमः ऋग्विधानम् इत्याद्यनुक्रमणीग्रन्थेषु

ऋषिदृष्टवेदमन्त्राणां संख्याः छन्दांसि देवतादयः संरक्षिताः सन्ति। वैदिकसंहितानिबद्धबौद्धिकसम्पदधिकारस्य परिरक्षणे अनुक्रमणीग्रन्थानां स्थानं सर्वोपरि वर्तते। बौद्धिकसम्पदधिकारसम्बन्धे मन्त्रद्रष्ट्रणाम् ऋषीणां बौद्धिकसम्पद्संरक्षणाय अनुक्रमणीग्रन्थानामद्वितीयस्थानमस्ति। एभिर्न केवलं मूलकर्तृ—कृतबौद्धिकसम्पदः संरक्षणं जातमपितु सम्पूर्णसाहित्यम् अद्यावधि समीचीनरूपेणापि उपलभ्यते। ऋग्वेदीयर्चां तत्कृषिदेवताच्छन्दादिनां बौद्धिकसम्पदः संरक्षणम् ऋग्वेदानुक्रमणीग्रन्थे विद्यते। तद्यथा-

**अथ ऋग्वेदाम्नाये शाकलके सूक्तप्रतीकऋक्संख्यऋषिदैवतच्छंदास्यनुक्रमिष्यामो यथोपदेशम्।**[11]

बौद्धिकसम्पद्संरक्षणाय यजुर्वेदीयसर्वानुक्रमसूत्रे यजुर्वेदसंहितायाः(अध्याय 1, मन्त्र 1-4) मन्त्राणाम् ऋषिदेवताच्छन्दादिनामाभिधानं प्राप्यते । तद्यथा -

**इषे त्वादि खं ब्रह्मान्तं विवस्वानपश्यत्। ततः प्रतिकर्मविभागेन ब्राह्मणानुसारेण ऋषयो वेदितव्याः, परमेष्ठी प्राजापत्यो दर्शपूर्णमासमन्त्राणां ऋषिर्देवा वा प्राजापत्याम्। इषे त्वा शाखाऽनुष्टुब् विनियोगः कल्पकारोक्त, एवमूर्जे त्वा वायवो वायव्यं, देवो व ऐन्द्रं, यजमानस्य शाखा, वसोर्वायव्यं, द्यौर्मातरिश्वन् उखा, वसोर्वायव्यं, देवस्त्वा पयः, कामधुक्षः प्रश्नः, सा विश्वायुस्त्रीणि गव्यानीन्द्रस्यैन्द्रं, विष्णो पयः।।**[12]

बौद्धिकसम्पदधिकारसंरक्षणाय अथर्वेदीयसंहितायाः प्रथममण्डलस्य प्रथमसूक्तस्य मन्त्राणामनुक्रमं बृहत्सर्वानुक्रमणिकाग्रन्थे द्रष्टुं शक्यते। तद्यथा-

**अथ सूक्तमन्त्राणामृषिदैवतच्छन्दांसि। तत्र प्रथमम् ये त्रिषप्ता इति त्रीणि (1, 1-3) सूक्तान्यानुष्टुभान्यथर्वाऽपश्यत्। पूर्वम् (1,1) वाचस्पत्यम्, द्वितीयम् (1,2) चान्द्रमसं पार्जन्यम्, तृतीयं (1,3) पर्जन्यमित्रादिबहुदेवत्यम्। पूर्वेण चतुर्ऋचेन वाचस्पतिमेवाऽस्तौद् वाचोऽभिवृद्ध्यै। द्वितीयेन चतुर्ऋचेनाऽमृतमयं पर्जन्यं स्वम् एवं चन्द्रमसं च। तृतीयेन नवर्चेन मन्त्रोक्तान् सर्वान् देवानिति। 4 उपहूतो वाचस्पतिरिति चतुष्पदा विराडुरोबृहती।**[13]

इत्थं विविधोदाहरणानि वैदिकसाहित्ये द्रष्टुं शक्यन्ते।

**3. भाष्यटीकादिरचनया बौद्धिकसम्पदधिकारसंरक्षणम्-** वैदिकभाष्य-परम्परायामनेके आचार्याः अभूवन् यैः वैदिकसाहित्यमाश्रित्य नैके भाष्यग्रन्थाः विलिखिताः। बौद्धिकसम्पदधिकारसंरक्षणायेयं भाष्यपरम्परा अतीव उपयोगिनी

वर्तते। संहितादिनिबद्धमन्त्राणामत्र यथावत् मूलं सुरक्षितं भवति। इमान् मन्त्रानेव स्वीकृत्याचार्याः भाष्यरचनायां प्रवृत्ताः भवन्ति। भाष्यकाराः तत्तदृषेः मन्त्रं तन्नाम्नैव स्वीकृत्य तस्य व्याख्यानं कुर्वन्ति। अनेन तस्य मन्त्रस्य मूलत्वमपि सुरक्षितं भवति आचार्यस्य च भाष्यकार्यमपि समीचीनतया सम्पन्नं भवति। वैदिकभाष्यकारेषु सायणाचार्यः स्कन्दस्वामी वेंकटमाधवः महीधरः माधवः दयानन्दसरस्वती उव्वटरित्यादयः प्रमुखाः सन्ति। एभिर्भाष्यकारैः स्वभाष्यग्रन्थेषु संहिताब्राह्मणादिमन्त्राणां समुल्लेखः कृतः। अनेनैषां मूलकर्तृतुः मूलांशस्य च स्वतः एव संरक्षणं जायते। स्कन्दस्वामी-वेंकटमाधव—कृतम् ऋक्संहिताभाष्यं बौद्धिकसम्पदधिकारसंरक्षणे महत्त्वपूर्णभूमिकां निर्वहति। अधोनिर्दिष्ट-ऋग्वेदीयमन्त्रस्य भाष्ये तथ्यमिदं प्रमाणितं सञ्जायते-

**ऋग्वेदीयमन्त्रः - अग्निर्होताकविक्रतुः सत्यश्चित्रश्रवस्तमः। देवोदेवेभिरागमत् ।।**

**मन्त्रस्य भाष्यम्- स्कन्दस्वामीयम् यथा- अग्निर्होता देवानाम्। कविक्रतुः। कविशब्दोऽत्र क्रान्तवचनः। न मेधाविनाम। क्रतुशब्दः प्रज्ञानाम कर्मनाम वा। क्रान्तं गतं सर्वत्राप्रतिहतं प्रज्ञानं कर्म वा यस्य स कविक्रतुः। सत्यः अभिसम्पादकः। यथाभिलषितफलद इत्यर्थः। चित्रश्रवस्तमः। चायृ पूजानिशामनयोरित्यस्य चित्रं पूजनीयम्। विचित्रपर्यायो वा चित्रशब्दः। श्रव इत्यन्ननाम वा, धननाम वा, कीर्त्तितपर्यायो वा। अतिशयेन पूज्यं विचित्रं वा अन्नादीनामन्यतमं यस्य स चित्रश्रवस्तमः। देवो दानादिगुणः। देवेभिः। सहयोगलक्षणा एषा तृतीया। देवैः सह। आगमत् आगच्छतु।**[14]

वेङ्कटमाधवीयम् यथा- अग्निर्होता। क्रान्तप्रज्ञः सत्यकर्मातिशयेनाश्चर्य-श्रवणो देवो देवैः सहागच्छतु।।

शौनकीयबृहद्देवतायां शौनकः मन्त्रदृष्टाणाम् ऋषीणाम् देवादीनाञ्च ऋग्वेदीयबौद्धिकसम्पद्संरक्षणाय ऋचां सम्यगर्थबोधनाय प्रत्यपादयत्-

**मन्त्रदृग्भ्यो नमस्कृत्वा समाम्नायानुपूर्वशः।**
**सूक्तगर्धर्चपादानाम् ऋग्भ्यो वक्ष्यामि दैवतम्।।**[15]

एवं प्रकारेण बौद्धिकसम्पदधिकारसंरक्षणदृष्ट्या आचार्याणां विभिन्नवैदिकभाष्यग्रन्थान् परवर्त्याचार्यप्रणीतटीकादिग्रन्थाञ्च द्रष्टुं शक्यन्ते।

**4. जटादिपाठद्वारा बौद्धिकसम्पदधिकारसंरक्षणम्-** वैदिकर्षयः वेदमन्त्राणां संरक्षणाय अष्टवि—कृतीनां रचनां —कृतवन्तः। जटा-माला-शिखा-रेखा-ध्वज-दण्ड- रथ-घनपाठानां ग्रहणं भवति अष्टविकृतौ। चरणव्यूहे तद्यथा-

**क्रमपारः क्रमपदः क्रमजटः क्रमदण्डश्चेति चतुष्पारायणम्।**

**जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः।**

**अष्टवि—कृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः।।**[16]

अष्टविकृतिपाठेन वैदिकमन्त्राः अद्यावधि यथावत् संरक्षिताः सन्ति। एदतरिच्य पदपाठ-क्रमपाठादयोऽपि समुपलभ्यन्ते वैदिकवाङ्मये।

5. **परवर्त्तिग्रन्थप्रमाणेन बौद्धिकसम्पदधिकारसंरक्षणम्-** बौद्धिक सम्पदधिकारं संरक्षणाय अयमन्यतमो विधिः वर्तते। अस्मिन् विधौ विविधाचार्याः स्वसिद्धान्तपोषणाय स्वमतमण्डनाय अन्यमतखण्डनाय च पूर्ववर्त्याचार्य-प्रतिपादितसिद्धान्तनाम् समुल्लेखं कुर्वन्ति। अस्मिन् विधौ विविधाचार्य—कृतरचनासु पूर्ववर्त्याचार्याणां रचनाकाराणां वा ग्रन्थस्य अथवा ग्रन्थप्रयुक्तस्य श्लोकस्य सिद्धान्तस्य रचनांशस्य वा उल्लेखः क्रियते। अत्र वर्तमानस्थः रचनाकारः तन्नाम्नैव अथवा तत्कृतप्रयोगेण तस्य मुख्याचार्यस्य प्रत्यक्षरूपेण परोक्षरूपेण वा उल्लेखं करोति। अनेन तस्य मूलकर्तुः रचनाकारस्य वा बौद्धिकसम्पदः स्वतः एव संरक्षणं भवति। बौद्धिकसम्पदधिकारसंरक्षण–दृष्ट्या सायणाचार्यः ऋग्वेदभाष्यभूमिकायां विविधवेदादिमन्त्राणां वेदाङ्गानां तन्निहितसिद्धान्तादीनाञ्च प्रतिपादनं स्वाभीष्टसिद्धये अकरोत्। तद्यथा-

वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा। तथा च तैत्तिरीयोपनिषदारम्भे समामनन्ति दृशीक्षां व्याख्यास्यामः। वर्णः स्वरः मात्रा बलं साम संतानः इत्युक्तः शीक्षाध्यायः (तै.उ.1.1) इति। वर्णोऽकारादिः स च अङ्गभूतशिक्षाग्रन्थे स्पष्टमुदीरितः –

**त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भूमते मताः।**

**प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा।।**[17]

वेदानां परिमाणविषये चरणव्यूहे वर्णितमस्ति-

**ऋचां दश सहस्राणि ऋचां पञ्चशतानि च।**

**ऋचामशीतिपादाश्चैतत्पारायणमुच्यते।।**

**द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके।**

**ऋग्गणः परिसङ्ख्यातं ततोऽन्यानि यजूंषि च।।**

**अष्टौ सामसहस्राणि सामानि च चतुर्दश।**

**अष्टौ शतानि नवतिदशतिर्बाल्यखिल्यकम्।।**

**सरहस्यं ससुपर्णं प्रेक्ष्यस्तत्र बाल्यखिल्याः।**

**सारण्यकानि सौर्य्याणि ह्येतद्सामगणं स्मृतम्।।**[18]

ऋग्वेदभाष्यभूमिकायां खण्डन-मण्डनप्रसंगे स्वमतपोषणाय ऋग्वेदीयमन्त्राणां प्रयोगः बौद्धिकसम्पदधिकारसंरक्षणं निश्चीयते। तद्यथा-

तत्र केचिदाहुः ऋग्वेदस्य प्राथम्येन सर्वत्राम्नातत्वात् अभ्यर्हितं पूर्वं इति न्यायेन अभ्यर्हितत्वात् तद्व्याख्यानमादौ युक्तम्। प्राथम्यं च पुरुषसूक्ते विस्पष्टम्-

**तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे।**

**छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत्।। (ऋग्वेद 10.90.9) इति।**

तस्मात् सहस्रशीर्षा पुरुषः (10.90.1) इत्युक्तात् परमेश्वरात्, यज्ञात् यजनीयात् पूजनीयात्। सर्वहुतः सर्वैर्हूयमानात्। यद्यपीन्द्रादयस्तत्र तत्र हूयन्ते तथापि परमेश्वरस्यैव इन्द्रादिरूपेणावस्थानादविरोधः। तथा च मन्त्रवर्णः-

**इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।**

**एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः।। (ऋ.सं.164.1.46) इति।**[19]

एवं प्रकारेण वैदिकसाहित्यं समाश्रित्य परवर्त्याचार्य—कृतरचनासु बौद्धिक- सम्पदधिकारविषयकाणि नैकानि उदाहरणानि दृश्यन्ते।

**6. 'पेटेन्ट्' इति निर्णयात्मकविनियोगविधिः-** वर्तमानकाले बौद्धिक-सम्पदधिकारसंरक्षणाय 'पेटेन्ट्' इत्यस्य प्रयोगः सर्वत्र दृश्यते। वर्तमानीयपेटेन्टविधौ कस्यचित् रचनाकारस्य आविष्कर्त्तुः वा नाम्नैव तत्कृताविष्कारस्य पंजीयनं भवति। तेनाविष्कृते वस्तुनि तस्यैव स्वामित्वं स्थापितं भवति। यदि आविष्कर्त्तारः एकाधिकाः स्यात् तर्हि सर्वेषां नामभिः तस्य वस्तुनः स्वामित्वाधिकारप्राप्तये पंजीयनं भवति। अनेन पंजीयनेन तेषां समेषां बौद्धिकसम्पदधिकारस्य संरक्षणं भवति। वैदिकवाङ्मये आधुनिकपेटेन्टवत् विनियोगविधिः बौद्धिकसम्पदधिकार-संरक्षणाय व्यवहारे प्रचलितासीत्। अनेन विनियोगविधिद्वारा मन्त्रद्रष्टॄणाम् ऋषीणां बौद्धिकसम्पदधिकारस्य पालनं परिपाल्यते। अस्य विधेरेव प्रभावात् अद्यावधि अक्षुण्णरूपेण ऋषीणां बौद्धिकसम्पदधिकारः सुरक्षितः वर्तते। अनेन विधिना मन्त्रस्य ऋषेः छन्दसः देवतायाश्चापि संरक्षणं भवति। कतिपयोदाहरणानि तद्यथा-

**पृथ्वीति मन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसनोपवेशने विनियोगः।**[20]

अपि च

**ॐ कारस्य ब्रह्मा ऋषिः गायत्री छन्दः परमात्मादेवता, भूर्भुवः स्वरितिमहाव्याहृतीनां परमेष्ठीप्रजापतिर्ऋषिः गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्निवायुसूर्यदेवताः, तत्सवितुरित्यस्य विश्वामित्र ऋषिः गायत्री छन्दः सविता देवता जपे विनियोगः।**[21]

इत्थं स्पष्टमेव वैदिकवाङ्मये बौद्धिकसम्पदधिकार–दृष्ट्या सर्वेषां मन्त्राणां ऋषिदेवताच्छन्दसां संरक्षणं विनियोगमाध्यमेन भवति।

7. **पुष्पिकावाक्यैः बौद्धिकसम्पदधिकारसंरक्षणम्-** आचार्याः स्वग्रन्थेषु पुष्पिकावाक्यमरचयन्। पुष्पिकावाक्ये ग्रन्थकर्तृतुः प्रतिपाद्यस्य च उल्लेखः भवति। अतः बौद्धिकसम्पदधिकारसंरक्षणाय पुष्पिकावाक्यानां महदवदानं प्रतीयते। यद्यपि भारतीयसंस्कृतौ प्रायः अधिकांशाः आचार्याः रचनाकाराः मन्त्रद्रष्टारः ऋषयश्च यशोभिलाषिणः न आसन्। स्वरचनाग्रन्थेषु प्रायः ते स्वपरिचयं न दत्तवन्तः। अत एव तेषां विषये परिज्ञानम् अन्यरचनाकार—कृतग्रन्थमाध्यमेन भवति। तथापि केचन आचार्याः तादृशाः अपि अभूवन् ये स्वबौद्धिकसम्पदधिकारसंरक्षणाय स्वविषये पुष्पिकावाक्यमाध्यमेन यत्किञ्चित् यत्र-तत्र उल्लेखं कृतवन्तः। ऋक्संहिता- भाष्यकारौ स्कन्दस्वामी माधवश्च स्वबौद्धिकसम्पदधिकारं परिरक्षणाय पुष्पिकावाक्यमाध्यमेन स्वनामोल्लेखम् अकुरुताम्। तद्यथा-

**वल्लभीविनिवास्येतामृगर्थागमसंहृतिम्।**
**भर्तृध्रुवसुतश्चक्रे स्कन्दस्वामी यथास्मृति।।**
**ऋक्संहितायाः प्रथममध्यायं व्याकरोदिति।**
**कुशिकानां कुले जातो माधवः सुन्दरीसुतः।।**[22]

एवं प्रकारेण स्वबौद्धिकसम्पदधिकारसंरक्षणाय स्वस्वामित्वस्थापनाय च नैकेः आचार्याः पुष्पिकावाक्यानां प्रयोगं कुर्वन्ति स्म।

8. **गुरुशिष्यज्ञानपरम्परया बौद्धिकसम्पदधिकारसंरक्षणम्-** प्राचीन ज्ञान-विज्ञानपरम्परायाः अद्यावधि अनवरतरूपेण उपलब्धतायाः मूलास्ति केवलं गुरुशिष्यपरम्परा। अनया गुरुशिष्यपरम्परयैव सर्वं प्राचीनं ज्ञानम् बौद्धिकसम्पच्च अधुनापि मूलस्वरूपे उपलभ्यते। श्रुतिपरम्परायाम् अद्यापि अस्याः परिपालनं जायमानं दरीदृश्यते। वैदिकसाहित्ये अस्याः परम्परायाः बहून्युदारहणानि विद्यन्ते। मुण्डकोपनिषदि गुरुशिष्यपरम्परया ब्रह्मा स्वपुत्राय अथर्वाय ब्रह्मविद्यासम्बन्धिज्ञानं

दत्तवान् ततः अथर्वः अङ्गीऋषये, सः अङ्गी भारद्वाजाय सत्यवहाय, असौ सत्यवाहः अङ्गिरे ताम् विद्यां प्रायच्छत्-

**ॐ ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य कर्त्ता भुवनस्य गोप्ता।**
**स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह।।**
**अथर्वणे यां प्रवदेत् ब्रह्माथर्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्याम्।**
**स भारद्वाजाय सत्यवहाय प्राह भारद्वाजोऽङ्गिरसे परावराम्।।**[23]

भारतीयसंस्कृतौ गुरु-शिष्यपरम्परा अतिङ्कसिद्धा सार्वकालिकोपयोगिनी च। बौद्धिकसम्पदधिकार-दृष्ट्या इयं परम्परा सततं वैदिकसाहित्यस्य संरक्षणं कुर्वत्यस्ति ।

**9. वैदिकस्वरप्रक्रियया बौद्धिकसम्पदधिकारसंरक्षणम्-** बौद्धिकसम्पदधिकार-संरक्षणाय वैदिकसाहित्ये प्रत्येकं वेदस्य मन्त्राणां उच्चारणाय पृथक्-पृथक् स्वरप्रक्रिया वर्तते। वेदार्थं सम्यक्तयावगमनाय इयं स्वरप्रक्रिया अन्यतमास्ति। वैदिकबौद्धिकसम्पदं समीचीनरूपेण अवगन्तुम् उदात्तानुदात्तस्वरितस्वराणां प्रयोगः भवति। एतेषां स्वराणां प्रयोगेण वैदिकमन्त्राणां सम्यक् अर्थस्य निर्धारणं जायते। वेदार्थरूपबौद्धिकसम्पदधिकारसंरक्षणाय वैदिकस्वरप्रक्रियायाः प्रयोगोऽअपेक्षितः। अतएव वैदिकसाहित्ये एतेषां स्वराणामन्यतमं महत्त्वं वर्तते। तत्र एकस्मिन् स्वरे परिवर्तने सति मन्त्रस्य अर्थपरिवर्तनं स्वतः एव भवति। अस्मिन् सन्दर्भे महाभाष्ये प्रसिद्धमेवास्ति-

**दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाहुः।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।**[24]

एवं प्रकारेण अन्येष्वपि ग्रन्थेषु एता–दृशानि उदाहरणानि द्रष्टुं शक्यन्ते।

वर्तमाने बौद्धिकसम्पदः यत्स्वरूपं दृश्यते तन्मूलं वेदेषु एव विद्यते। वेदेषु विविधोपबन्धैरस्याधिकारस्य संरक्षणं विहितम्। लौकिकसाहित्येऽपि आचार्यैः अधिकारमेतं संरक्षणाय विविधनियमानामुल्लेखः कृतः। वस्तुतः कस्यापि रचनाकारस्य बौद्धिकसम्पदधिकारस्य संरक्षणस्य उत्तरदायित्वं सर्वकारेण समम् विदुषामपि भवति। अस्य चौरः शासनेन दण्डितस्तु भवत्येव सहैव विद्वत्स्वपि निन्दनीयः उपेक्षणीयः त्याज्यश्च भवति। वैदिकसाहित्ये आचार्याः विनियोगविधिना भाष्यरचनया टीकया अन्याचार्यप्रणीतग्रन्थोल्लेखनेन अनुक्रमणीरचनया अष्टविकृतिपाठेन इत्यादिभिः विविधोपायैरस्य संरक्षणाय प्रयासं कृतवन्तः।

अनेनाधिकारेण बौद्धिकचौर्यप्रवृत्तौ अङ्कुशः जायते अथ च रचनाकारस्य मौलिकतायाः संरक्षणमपि भवति। लौकिकसाहित्ये आनन्दवर्धनराजशेखरप्रभृतयः आचार्याः बौद्धिकसम्पदधिकारसंरक्षणाय स्वग्रन्थेषु विविधसिद्धान्तादीनां प्रतिपादनं कृतवन्तः। रचनाकारमौलिकतासंरक्षणाय, चौर्यप्रवृत्त्यवरोधनाय, ग्रन्थदुरुपयोग-संरोधनाय, शास्त्रगतमूलार्थपरिरक्षणाय चायमधिकारोऽत्यन्तमुपकारकोऽस्ति। वर्तमाने बौद्धिकसम्पदधिकारसंरक्षणाय प्रचलितानां 'कॉपीराइट्' 'पेटेन्ट्' इत्याद्यधिकाराणां मूलं वैदिकसाहित्यमेव। विश्वसाहित्यस्य सर्वप्राचीनाः ग्रन्थाः वेदाः इति प्रमाणितमेवास्ति। सर्वप्रथमं वैदिकसाहित्ये एव बौद्धिकसम्पदधिकारविषयकाः विविधोपायाः सिद्धान्ताः उपबन्धाश्च विविधमाध्यमेन दृश्यन्ते। अत एव स्पष्टं जायते सम्पूर्णविश्वसाहित्यस्य बौद्धिकसम्पदधिकारस्य मूलं वेदेषु एव इति।

**सन्दर्भ**


1. *महाभाष्यम्- पस्पशाह्निक पृष्ठ 35*
2. *रघुवंशम्- 1.64*
3. *किरातार्जुनीयम्- 5.24*
4. *हितोपदेश- प्रस्ताविका श्लोक 4*
5. *ब्रह्मनित्यकर्मसमुच्चयः (श्रीसूक्तम्)- पृष्ठ 476*
6. *ऋग्वेदभाष्यभूमिका- पृष्ठ 138-141*
7. *मनुस्मृति- 2.112-115*
8. *ब्रह्मनित्यकर्मसमुच्चयः(गणपति-अथर्वशीर्ष)- पृष्ठ 473*
9. *श्वेताश्वतरोपनिषद्- 6.22-23*
10. *ध्वन्यालोक- 4.12*
11. *ऋग्वेद-सर्वानुक्रमणी- पृष्ठ 1*
12. *यजुसर्वानुक्रमसूत्रम्- पृष्ठ 1-2*
13. *अथर्ववेदीयबृहत्सर्वानुक्रमणिका- पृष्ठ 3*
14. *ऋक्संहिता (स्कन्दस्वामीयम्-वेङ्कटमाधवार्यव्याख्यानोपेता)- पृष्ठ 7-8*
15. *शौनकीय बृहद्देवता -(1.1)*
16. *चरणव्यूह- पृष्ठ 7*

17. *ऋग्वेदभाष्यभूमिका- पृष्ठ 117*

18. *चरणव्यूह- पृष्ठ17, 31, 43*

19. *ऋग्वेदभाष्यभूमिका- पृष्ठ 2*

20. *कर्मठगुरुः(सन्ध्याप्रकरण)- पृष्ठ 11*

21. *नित्यकर्मपूजाप्रकाश(सन्ध्याप्रकरण)- 74*

22. *ऋक्संहिता- पृष्ठ 133 (के. साम्बशिवशास्त्रि)*

23. *ईशादि नौ उपनिषद्(हरिकृष्ण गोयन्दका)- मुण्डकोपनिषद्- 1.1-2*

24. *महाभाष्यम्- पृष्ठ 7-8*

●●●

# 3

# वाल्मीकिरामायणे जनाजातीयानां परिचयः

*एम. किशनः, उमाशंकरः च*

'हिरण्यगर्भः समवर्तताग्रे' इत्यादि वेदमन्त्रैः ब्रह्मण आरभ्य सर्वेषां लोकानां सृष्टि र्बभूव। हिरण्यगर्भ एव सर्वां सृष्टिं कृतवान्इत्यपि वेदपुराणेषु यद्यपि दृश्यते तथापि सृष्टिः कस्मादागता की–दृशीआसीत्? प्राणिनां प्रवृत्तिश्च कथमासीदिति इदमित्थ मितिकोपि न जानाति इति वेदेष्वेव स्पष्टम्।

**इयं विसृष्टिर्यत आबभूव यदि वादधे यदि वा न।**

**यो अस्याध्यक्षः परमे व्योमन्त्सो अंग वेद यदि वा नवेद।।**[1]

किन्तु वेद-पुराणेभ्यः एवसृष्टेः प्राणिनां च स्वरूपं स्वाभावादिकं मानसिक प्रवृत्तिः सम्प्रदाया अवगताः भवन्त्येव।

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः इति मनुष्येषु चातुर्वर्ण्य-विभागः भगवता प्राक्सृष्टः अद्यापि अवशिष्टः वर्तते। किन्तु चातुर्वर्ण्यात्भिन्नानां जातीनां कानिचन नामानि वेदपुराणेषु अकृष्टानि अद्यैव श्रूयन्ते। अनुसूचित-वर्गीया आदिवासिनः इत्यादि पृथग्वि भागोपि अद्यतन काले एव दृष्टः। तत्र चण्डालमृत पादयः चर्मकारादयश्च अनुसूचित कुलान्तर्गताः ज्ञातपूर्वाः एव। किन्तु आदिवासी शब्दः कुत्र कथंवा उत्पन्नः व्यवहृत इति नेजानीमः। अद्यतनकाले अरण्य प्रान्तवासिनः- वनेचराः- आटविकाश्च आदिवासिशब्देन व्यवहृताः। तेषां प्रवृत्तिः नागरिकप्रवृत्तेर्भिन्नाः, स्वभावः क्रूरतरः केवलं मृगया परायणाः विद्यागन्धहीनाः इति दुरभिप्रायोऽपिलोके रूढः।

संस्कृवाङ्मये एवंविधा आदिवासिनः मृदुस्वभावाः शास्त्रज्ञः तपस्विनः ऋजुवर्तनाश्च आसन्। ततः आदिवासी शब्दः नकुलवाचको जाति वाचको वा किन्तु तस्य निवाससूचकः इति प्राचीनानाम् अभिप्रायः। श्रीमद्रामायणे एवंविधाः नानाजातयः आदिवासिनः वर्णिताः। प्रथमं आदिवासी शब्दार्थः ईषद्विवेचनीयः।

आदिवासीशब्दार्थः- आ- प्रथमं दीयते गृह्यते इत्यादिः आङ्पूर्वकात्दा- धातोः उपसर्गे घोः किः[2] इति कि प्रत्यये आदिः इति रूपम् । प्रथममंगी कृतमित्यर्थः ।[3] पुंस्यादिः पूर्व पौरस्त्य-प्रथमायाः[4] सृष्ट्यादौ मुख्यसर्गेवृक्षाः तद्भूयिष्ठाश्च देशा अरण्यप्रायाः भूलोके आसन् । ततः आदि शब्दः प्रथमार्थकः । वसतीतिवासी- वसनिवासे इति धातोः निष्पन्नं रूपम्, वनवासीति । अरण्येवासोयस्यइत्यर्थः । एवं ब्राह्मणादिषु सर्वेजातयः भवन्त्येतातैः सह इतरेमृगाः राक्षसादयोपि अरण्ये वासं कुर्वन्ति स्म वनेचराः । श्रीमद्रामायणे स्वभाव तया केचन अरण्यवासिनः प्रशान्त-जीवनाय जनपदेभ्यः अरण्यं गताश्च वर्तन्ते जनजातीति । सर्वेषु काण्डेषु श्रीमद्रामायणे एवं विधाः बहवो–दृश्यन्ते ।

**रामायणेआदिवासिनः-**

| काण्डम् | वर्णनम् |
|---|---|
| बालकाण्डे | ऋष्यशृंगः |
| अयोध्याकाण्डे | श्रवणकुमारः,गुहः |
| अरण्यकाण्डे | शरभंगः,<br>सुतीक्ष्णः भरद्वाजः अगस्त्यादयः मुनीन्द्राः । निसर्गतयादुष्टा अपिकालप्रभावेणपरिवृत्तिंप्राप्तवन्तः मारीचादयः ।<br>बाल्यादारभ्यअरण्येजाताःशबरीङ्कभृतयोवर्णिताः । |
| किष्किन्धाकाण्डे | पाक्षिकनरप्रवृत्तिमन्तः एकदेशेनपशुप्रवृत्तयः वालिः, सुग्रीवः, हनुमान,नील प्रभृतयः वर्णिताः । |
| सुन्दरकाण्डे | रावणादयः नागरकाः अपिआटविकाः इवनृशंसप्रवृत्तयः दृष्टाः । |
| युद्धकाण्डे | रावणादयः एवपुनः वर्णिताः । |
| उत्तरकाण्डे | प्रारब्ध कर्मणा प्राप्त वनवासाः रावण कुम्भकर्ण विभीषणादयः वर्णिताः । |

एवं श्रीमद्रामायणे वर्णिताः आदिवासिनः उभयलिंगाः सार्ववर्णिकाश्च वर्तन्ते । तेषां भाषा सम्प्रदायः, स्वभावः, मानसिक-प्रवृत्तिश्च केषांचित्नागरकानुकूला केषां चित्केवलारण्यकी वर्णिता ।

**बालकाण्डे-**

ऋष्यशृंगः-

बालकाण्डे प्रथमतया दृष्टः ऋष्यशंगः। ऋष्यशृंगः जन्मना ब्राह्मणः किन्तु पिता विभाण्डकः वनवासी इति हेतोःसोऽपि आदिवासी बभूव। आदिवासिनः अमायिकाः परवंचनानभिज्ञाः नागरक-वस्तु-दर्शने कुतूहलिनः इति ऋष्यशंग-पात्र-चित्रणे वाल्मीकेः अभिप्रायः स्पष्टः।

ऋष्यशृंगः वेदाध्ययनात्व्यापारान्तरं न जानाति। अंगराज्ञाप्रेषिताः स्त्रियः दृष्ट्वा ऋष्यशृंगः तासा वंचनां स्वाभावादिकंन ज्ञातवान्इतिमायानभिज्ञत्वं तस्य तस्य स्पष्टम्।

**पिताविभाण्डकोऽस्माकं तस्याहंसुतऔरसः।**
**ऋष्यशृङ्गइति ख्यातं नामकर्म च मे भुवि।।**
**इहाश्रमपदोऽस्माकं समीपे शुभदर्शनाः।**
**करिष्ये वोऽत्रपूजांवै सर्वेषां विधिपूर्वकम्।।**[5]

**अहल्या-**

अहल्या जात्या ब्रह्मणा सृष्टा इति ब्राह्मणी। गौतमस्य पत्नी इति हेतोःकुलीनापि अभूत्। तपस्विनः पत्नी भूत्वापि सा दुर्मतिरासीत्। आदिवासिनां सहज स्वभावः, सच्छीलतागन्धः तस्यां न दृष्टः। यदा इन्द्रः तां रत्यै आजुहावत दासा पत्येद्रोहं कृतवती इति तस्याः स्वभावं वाल्मीकिः स्पष्टतया वर्णितवान्।

**मुनिवेषं सहस्राक्षं विभाय रघुनन्दन।**
**मतिं चकारदुर्मेधादेवराजकुतूहलात्।।**[6]

**अयोध्याकाण्डे-**

**(क) श्रवणकुमारः-** रामप्रव्रजनानन्तरं दशरथः पुत्र-वियोग हेतुकं शापं विवृण्वन्स्वकृतं पापं कौसल्यामुक्तवान्। तदानीं पितृभक्तः कश्चन मुनि पुत्रः मयाहतस्तदा तस्य पितृभ्यामहम् एवं शप्त इति वदति। तत्र आदिवासिनां जीवयात्रप्रकारः, आदिवासिनां सृष्ट्यन्तर-जातित्वं च वर्णितम्। दशरथेन हतः कुमारकरणः। शूद्रायां वैश्यात्जातः करणः अरण्ये मधुविक्रमादिना तज्जातीयाः जीवनं यापयन्तीति गोविन्दराजीये स्पष्टम्।

**नद्विजातिरहंराजन्माभूत्तेमनसोव्यथा।**
**शूद्रायामस्मिवैश्येनजातो नरवराधिप।।**[7]

**(ख) गुहः-**

श्रीमद्रामायणे आदिवासिषु साधारण-जनेषु परिपालनादक्षः मृदुस्वभावः आतिथेयः भक्तश्च वर्णितः। सोऽपि गङ्गा तीरे अरण्ये आदिवासी राजा अभूत्। निषादराजः इति स्पष्टमुपवर्णितः। एवमद्यतनः व्यवहारेऽपि स आदिवासी भवति। अयोध्यायाः अरण्यं प्रस्थितः रामः प्रथमां रात्रिं गुह-निवासे उषितवान्। गुहनिवासश्च वृक्षप्राय आसीत्। निर्गतरामे यदा भरतः रामम् अन्विष्यन्गुह निवासमागतवान्तदा गुहः सरामाय– ह्यति इति भ्रान्त्या अभियोद्धुमागतः। ततः आटविक अपि आदिवासी नागरकान्अभियोद्धुं शक्तरूइतिज्ञायते। प्रथमं समपरिरक्षणे कृतनिश्चयः गुहः राममहं रक्षितुं समर्थः इति लक्ष्मणं वदति। अपि चायम् आदिवासी अपि सत्यनिष्ठः, धर्मार्थ-काम-परायण इति तत्र स्थैर्गुहवाक्यैः स्पष्टमव गम्यते।

**अस्यप्रसादादाशंसेलोकेऽस्मिन्सुमहद्यशः।**
**धर्मावाप्तिंचविपुलामर्थकामौचपुष्कलौ।।**
**सोऽहंप्रियसखंरामंशयानंसहसीतया।**
**रक्षिष्यामिधनुष्पाणिः सर्वथाज्ञातिभिः सह।।**
**नमेस्त्यविदिनंकिञ्चिद्वनेऽस्मिंश्चरतः सदा।**
**चतुरङ्गंह्यतिबलंसुमहत्सन्तरेमहि।।**[8]

**आदिवासिनां सम्प्रदायाः-**

अयोध्याकाण्डे एव आदिवासिनः वानप्रस्थाः वैष्वानासाः।श्च आचार व्यवहारैः बभूवुरिति रामः निश्चयेन अवगम्यते। तत्रस्थाः ब्राह्मणः नखरूपाः बालरूपाश्चेति तत्र आदिवासिनः नाम्ना वैखानसाः बालखिल्याश्च बभूवुः। एतेवन्याहाराः न्यग्रोधक्षीरेण लिप्तजटाः इति राम वाक्यै रेवगम्यते। वनवासिनां धर्माश्च तिलकटीकायां गोविन्द राजीयं च विस्तरेण वर्णिताः। तदानीं सीतारामलक्ष्मणाः अपि वनवास काले आदिवासिनां लक्ष्मण सम्पन्नाः बभूवुः।

**ततोवैखानसं मार्गमास्थितः सहलक्ष्मणः।**
**व्रतमादिष्टवा न्रामः सहायंगुहम ब्रवीत्।।**[9]

चित्रकूटे भरताय पादुके दत्वा रामः दण्डकारण्यात्प्रस्थितः आदिवासि लक्षण सम्पन्नान्बहून्मुनीन् दृष्टवान्।

**अरण्यकाण्डे- शरभंगः-**

आदिवासिनाम् आहारनियमाः शरभंगाश्रमात्प्रस्थितानां रामादीनां सुतीक्ष्णा श्रमगमनकाले दृष्टानाम् आदिवासिनां वर्णनमनुसृत्य ज्ञातुं शक्यन्ते। केचन लब्धान् आहारपदार्थन् अपक्तानेवदन्तैः चूर्णीकृत्य भुञ्जते। केचनअश्मभिः चूर्णीकृत्य भुञ्जते एवं सलिलेन पत्र भक्षणेन च तेषां जीवन यात्रा याप्यते। अद्यापि आदिवासिनः मूलानि अभ्यव हरन्ति।

**वैखानसाः बालखिल्याः संप्रक्षालामरीचिपाः।**
**अश्मकुट्टाश्च बहवः पत्रदाहाराश्चतापसाः।।**
**दन्तोलूखलिनश्चौवतथैर्वान्मज्जकाः परे।**
**गात्रशय्याअशय्याश्चतथैवानवकाशिकाः।।**[10]

**मारीचः-** जन्मना वनेजातः राक्षसोपिमारीचः यागरक्षणकालेरामबाणहतः वनवासी आदिवासिनाम् उचितैः आहार-आहार्यादिभिः शान्तवर्तनो बभूव। अरण्य-काण्डे रावणेन दृष्टः मारीचः परम-धार्मिको वर्णितः।

**तत्र—कृष्णाजिन धरंजटा मण्डलधारिणम्।**
**ददर्श नियताहारं मारीचंनाम राक्षसम्।।**
**स रावणः समागम्य विधिवत्तेन रक्षसा।**
**मारीचेनार्चितो राजा सर्वकामैरमानुषैः।।**
**तं स्वयं पूजयित्वाच भोजने नोदकेन च।**
**अर्थोपहितया वाचा मारीचोवाक्यमब्रवीत्।।**[11]

**(ग) शबरी-** अरण्यकाण्डे एव चतुःसप्ततितमे सर्गे वनवासिनी शबरी आदिवासिनी, गुरुभक्ताकबन्धोप देशेन एवरा मेण दृष्टा। मतंगस्यम हर्षेः ब्रह्मलोकगमनानन्तरं सा तपस्विनी भूत्वा रामागमनं प्रतिपालयति इति विस्तरेण वर्णितम्। तद्वर्णनात्मकेषु षष्ट्यधिकेषु श्लोकेषु सत्स्वपितद्वर्तनादिनि रूपकाः द्वित्रः उदाह्रियन्ते-

**इयं प्रत्यवस्थली वेदीयत्रतेमेसुसत् कृताः।**
**पुष्पोपहारं कुर्वन्ति श्रमादुद्वेपिभिःकरैः।।**
**तेषांतपः प्रभावेणपश्चाद्यापिरघूत्तम।**
**द्योतयन्तीदिशः सर्वाः श्रियावेद्यतुलप्रभा।।**[12]

**किष्किन्धाकाण्डे-**

किष्किन्धाकाण्डे बहवो वनचराः आदिवासिनां लक्षणैः युक्ताः वानराः

वर्णिताः। वा इति विकल्पार्थकः ते एक देशेन वर्तनेन मनुष्य लक्षणवन्तः तेषां शेन पशु-लक्षण-युक्ताः इति तद्वर्णनेभ्यः अवगम्यन्ते। मनुष्याणामिव आहारः, विवाहः, अलंकाराः राज्यपालादिकं वानराणा मपि वर्णितम्। एवम् आयुधधरैः तैः संग्रामोपि आचरितः देवपूजा तत्पराश्च आसन्। तेषु केषाञ्चन स्वभावादिकं निरूप्यते। -

(क) वाली- अयमिन्द्र पुत्रः सुग्रीवस्य ज्यायान्भ्राता। बालि सुग्रीवौ एकस्याः मातुः पितृद्वयात्जातौ। एतेन आदिवासिषु स्त्रीणां पुरुषाणां वा एक निष्ठतानासीदिति अवगम्यते। बाली किष्किन्धा राज्यस्य राजा बभूव। किष्किन्धा शब्द एव सर्व-वस्तु-समृद्धि निरूपिकः। किं किं न धीयते अस्यामिति किष्किन्धा। कस्काकदिषुच[13] इति सूत्रे गणे पठितस्य किष्किन्धा शब्दस्य एषोऽर्थः व्याख्यासु दर्शितः। बलवान् बाली शिवभक्तोऽपि इति उत्तरकाण्डे वर्णितः। चतुःसमुद्रेषु स्नातः सरूतैः जलैः शिवाभिषेकं प्रत्यहं करोति इति उत्तरकाण्डे दृश्यते।

**चतुर्भ्र्योपिसमुद्रेभ्यः संध्यामन्वास्यरावण।**
**इदं मुहूर्तमायाति बाली तिष्ठमुहूर्तकम्।।**[14]

एवं सर्वलक्षण-युक्तोऽपि सुग्रीवभार्या हरणेन पापाचारः सःरामेणवध्योऽभूदिति किष्किन्धा काण्डे एव स्पष्टम्।

**सुग्रीवः-** बालिनः कनीयान्भ्राता मनुष्यस्यैवतस्य विवाहोपि अभूत्। रुमानाम्नी तस्य पत्नी। प्रथमं स बालिनः भक्तः तस्मिन्विधेयश्चासीत्। बाली दुन्दुभि नामकेन राक्षसेन युध्यन्भूविवरः प्रविष्टः। किन्तु बहूनि दिनानिःसःन पुनरागतः महत्याशिलया तत्विवरं पिधाय सुग्रीवः किष्किन्धां प्रतिनिवृत्तः अभिषिक्तो बभूव। अत्रैव आदिवासिनां विचित्रचारः रामायणे वर्णितः। ज्येष्ठे भ्रातरि हते तद्भार्यांतारामपि सुग्रीवः पुनः ऊढवान्। एवम् अन्य-दारा-परिग्रहः आदिवासिंषु न निषिद्धः ज्ञायते। आदिवासि नामपि नागरकाणामिव भोगाः भवन्ति इति लक्ष्मणेन दृष्टस्य सुग्रीवान्तः पुरवर्णनेन स्पष्टी भवति।

**हनुमान्-** वायुनन्दनोऽयं महद्-बल-सम्पन्न-गुरोः सूर्यस्य आदेशेन सुग्रीवस्य मन्त्री बभूव। नष्टराज्येपि सुग्रीवेतमेव सेवितवान्। बालिनः रावणादपि शक्तिमान् हनुमान् इति उत्तरकाण्डे (32सर्गे) स्पष्टम्। कैरपि ज्ञापितबलः एव हनुमान्विक्रमणे प्रभवति इति हेतोः प्रथममेव बालिनंतन पराजितवान्। आदिवासिनोपि हनूमतः महत्त्वं किष्किन्धाकाण्डे हनुमत्-प्रथम-दर्शने रामेणैवं बहुधा वर्णितम्। संस्कृत-भाषा,

स्पष्टा वाक्, वाक्चातुर्यम्, उत्तमदूतत्वं, श्रेष्ठमन्त्रित्वं प्रसन्न-दर्शनीय-मुखत्वं इत्यादीनि बहूनि सल्लक्षणानि हनुमति रामेण दृष्टानि।

**संस्कारक्रमसंपन्नामद्भुतामविलम्बिताम्।**
**उच्चारयतिकल्याणीं वाचं हृदयहारिणीम्।।**
**एवंविधे यस्य दूतोन भवेत्पार्थिवस्यतु।**
**सिध्यन्ति हि कथं तस्य कार्याणां गतयोऽनघ।।**
**अविस्तरमसंदिग्धमविलम्बितमव्यथम्।**
**उरःस्थंकण्ठगंवाक्यं वर्ततेमध्यमस्वरम्।।**
**एवं गुणगणैर्युक्तायस्यस्युःकार्यसाधकाः।**
**तस्य सिध्यन्ति सर्वेऽर्थादूतवाक्यप्रचोदिताः।।**[15]

**सुन्दरकाण्डे-**

रावणकुम्भगर्णविभीषणाः एते राक्षसयोनिजाः स्वपराक्रमेण कुबेरं विजित्य रावणः लंकामाक्रान्तवान्इति हेतोः नागरकाः बभूवुः। सर्वाणि तस्य ऐश्वर्य व्यञ्जका निवर्णनानि सुन्दरकाण्डे बहुधा वर्णितानि। लंकाप्राप्तेः प्राक्ते वनचारिणः आदिवासिनश्च बभूवुः। ब्राह्मणः प्राप्तवराः अपि ते स्वनिवासस्थानं श्लेष्मातक वनमेव ययुः।

**एवं लब्धवराः सर्वे भ्रातरो दीप्ततेजसः।**
**श्लेष्मातकवनं गत्वा तत्र ते न्यवसन्सुखम्।।**[16]

**युद्धकाण्डे-**

नलनीलौ- युद्धकाण्डे वानरौ नलनीलौ विशेष गुणयुक्तौ वर्णितौ नलोनामकः वानरः अग्नेः पुत्रः। सः बाल्ये स्वेच्छाचारी मुनीनां वस्तु विध्वंसकश्चासीत्। तदा कुपितैः मुनिभिस्तेनयद्वस्तुजले पात्यते तन्न जलमग्नं भवति किन्तु प्लवते इति तमशपन्। स शापः एव सेतु-निर्माण-काले वरं बभूव। नलः सेतुबन्धने समर्थः इति समुद्रः एव रामं सूचितवान्वस्तुतस्तुजलेपिप्लवन-शीलानां शिलानां तत्त्वं नलएववेत्ति इति अद्यतन-कालेपि रामेश्वरे उपलब्धानां शिलाशेषाणां दर्शनेन स्पष्टं भवति। एवं नीलः सेतोराकृति-निर्माणे समर्थः स्यात्।

**7.उत्तरकाण्डे-**

उत्तरकाण्डे ब्रह्मणः प्राप्तवराः रावणकुम्भकर्णविभीषणाः तपसः अनन्तरं श्लेष्मातकवनं गत्वा तत्र सुखम् ऊषुः इति दृश्यते। ''एवं लब्धवराः सर्वे श्लेष्मातकवनं......न्यवसन्सुखम्।।''[17]

उपर्युक्त-श्लोकानुसारेण स्पष्टं ज्ञायते । बालकाण्डे रामायणरचनाय ब्रह्मणा आदिष्टः वाल्मिकिरेव पुनर्वर्णितः। रामेण वने परित्यक्तां सीतां वाल्मिकिरेव स्वाश्रमं नीत्वा ररक्ष।

श्रीमद्रामायणे वनचारिणां लक्षण-वर्णनेन तत्काले वर्तमानानाम् आदिवासिनां भाषा, आहारः, आहार्यम्, साधकजीवनम्, शीलम्इत्यादयः स्पष्टमव गन्तुंशक्यते।।

**संदर्भ :**


1. *नासदीयसूक्तम्-7 मन्त्र*
2. *अ.3-3-12*
3. *अमरकोशः, 3-1-80 रामाश्रमी व्याख्या*
4. *अमरकोशः3-1-80*
5. *श्रीमद्रामायणम्- बालकाण्डे-10/14,15 श्लोकः 115*
6. *श्रीमद्रामायणे बालकाण्डे 48-19*
7. *श्रीमद्रामायणे अयोध्याकाण्डे 63-51*
8. *श्रीमद्रामायणे अयोध्याकाण्डे 51-5-7*
9. *श्रीमद्रामायणे अयोध्याकाण्डे 52-71*
10. *श्रीमद्रामायणे अरण्यकाण्डे 6-2-3*
11. *श्रीमद्रामायणे अरण्यकाण्डे 35-38-40*
12. *श्रीमद्रामायणे अरण्यकाण्डे 74-23-24*
13. *पा.अ. 8-3-48*
14. *श्रीमदरामायणम् -उत्तरकाण्डे 34-6*
15. *श्रीमद्रामायणम् किष्किन्धाकाण्डे 3-31,35*
16. *श्रीमद्रामायणम् उत्तरकाण्डे-10-49*
17. *श्रीमद्रामायणम् उत्तरकाण्डे-10-49*


●●●

# 4

# महाभारत-ग्रन्थे मानवाधिकारः

*सुधा श्रीवास्तवः*

**धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।।**

मनुष्यजीवनं सप्रयोजनं सोद्देश्यं च मत्वा तत् सार्थकं कर्तु सर्वाः उपलब्धीश्चतुर्षु वर्गेषु विभज्य संस्कृतशास्त्रकारैः मनीषिभिः पुरुषार्थ-चतुष्टयस्य धर्मार्थकाममोक्षरूपस्य संकल्पना कृता। अत्र जीवने कृतानां कर्मणां योजनाबद्धता वर्तते। येन मानवेन एते सर्वेऽपि साधिताः तस्य जीवनं सर्वथा सार्थकम्। येन एकोऽपि न साधितः तस्य जीवनं तु अतितरां निरर्थकम्। यथोक्तम् नीतिशास्त्रे एवं च काव्यप्रकाशानुसारे -

**धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते।**
**अजागलस्तस्येव तस्य जन्मनिरर्थकम्।।**[1]
**प्रयोजनं अनुदृश्य मन्दोऽपि न प्रवर्तते।।**

महर्षिणा वेदव्यासेन अर्थनीति-राजनीति-धर्मनीतिप्रभृतीनां तत्त्वज्ञानं विश्वकोषरूपेण महाभारतं ग्रन्थरत्नं विविधैराख्यानैः प्रतिपादितमस्ति। वेदव्यासेन स्पष्टमुक्तम् -

**न जातु कामान्न भयान्न लोभात्**
**धर्मं त्यजेज्जीवितस्यापि हेतोः।**
**धर्मो नित्यः सुखदुःखे त्वनित्ये**
**जीवो नित्यो हेतुरस्य त्वनित्यः।।**[2]

महाभारते—वेदव्यासो ब्रवीति -

**ऊर्ध्वबाहुविरौम्येष न च कश्चित् श्रृणोति मे।**
**धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते।।**[3]

महाभारतस्य आदिपर्वणि उक्तमस्ति -

**अर्थशास्त्रमिदं प्रोक्तम् धर्मशास्त्रमिदं महत्।**
**कामशास्त्रमिदं प्रोक्तम् व्यासेनामितबुध्दिना।।**[4](2/383)

महाभारते धर्मस्य अतीव विशदा परिकल्पना विहितास्ति। अस्मिन् विशाले जगति नानाविधानवयवान् एकस्मिन् सूत्रे एकस्यां शृङ्खलायां वा आबद्धुं यत्सार्वभौमं तत्त्वमस्ति तद्धर्म एवास्ति। यदि धर्मस्य तत्त्वरूपं सूत्रं नाभविष्यत्, तर्हि जगत् कृत्स्नं विशृङ्खलितम् अभविष्यत्। छिन्नं भिन्नं चाजनिष्यत। यथोक्तम्शान्तिपर्वणि -

**सर्वत्रविहितो धर्मः सत्यप्रेत्य तपः फलम्।**
**बहुद्वारस्य धर्मस्य नेहास्ति विफला क्रिया।।**[5](174/21)

धर्मस्य कापि क्रिया विफला न भवति, न वा किमपि धर्मानुष्ठानं वैयर्थ्यंयाति। वनपर्वणि (94/4) धर्मस्य महत्त्वं प्रतिपादयन् ऋषिर्जोमशो वदति -

**वर्धत्यधर्मेण नरस्ततो भद्राणि पश्यति।**
**ततः सपत्नान् जयति समूलस्तु विनश्यति।।**[6]

अधर्माचरणेन कदाचित् मनुष्यस्य वृद्धिः दृश्यते, किन्तु सा स्थायिनी न भवति क्षणिका भवति। अतः मेधावी मानवः कदापि धर्मविहीनं कर्म न कुर्यात्। यथोक्तंशान्तिपर्वणि -

**धर्मादपेतं यत् कर्म यद्यपि स्यान् महाफलम्।**
**न तत् सेवेत मेधावी न तध्दितमिहोच्यते।।7293/81**

कस्याञ्चिद् राजसभायां दुःखप्रपीडितो जनो यदि न्यायं याचितुं प्रवर्तते, सः प्रज्वलन् हव्यवाडिव भवति, तं प्रति सभासदां कर्तव्यं भवति, यत् ते सत्येन धर्मेण प्रशमन्तु, यथोक्तम् सभापर्वणि अष्टषष्टितमेऽध्याये -

**सभां प्रपद्यते ह्यार्तः प्रज्वलन्निव हव्यवाट्।**
**तं वै सत्येन धर्मेण सभ्याः प्रशमन्त्युत।।**[8]
**विद्धो धर्मो ह्यधर्मेण सभां यथोपपद्यते।**
**न चास्य शल्यं कृन्तन्ति विध्दास्तत्र सभासदः।।**[9]

उद्योगपर्वणो पंचनवतितमे अध्याये महाभारते उक्तमस्ति

**यत्र ह्यधर्मेण सत्यं यथानृतेन च।**
**हन्यते प्रेक्षमाणानां हतास्तत्र सभासदः।।**[10]

राजधर्मविषये महाभारतस्य विराट्पर्वणि कीचकप्रसङ्गे कथा आगतास्ति। यदाद्रुपदसुतां प्रति कृतानि कीचकदुष्कृत्यानि राजा विराट् तत्र ध्यानं प्रदाय तमन्यायात्अवरोद्धुं न प्रयतते। अपमानिता सैरन्ध्री राजानं यथोचितं कथयति-

**न राजा राजवत् किचिंत् समाचरति कीचके।**
**दस्यूनामिव धर्मस्ते नहि संसदि शोभते।।**[11]

अन्यायिनः दण्डनम् राजधर्मः अस्ति। त्वं राजा सन्नपि राजवत् न किचिंद्आचरसि। अयन्तु स्यूनां धर्मः। सभायां राज्ञो व्यवहार एष न शोभते। अतः राजधर्मः राजभिःपालनीयः। समाजेषु स्त्रीणां उच्चता सर्वमान्या तस्याः नैतिकता आदर्श च श्रेष्ठं वर्तते, मातारूपेण तत्र गुरोरपि उच्चै महत्ता उपवर्णिताआसीत्।

**गुरूणां चैव सर्वेषां माता परमो गुरुः।**

सा पत्नीरूपेण पुरुषस्य अर्धाङ्गिनी श्रेष्ठतमा च वर्त्तते। एवञ्च गृहिणीरूपेणसर्वगुणानां स्त्रोतस्विन्या तस्याः पातिव्रत्यधर्मं सतीत्वस्य च भावना श्रेष्ठतमा आसीत्। महाभारते दाम्पत्यसंबन्धे सुष्ठुवर्णितम् - तद्यथा-

**सा भार्या या गृहे दक्षा सा भार्या या प्रजावती।**
**सा भार्या या पति-प्राणा सा भार्या या पतिव्रता।**
**अर्धभार्या मनुष्यस्य भार्या श्रेष्ठतमः सखा।**
**भार्या मूलं त्रिवर्गस्य भार्या मित्रं मरिष्यतः।।**

मानवेन ऋषि-पितृ-देवानां वेदाध्यापन-पुत्रोत्पादन-यज्ञयजनरूपाणां त्रयाणांऋणानां निष्क्रयसम्पादनं विना संन्यासग्रहणं धर्मप्रतिकूलमस्ति। अतः आदर्श मानवजीवनाय वर्णाश्रम-धर्मस्य विधिवत् पालनम् महाभारतानुसारं कर्तव्यमस्ति। विशिष्टधर्मातिरिक्ताः सामान्याः वर्णाश्रमधर्माः महाभारतीये पद्ये निर्दिष्टाः सन्ति-

**श्रूयतां धर्मसर्वस्वं श्रुत्वा चाप्यवधार्यताम्।**
**आत्मनः प्रतिकूलानि परेषां न समाचरेत्।।**[12]

महाभारतानुसारेण गृहस्थाश्रमधर्मस्य याचकेभ्यो भिक्षुभ्यो दानं विशिष्टो धर्मोऽस्ति-

**दत्त्वाऽतिथिभ्यो देवेभ्यः पितृभ्यः स्वजनाय च।**
**अवशिष्टानि येऽश्नन्ति तानाहुर्विधसाशिनः।।**[13]

महाभारतयुध्दमपि धर्माधर्मयोरूग्रः संघर्षः काल्पनिकं प्रतीकमात्रं नास्ति अपितु वास्तविकतायाः निर्देशोऽस्ति। कौरवपाण्डवयोः युध्दे पाण्डवानां विजयः अधर्मस्योपरिधर्मस्य विजयस्य भव्यं निदर्शनमस्ति। आदिपर्वणि श्लोकद्वये धर्माधर्मयोःतुलनात्मको निर्देशोऽस्ति-

**दुर्योधनो मन्युमयोमहाद्रुमः स्कन्धः कर्णः शकुनिस्तस्य शाखा।**
**दुःशासनः पुष्पफले समृध्दे मूलं राजा धृतराष्ट्रोऽमनीषी।।**
**युधिष्ठिरो धर्ममयो महाद्रुमः स्कन्धोऽर्जुनो भीमसेनोऽस्य शाखा।**
**माद्रीसुतौ पुष्पफले समृध्दे मूलं कृष्णो ब्रह्म च ब्राह्मणाश्च।।**[14]

महाभारतीयकथानकस्य मानवाधिकारपरस्य अभिधेयार्थः धर्मपरिपालनस्य अभिव्यंजनायामस्ति। धर्मः खलु सर्वदा स्थायी नित्यं च तत्त्वमस्ति। अतः धर्मोपासना मानवस्य अधिकारप्राप्तं कर्तव्यमस्ति। एष निर्देशः स्पष्टतः महाभारतस्यआदिपर्वणि विद्यते-'धर्मे मतिर्भवतु वः सततोत्थितानाम्।' इति 2/391

महाभारतस्य भीष्मपर्वणोंऽशभूता श्रीमद्भगवद्गीता (अध्यायाः 25-42) कुरूक्षेत्रयुद्धं धर्मेण उपक्रममाणा सती बहुविधान् धर्माधिकारान् प्रकाशितवती।

श्रीभगवद्गीतायां कुलधर्म-जातिधर्म-स्वधर्म-परधर्म-सर्वधर्मविषये भगवता श्रीकृष्णेन बहुविधं समुपदिष्टम्। प्रतियुगं भगवतोऽवतार हेतुरपि धर्मग्लानिः धर्मसंस्थापनम् च वर्तते। धर्माधर्मविषय एव सत्त्व-रजस्-तमस् बुध्देरपिनिर्णायकः। श्रीमदभागवद्गीतायां श्रीकृष्णार्जुनयोः संवादः 'धर्म्यः' इति श्रीकृष्णेन स्वयं व्यवहृतोऽस्ति -

**अध्येष्यते च य इमं धर्म्यं संवादमावयोः।**
**ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः।।**[15]

**अतस्तत्रोपदिष्टं -**

**श्रेयान् स्वधर्मोविगुणः परधर्मात् स्वानुष्ठितात्।**[16]

अतः स्वधर्मपरिपालनम् मानवाधिकारोऽस्ति।

महाभारते बहुप्रकारका धर्माः मानवाधिकाररूपेण निर्दिष्टाः सन्ति। तथा हि राजधर्माः, प्रजाधर्माः, जातिधर्माः, कुलधर्माः, वर्णाश्रमधर्माः, दानधर्माः, आपद्धर्माः, मोक्षधर्माः अन्ये च अनेके धर्माः।

अतएव धार्मिकक्षेत्रे महाभारते, आर्षकाव्ये अनेकानेकस्थाने च धार्मिक-

सहिष्णुतायाः प्रसारः प्रतिष्ठितम् अभवत्। महाभारते विशिष्य श्रीमद्भगवतगीतायां धर्मस्य मानवाधिकारविषयिणी प्रतिष्ठा दरीदृश्यते।

**सन्दर्भ :**


1. *कामन्दकीय नीतिसारः 2/26*
2. *वेदव्यासः 2/102*
3. *महाभारते - वेदव्यासः 2/26*
4. *आदिपर्वणि महाभारते - वेदव्यासः 2/383*
5. *शान्तिपर्वणि 174/21*
6. *वनपर्वणि 94/4*
7. *शान्तिपर्वणि 293/8*
8. *सभापर्वणि 68/60*
9. *सभापर्वणि द्यूतपर्व 68/77*
10. *उद्योगपर्वणि 95/26*
11. *विराट्पर्वणि 96/31*
12. *शान्तिपर्वणि 11/23*
13. *शान्तिपर्वणि 11/24*
14. *आदिपर्वणि 1/110-111*
15. *श्रीमद्भगवद्गीता 18/70*
16. *श्रीमद्भगवद्गीता 18/47*


●●●

# 5

# पालिप्राकृतसंस्कृतभाषाणां भाषावैज्ञानिकमध्ययनम्

*प्रियव्रतमिश्रः*

भाषा सर्वविधमानवीयव्यवहारस्य समुत्कृष्टं साधनं भवतीत्यनुभवैकवेद्यम्। सेयं भाषा नित्यनूत्नतया परिवर्तृतमाना कालभेदेन स्थानभेदेन भिद्यत इत्यपि न तिरोहितं भाषाचिन्तनपरायणैकमतीनां विदुषाम्। एवं स्थितौ विश्वस्य प्राचीनतमासु भाषासु पालि-प्राकृत-संस्कृतभाषाणां सर्वातिशायिमहत्त्वं विद्यते। शोधपत्रेऽस्मिन् तिसृणामपि भाषाणां भाषावैज्ञानिकतत्त्वानि समुद्ध्रियन्ते ।

विचाराणामादानप्रदानार्थं सर्वापेक्षया शक्तं साधनं विद्यते भाषा। स्वाशयमभिव्यञ्जयितुं प्रमुखं साधनं भवति भाषेति नाविदिततथ्यं सचेतसाम्। प्रयुज्यमानस्येयं भाषा कदारभ्य कथङ्कारं प्रवृत्तेति गवेषणीयमिदमितिवृत्तम्। अनादिकालतो गीर्वाणवाणी ब्रह्मणो मुखात् निस्सृतेति भगवती श्रुतिरभिप्रैति- ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणःपुरा। कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ।। इति। ततो नैका भाषास्समुत्पन्ना कालान्तरे इति भाषाविदामनुसन्धाननिस्सृतं वचनम्। अतः तस्यामेव परम्परायां संस्कृत पालिप्राकृतभाषाणां पारस्परिकसम्बन्धः वरीवृत्यत इत्यत्र नास्ति शङ्कापङ्कालेषः।

**प्राकृतम्**

प्रकृतिशब्दस्य अण् इति प्रत्यये कृते प्राकृतशब्दो निष्पद्यते । प्रकृतेः इदं प्राकृतम्। अर्थात् या प्रकृतिसम्बद्धा भाषा भवति सा प्राकृतम्। प्रकृतिं - संस्कृतं मूलाधाररूपेण संस्थाप्य निस्सृता भाषा बोभवीति प्राकृतम्। सर्वप्रथमं भरतमुनिना प्राकृतभाषायाः लक्षणं नाट्यशास्त्रे सप्तदशतमे अध्याये 6-23 कारिकासु निर्दिष्टम्। प्राकृतप्रकाशः इति ग्रन्थः प्राकृतव्याकरणसम्बद्धः सर्वप्रथमग्रन्थः ।

प्रकृतिः संस्कृतम् । संस्कृतभाषातः समुत्पन्ना भाषा प्राकृतम्। अस्मिन् विषये अर्वाचीनभाषाविदो विवदन्ते। प्राकृतमेव सर्वप्राचीना भाषा। संस्कृतं प्राकृतात् समुत्पन्नमिति तदाशयः। तत्र हि पुराकृतं - प्राकृतम्, प्राक् कृतं - प्राकृतमिति व्युत्पत्तेः प्रदर्शनं कृत्वा प्राकृतभाषायाः प्राचीनभाषात्वं मन्यमानास्संस्कृतस्यैव प्राकृतात्प्रादुर्भावं मन्वते। सम्यक्कृतं संस्कृतम् इति व्युत्पत्त्या भारतभाषायास्संस्कारं सम्पाद्य संस्कृतस्य प्रादुर्भाव इति आपाततो दृश्यमानं तत्पदव्युत्पत्तिं प्रमाणीकुर्वन्ति। तन्निराकरणं तु प्राक्तनैरेव विहितम्। यथा - प्रकृतिः संस्कृतम्, ततः समागतं प्राकृतम् इति हेमचन्द्राचार्यः प्राकृतव्याकरणे व्याख्याति ।

प्रकृतिः संस्कृतं तत्र भवं प्राकृतमुच्यते इति प्राकृतसर्वस्वे मार्कण्डेयैः जोघुष्टम्। प्रकृतेरागतं प्राकृतम् - प्रकृतिः संस्कृतम् इति दशरूपके। प्रकृतेः संस्कृतादागतं प्राकृतम् इति वाग्भटालंकारटीकायामुल्लिखितम्। प्रकृतिः संस्कृतम्। तत्र भवत्वात् प्राकृतं स्मृतम् इति प्राकृतचन्द्रिकायाम्, प्रकृतेस्संस्कृतायास्तु विकृतिः प्राकृती मता। इति प्राकृतशब्दप्रदीपिकायां नरसिंहः। इत्थं बहुभिर्बहुधा प्रदत्तप्रमाणनिचयालोकनेन संस्कृतात् प्राकृतस्य उत्पत्तिः इति सुज्ञायते।

व्याकरणशास्त्रदृष्ट्यापि संस्कृतात् प्राकृतोत्पत्तिरिति वक्तुं शक्यम्। यथा- तस्याः तस्याः भाषायाः व्याकरणं तस्यां भाषायां प्रणीतं भवति। यथा - संस्कृतस्य व्याकरणं संस्कृते प्रणीतम्। परन्तु प्राकृतस्य व्याकरणं न प्राकृते प्रणीतम्।

**प्राकृतभाषायाः पञ्च प्रभेदाः**

1. शौरसेनी, 2. पैशाची, 3. महाराष्ट्री, 4. अर्धमागधी, 5. मागधी इति।

संस्कृतभाषासु विद्यमाननाटकेष स्त्रीपात्रेण शौरसेनीति प्राकृतभाषा प्रभेदः प्रयुज्यते स्म। इयं संस्कृतेन प्रभाविता विद्यते। दिगम्बरजैनानां धार्मिकसाहित्यं प्रायोऽस्यां भाषायां समुपलभ्यते।

पिशाचजातिस्थजनभाषासीत् पैशाचीति। कश्मीरदेशे अस्याः प्रयोगः क्रियते स्म।

महाराष्ट्री महाराष्ट्रे प्रवृद्धा भाषा। गाथा सप्तशती इति ग्रन्थः अस्यां निहितो वर्तते। कालिदासादिनाटकेषु अस्याः एव भाषायाः प्रयोगो दृश्यते। जैनानां ग्रन्थाः केचन अस्यां भाषायां गद्यरूपेण निहिताः सन्ति।

शौरसेनिमगधदेशयोः सम्बद्धा भाषा अर्धमागधी। जैनैः निजग्रन्थेषु अस्याः उपयोगः कृतः।

मगधदेशसम्बद्धा भाषा मागधी। गौडी इत्यपि अस्याः नामान्तरम्।

**प्राकृतभाषायां समुपलब्धं साहित्यम्**

प्राकृतभाषायां मुख्यतो इत्थं साहित्यं समुपलभ्यते। प्राकृतप्रकाशः, षड्भाषाचन्द्रिका, प्राकृतसर्वस्वम्, प्राकृतरूपावतारः इत्यादि।

**पाली**

भारतवर्षे ईसापूर्व 500 तः 1 पर्यन्तं लोके या भाषा प्रवर्तिता सा पालीति कथ्यते। पालिशब्दस्य वस्तुतः कः अर्थ इति विचार्यमाणे पालना इति धातोः शब्दोयं निष्पन्न इति केचन कथयन्ति। महात्मनो बुद्धस्य य उपदेशस्सोऽनयैव भाषयोपनिबद्ध इति ऐतिह्यविदामभिमतम्। तत आरभ्य इयं भाषा लोकभाषा सम्पन्ना यतो हि भाषेयं सरला सुबोध्या व्याकरणादिकाठिन्यरहिता बभूव। इयं भाषा कं देशमलमकार्षीदित्यत्रापि विदुषां विसंवादो दृश्यते। यतो हि बुद्धो मगधदेशीय आसीत् अतः इयं मागधी वा उत सम्पूर्णेपि भारतवर्षे भाषेयं प्रावर्तत इत्यनुसन्धेयो विषयः। पालीभाषाया विभिन्नरूपाणि न समुपलभ्यन्त इत्यत इयं सार्वत्रिकीति निर्णये काठिन्यमनुभूयते।

**पालिभाषायां समुपलब्धं साहित्यम्**

पालिभाषायां मुख्यतो द्विविधं साहित्यं समुपलभ्यते।

1. त्रिपिटकम्  - सुत्तपिटकम्, विनयपिटकम्, अभिधम्मपिटकम्।
   अनुपिटकम् जातकपिटकम्, मिलिन्दपिटकम्, पञ्हो पिटकम्, अट्ठकथा, महावंश ।

**पालिप्राकृतसंस्कृतभाषागतवैशिष्ट्यम्**

प्राकृत संस्कृते निहितशब्दापेक्षया प्राकृतभाषागतशब्दस्य वैशिष्ट्यम्

नकारस्य स्थाने णप्रयोगः

नगरम् - णअरं

शब्दान्ते विद्यमानमहाप्राणस्य परिवर्तनम्

मेघः मेहो, मुखम् मुंह

खकारस्य हकाररूपेण परिवर्तनम्

मुखं मुह, मेखला मेहला, शाखा साहा, सिंहो सिंघो, संहारः संघारो

**पदमध्यगतवर्णलोपः**

—कृतम् - कृअं, मृगाङ्कः मयंक

श एवं ष इत्यनयोः स्थाने स कारस्य परिवर्तनम्

पुरुषः - पुरुसो, मृषा मोसा, मुसा, शाखा साहा, पिशाची पिसाजी,

इतरवर्णपरिवर्तनानि

नौ - नावा, गो - गाओ, तृणम् - तणं, जीर्णं - जिण्णम्, हनूमान् - हणूमन्तो, तजाग - तटाको, सभा - सहा,

**पालिसंस्कृतयोः ध्वनिविचारः –**

पालिभाषायां ध्वनिः संस्कृतापेक्षया बहुत्र भिद्यते। यथा पालिभाषायाम् ''ऋ'' कारस्य उच्चारणं समाप्तं यथा नृत्य= निच्च , तृण= तिण , वृद्धः = बुड्ढो

ऐ/औ स्थाने ए/ओ अनयोः परिवर्त्तनं दृश्यते यथा –

शैल = सेल, चौर = चोर

श/ष स्थाने सकारस्य प्रयोगो दृश्यते यथा -

नाशयति = नासेति, निषण्ण = निसन्न

विसर्गस्थाने ''ओ'' इत्यस्य व्यवहारो दृश्यते यथा –

वृद्धः = बुड्ढो देवः = देवो

क्वचित् व्यञ्जनवर्णानां द्वित्वं दृश्यते यथा -

अग्निः=अग्गि धर्म=धम्म दृष्ट=दिट्ठो सत्य=सच्च सर्व=सब्ब मार्ग=मग्ग

ध्वनिपरिवर्त्तनकारणेन संस्कृतधातुरूपाणि परिवर्तितानि दृश्यन्ते यथा –

म्लायति = मिलायति पृच्छति = पुच्छति बुध्यते = बुज्झति भवति = होति

संस्कृते त्रीणि लिङ्गानि त्रीणि वचनानि च। पालिभाषायां तु द्विवचनं नास्ति । यथा

| एकवचनम् | बहुवचनम् |
|---|---|
| धम्मो | धम्मा |
| धम्मं | धम्मे |
| धम्मेन | धम्मेहि |
| धम्मा/धम्मस्मा | धम्मेहि |
| धम्मस्स | धम्मानं |
| धम्मे | धम्मेसु |
| धम्म | धम्मा |

संस्कृतापेक्षया पालि सरलमार्गे प्रवर्त्तते। यथा सम्बन्धं सूचयितुं

संस्कृतभाषायां भिन्नं भिन्नं स्वरूपं दृश्यते- देवः-देवस्य अग्निः-अग्नेः
गुरुः - गुरोः भिक्षुः-भिक्षोः

पालिभाषायां तु सर्वत्र स्स इति विभक्तियोजनेन सम्बन्धो ज्ञायते यथा –

देवस्स अग्निस्स गुरुस्स भिक्खुस्स

क्रियापदविषये यदि चिन्तयामः तदा पालिभाषायाम् आत्मनेपदमेव न भवति यथा –

| संस्कृतम् | पालि |
|---|---|
| लभते | लभति |
| क्रमते | क्रमति |
| क्षमते | खमति |

लकारेषु पुनः लृट् लेट् च न भवतः पालिभाषायाम् । द्विवचनमपि न भवति यथा-
स्थाधातोः रूपाणि –

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| प्रथमपुरुषः | तिट्ठति | तिट्ठंति |
| मध्यमपुरुषः | तिट्ठसि | तिट्ठथ |
| उत्तमपुरुषः | तिट्ठामि | तिट्ठाव |

**संस्कृतप्राकृतयोः भाषावैज्ञानिकमध्ययनम् –**

**ध्वनिपरिवर्त्तनम् –**

(अ) सामान्यतया संस्कृते यत्र ''अकारः'' तत्र प्राकृतभाषायामपि ''अ'' कारो दृश्यते परं क्वचित् तत्स्थाने ''आ'' कारोऽपि भवति यथा –

समृद्धि - सामिद्धि प्रकट - पायड, पयड् प्ररोह - पारोह, परोह

(आ) अ-उ ध्वनिस्थाने विष्वक् शब्दस्य स्थाने च ''अ'' स्थाने ''उ'' भवति –

ध्वनि - झुणि विष्वक् - वीसुं

(इ) अ-ए स्थाने शय्या आदि शब्दानां प्रथमे अकारे एकारो दृश्यते। यथा –

शय्या - सेज्जा

सौन्दर्य - सुन्देर अत्र- एत्थ वल्ली - वेल्ली उत्कर - उक्केर

तथैव क्वचित् ''ओ''कारोऽपि भवति । यथा नमस्कार = नमोक्कार

परस्पर = परोप्पर

एवं कूलङ्कषां प्राकृतभाषां पश्यामश्चेत् सन्धि-समास-कारक-तद्धित-क्रियापदेषु

वा संस्कृतापेक्षया भिन्ना दृश्यते चेदपि बहुविधं सान्निकट्यं दृश्यते। अनेनैतत् स्पष्टं यत् द्वयोरपि भाषयोः अविनाभावसम्बन्धो वरीवर्तृतीति।

सर्वासां भाषाणां पारस्परिकसम्बन्धो भृशं विद्यते। आधुनिके भाषाविज्ञाने तावत् भाषासु कथं परिवर्तृतनानि जायन्ते? किं साम्यं? कथञ्च वैषम्यमिति? अनुसन्धीयते। एवं स्थितौ उपर्युक्तप्राचीनभाषाणामेवंकारमध्ययनेन नूतनानि भाषावैज्ञानिकतथ्यानि समुद्धर्तृतुं शक्यन्त इति द्रढीयान् नो विस्रम्भः।

**सन्दर्भः**


1. *प्राकृतप्रकाशिका - कोमलचन्द्र जैन, काशी हिन्दू विश्वविद्यालय वाराणसी*
2. *सर्वाङ्गीण-प्राकृत-व्याकरण एवं अभ्यास प्रो. दीनानाथ शर्मा, सृजन समिति प्रकाशन, वाराणसी*
3. *पालि-प्राकृत-अपभ्रंशसंग्रहराम अवध पाण्डेय, विश्वविद्यालय प्रकाशन, वाराणसी*
4. *पालि-प्राकृत संग्रह- डॉ. शक्तिमान सिंह, चौखम्बा सुरभारती प्रकाशन, वाराणसी*
5. *पालि : भाषा और साहित्य- डा.रामानन्द शर्मा, चौखम्बा संस्कृत सीरीज, वाराणसी*


●●●

# 6

# भारतीयभाषासु सैद्धान्तिक : व्यावहारिकपक्षश्च ( जैनदर्शनसम्बन्धे )

*शुभम् जैनः*

भारतं तावत् तथा तद्देशः यत्र भाषाणां विविधता, सांस्कृतिसमृद्धिश्च अद्भुतमुदाहरणं प्रस्तौति। भारतीयभाषाः न केवलं संचारमाध्यमिका अपितु ता परम्पराः रीतयः सांस्कृतिकपरिचयत्वं च संरक्षन्ति। अत्र याः विभिन्नभाषात्मकपरिवारसंयुक्तभाषाः व्यवहारे सन्ति ताः एकतायामनेकतायाः भावनां दर्शयन्ति। भारतं बहुभाषिदेशः विद्यते। अत्र प्रमुखाः भाषाः सन्ति-हिन्दी, संस्कृतम्, बांग्लम्, तमिलम्, तेलुगुः, महाराष्ट्रियम्, गुर्जरीयम्, मलयालमः, पांचालीयम्, औत्कलीयम्।

दृश्यते अनेन इति दर्शनम् अर्थात् येन दृश्यते ज्ञानं प्राप्यते तद् दर्शनम्। दर्शनशब्दः दृश्धातोः ल्युटि कृते सिध्यति। दर्शनशब्दस्य तात्पर्यम् भवति जितेन्द्रियत्वम्, वासनामूलविनाशत्वमिति। जैनदर्शने जिनशब्दः 'जयति कर्मशत्रून्'[1] इत्यर्थे विद्यते। अर्थात् येन रागद्वेषादिविकारान् विनश्य तत्र विजयः प्राप्तः अथवा यैः कर्मरूपिशत्रवः जिताः ते जिना इति उच्यन्ते। अपि च जिनद्वारा प्रवर्तितधर्मः जिन उच्यते। जैनधर्मे रागद्वेषादिषु विजयप्रापकाः, कालत्रयेषु पूजिताः सामर्थ्यवन्तः सिद्धाः पुरुषास्ते 'अर्हत्' कथ्यन्ते-

**सर्वतोजितरागादिदोषस्त्रैलोक्यपूजितः।**
**यथास्थितार्थवादी च देवोऽर्च्छन् परमेश्वरः।।**[2]

अस्य धर्मस्य प्राचीननाम निगण्ठ आसीत् यच्च पालिभाषायाः रूपान्तरमस्ति। अस्यार्थः - निर्ग्रन्थः विद्यते। जैनधर्म अनादिकालतः विद्यते। काले काले उत्पद्यमानेभ्यः तीर्थंकरेभ्यः प्रवर्तितोऽयं धर्मः विद्यते। जैनधर्मणि 24 तीर्थंकराः

विद्यन्ते। ये च प्रत्येकस्मिन् युगे धर्मप्रवर्द्धनं कुर्वन्ति। प्रत्येकयुगस्य प्रथमतीर्थंकरः भगवान् ऋषभदेवः विद्यते। तत्पश्चात् क्रमशः 23 तीर्थंकराः अभवन् येषु तीर्थंकरमहावीराः सन्ति।

जैनदर्शनस्य पक्षद्वयं विद्यते - सिद्धान्तपक्षः व्यवहारपक्षश्च।

सिद्धान्तपक्षस्तावत् - कस्मिन्नपि विषये शुद्धं ज्ञानमेव सिद्धान्तम्। जैनधर्मसिद्धान्तस्य उद्देश्यम्- आत्मनः शुद्धिः, तपस्यायाः, निर्वाणप्राप्तिश्च विद्यते। सिद्धान्तपक्षस्यान्तर्गते तत्त्व-द्रव्य-कर्म-आत्मा-मोक्ष-प्रमाण-स्याद्वाद इत्यादयः आयान्ति।

तत्त्वम्- तद्भावस्तत्त्वम्'[3] अर्थात् वस्तुनः भावस्वरूपनाम तत्त्वं भवति। यः पदार्थः यस्मिन् रूपे स्थितः तस्य तस्मिन्नेव रूपे भवनं तत्त्वमुच्यते। तत्त्वस्य अर्थः प्रयोजनभूतवस्तु अस्ति। येन आत्महितं स्वरूपं च परिचीयते, तत्तावत्तत्त्वम्। जैनदर्शने तत्त्वस्य संख्या सप्त विद्यते-जीव-अजीव-आश्रव-बंध-संवर-निर्जरा-मोक्ष इत्यादयः।

द्रव्यम्-दव्वं सल्लक्खणियं उप्पादव्यधुवत्तसंजुत्तं।'[4]

यः सल्लक्षणयुक्तमुत्पादव्ययुक्तं धौव्ययुक्तं विद्यते तद्द्रव्यमित्युच्यते।

अजीवकाया धर्माधर्माकाशपुद्गलाः द्रव्याणि। जीवश्च, कालश्च'[5]। अधर्ः अधर्मः आकाशः पुद्गलः एते अजीवयुकायाः सन्ति एते चत्वारः द्रव्याः एव। जीवः कालश्च द्रव्यम्। द्रव्यशब्दोऽयं द्रुधातोः यत्प्रत्ययेन सिध्यति। यस्यार्थः - वस्तु, सामग्री, पदार्थः इत्यादयः। भेदद्वयं द्रव्यस्य- अस्तिकायः अनस्तिकायश्च।

कर्माणि द्विविधान्यत्र द्रव्यभावविकल्पितः'[6]।।

कर्मणश्चापि प्रकारद्वयं विद्यते-द्रव्यकर्म भावकर्म च।

आयुज्ञान 'दर्शनवारणवेदनीयम् मोहनीयायुर्नामगोत्रान्तराया'[7]:- द्रव्यम्, कर्म, ज्ञानावरणीयम्, दर्शनावरणीयम्, वेदनीयम्, मोहनीयम्, आयुः, नाम, गोत्रम्, अन्तरायः एते अष्टप्रकाराः कर्मणः सन्ति। जैनदर्शनानुसारं नियतिनिर्धारकः न ईश्वरःअपितु कर्म एव। अस्मद्व्यावहारिकजीवनोपलब्धयः कर्मजन्या एव। जैनदर्शनस्य महत्त्वपूर्णमंगं कर्म एव। जीवद्वारा मिथ्यादर्शनादिपरिणामेषु यदायोज्यते तदेव कर्म। यैश्च जीवाः परतन्त्रा भवन्ति तान्यपि कर्माण्येव।

**आत्मा-** दर्शनज्ञानचारित्रव्यतीत्यात्मेत्यात्मपदस्यभिधेयम्'[8]। यः दर्शनं ज्ञानं चारित्रं च प्राप्नोति स आत्मा। आत्माशब्दः अत् धातोः मनिन् प्रत्ययं विधाय साध्यते'[9]।

अत् धातुः सततगमने अर्थे विद्यते। शुभ-अशुभ-मनवचनकायक्रिया द्वारा यथासम्भवं तीव्रमन्दादिरूपेण व्यवहरति स आत्मा विद्यते। जीवनं विकासशीलं विद्यते। जीवनस्य विभिन्नपक्षाणां विकासाकलनं विभिन्नमाध्यमेन क्रियते। शरीरसम्बन्धिविकासः शारीरिकविकासः उच्यते। मनसम्बन्धिविकासः मानसिकविकास उच्यते। तथैव आत्मसम्बन्धिनः विकासः आत्मिकः अध्यात्मिक इत्युच्यते। जैनदर्शने आत्मनः श्रेणित्रयं विद्यते- (1)बहिरात्मा (2) अन्तरात्मा (3) परमात्मा ।।

**मोक्षः -** मोक्षशब्दः मुच्धातोः घञ् प्रत्ययेन सिध्यति'[10]। यस्यार्थः मोचनम्, त्यागः, स्वातन्त्र्यम् इत्यादयः। बन्धहेत्वभावनिर्जराभ्यां कृत्स्नं कर्म विप्रमोक्षो मोक्षः'[11] - बंधनकर्माभावः, निर्जराद्वारा च सकलकर्मविनाश एव मोक्ष उच्यते। मोक्षप्राप्त्यनन्तरं जीवः अनन्तं सुखमवाप्यते। मोक्षसय कारणद्वयं भवति - संवरः, निर्जरा च। संवरेण आस्रवः विरमति, नवीनकर्मणामुत्पत्तिर्न भवति निर्जरया च अर्जितकर्मणां क्षयो भवति। एष एव मोक्षः।

**स्याद्वादः -** स्याद्वादपद्धतिद्वारा प्रत्येकधर्मस्य वर्णनं तत्प्रतिपक्षिधर्मापेक्षया अस्ति- (विधिः) नास्ति- (निषेधः) अवक्तव्यादिरूपेण सप्तप्रकारेण क्रियते। एते सप्तधर्माः सप्तवाक्यैः कथ्यन्ते, एषा प्रक्रिया सप्तभंगी उच्यते -

**प्रश्नवशादेकस्मिन् वस्तुनि अविरोधेन विधिप्रतिषेधकल्पना सप्तभंगी।।'**[12]

**व्यवहारपक्षः -** जैनदर्शनस्य व्यवहारपक्षे व्यक्तेः आचरणं, समाजस्य प्रति कर्तव्यं, आध्यात्मिकप्रगत्यै व्यावहारिकनियमानामुल्लेखः विद्यते। पक्षोऽयं मुख्यरूपेण जीवनस्योपायेषु केन्द्रितमस्ति यश्च आत्मनः शुद्धौ मोक्षप्राप्तौ च सहायकः अस्ति। व्यवहारपक्षस्य एतत्प्रामुख्यम्- रत्नत्रयम्, दशलक्षणधर्मः, षोडशकारणभावना, अनेकान्तवादः, अहिंसा।

**रत्नत्रयम्-** पुरुषार्थचतुष्टयस्य चरमोपलब्धिः, मोक्षप्रप्तिश्च भारतीयदर्शनस्य प्रमुखं लक्ष्यम्भवति-

**सम्यक्दर्शनज्ञानचारित्राणि मोक्षमार्गः।'**[13]

जैनदर्शनानुसारं मोक्षप्राप्तेः साधनत्रयं विद्यते - सम्यक्दर्शनम्, सम्यक्ज्ञानम्, सम्यक्चारित्रम् च। जैनधर्मणि एते रत्नत्रयनाम्ना त्रिरत्ननाम्ना च उच्यन्ते। एते एव मोक्षस्य मार्गं प्रदर्शयन्ति।

**अहिंसा-** अहिंसा जैनधर्मस्य प्राणतत्त्वं विद्यते। अहिंसा न केवलं धर्मः अपितु सम्पूर्णजीवनशैली विद्यते। मनसा वचसा कर्मणा कायेन च न हिंसनमेव अहिंसा। अहिंसा परमो धर्मः- परमधर्म अहिंसा इति शास्त्रोक्तिः। पृथ्वीकाय- जलकाय- अग्निकाय- वनस्पतिकाय- त्रस- जीव इत्येतान् षड्प्रकारकान् जीवान् प्रति संयमपूर्णव्यवहारः अहिंसा विद्यते। प्राणिमात्रकृते दयायाः करुणायाः भाव एव अहिंसा। सर्वा अहिंसा पापरूपा एव भवति - रागादीनामनुत्पत्तिरहिंसा समये मतां'[14]। रागादीनामनुत्पत्तिः अहिंसा भवति। प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा '[15] - प्रमत्तयोगेन प्राणिनां वधः हिंसा वर्तते। यदा कश्चन असावधानेन, ज्ञात्वा प्रमादेन वा प्राणिनां हिंसनं करोति तदैव सः हिंसकः उच्यते। जैनदर्शने हिंसायाः भेदद्वयं भवति - द्रव्यहिंसा भावहिंसा च। स्वशारीरिकचेष्टया कस्यचन हिंसा द्रव्यहिंसा भवति। मनसि च कस्यचन हिंसाभावः भावहिंसा भवति। हिंसायाःत्रय भेदा अपि भवन्ति-कृतहिंसा, कारितहिंसा, अनुमोदितहिंसा।

दुःखान् निर्मुच्य यः सुखं प्रापयति स एव धर्मः। धर्मस्य दशलक्षणानि भवन्ति'[16]। जैनधर्मणि दशधर्मलक्षणस्य महत्त्वम्भवति। यतोहि तत्पालनेन संसारात् मुक्तिर्भवति।सांसारिकजीवनयापने शुभाशुभकर्मवशात् बन्धो भवत्येव। तत्कर्मक्षयाय श्रावकः क्षमादिदशधर्मलक्षणस्य विधिवत् पालनं कुर्वन्ति। एतदुत्तमदशधर्मः आत्मनः भावात्मकपरिवर्तनात् उत्पन्नविशुद्धपरिणाम, यः आत्मानं कर्मबन्धनात् रुणद्धि।

उत्तमक्षमामार्दवार्जवशौचसत्यसंयमजपस्त्यागाकिंचयब्रह्मचर्याणि धर्मः'[17] - उत्तमा क्षमा, आर्जवम्, शौचः, सत्यम्, संयमः, तपः, त्यागः, आकिंचयः, ब्रह्मचर्यः एतानि दशधर्मलक्षणानि।

षोडशकारणभावना- कस्यचित् निरन्तरचिन्तनं भावनास्ति। भावप्रधाने जैनदर्शने प्रत्येकक्रिया भावेन सम्बद्धास्ति। भावना भवनाशिनी अर्थात् भवानां विनाशिका भावना उच्यते। भावभावनयोर्भेदो विद्यते। पुरुषार्थचतुष्टयं भावनायामाधृतमस्ति। पुरुषार्थकरणपूर्वं यच्चिन्तनं मननं तीव्रेच्छा च भवति सा भावना विद्यते। अत्यन्तशुभभावनायाः फलं तीर्थंकरप्रकृतेः बन्धोस्ति। षोडशभावनाकारणनामानि एतानि सन्ति-दर्शनविशुद्धिर्विनयसम्पन्नता शीलव्रतेष्वनतीचारोऽभीक्ष्णज्ञानोपयोग संवेगौ शक्तितस्त्यागतपसीसाधु-समाधिवैयावृत्य करणमर्हदाचार्य- बहुश्रुतप्रवचन-भक्तिरावश्यकापरिहाणि मार्गप्रवाहना-प्रवचन-वत्सलत्वमितितीर्थंकरस्त्वस्य '[18]।

**अनेकान्तवादः -** अनेके अन्तधर्माः यस्मिन् विद्यन्ते इति अनेकान्तः'[19] । अनेकान्तः जैनदर्शनस्य प्राणतत्त्वमेव। अनेके धर्माः यत्र समाविष्टा सन्ति। अनेकात्मकवस्तु प्रति अनन्तधर्मात्मभवांगीकरणमनेकान्तवादः। जैनाचार्यैरेकस्मिन् वस्तुनि विरोधिधर्मद्वयं स्वीक्रियते। यत्वस्तु द्रव्यदृष्ट्या नित्यमंगीक्रियते तदेव वस्तु पर्यायदृष्ट्या अनित्यमपि स्वीकरोति।

जैनाचारः - आचार्यते इति आचारः। आचारशब्दः आङ्उपसर्गपूर्वक चर्धातोः घञ्प्रत्यये कृते सिध्यति'[20] । यस्यार्थःभवति - आचरणम्, व्यवहारः, रीतिः इत्यादयः। जैनपरम्परायां आचारविचारं समानमेव मन्यते। जैनधर्मानुसारं आध्यात्मिकविकासस्य पूर्णताहेतवे श्रावकः गृहस्थधर्मश्च (श्रावकाचारः) मुनिधर्मश्च (श्रमणाचारः) विद्यते। श्रमणधर्मः गृहस्थधर्मणि दृढीभवति। अनादिकालीनरागद्वेषादिविकारसमूहं विच्छिद्य शुद्धावस्थाप्रकटनं जैनाचार्योद्देश्यम् भवति। जैनधर्मानुसारं श्रावकः गृहस्थधर्मी वा श्रावकाचारः अस्ति मुनिधर्मश्च श्रमणाचारः।

पंचमहाव्रतम्- हिंसा, मिथ्या, चौर्यं, अब्रह्म, अपरिग्रहः इत्यादिभ्यः पृथकता एव व्रतम्। अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रहाः व्रतम्। एतेषां पूर्णरूपेण पालनं महाव्रतमुच्यते। तथा सत्यमहाव्रतम् - यथार्थवचनं सत्यम्। मनवचनकर्मणा, असत्यस्य त्यागः तत् सत्यम्। अप्रशस्तभाषणं मिथ्या अस्ति- असदभिधानमनृतम्'[21] - सत्यस्य पर्यायः सूनृतं विद्यते। यस्यार्थः भवति सर्वहितकारि सर्वप्रियं च। सत्यमिति मुक्तम्, असत्यमिति बन्धकारि उच्यते। अतः मोक्षप्राप्तये सत्यस्य व्रतत्वेन ग्रहणमावश्यकमेव।

अस्तेयम् - स्तेयमिति चौर्यकर्म। मनवचनकर्मणा चौर्यत्यागः अस्तेयम्। जैनधर्मणि स्तेयकर्म हिंसकमिति भवति। केवलं चौरकर्मत्याग अस्तेयं न विद्यते अपितु परवस्तुग्रहणमपि स्तेयमेव। अतः कस्यचिद्धनं मनसापि न ग्रहणीयमस्तेयम् - अदतादानं स्तेयम्'[22] ।

ब्रह्मचर्यमहाव्रतम् - मनुष्य द्वारा ब्रह्म अन्वेषणं, तदर्थं च स्वजीवनसमर्पणं ब्रह्मचर्य उच्यते। समस्तवासनापरित्यागः अपि ब्रह्मचर्यः। जैनदर्शने केवलमिन्द्रियसुखत्याग एव न धर्मः अपितु सकलवासनानां कामनानां च त्यागः ब्रह्मचर्यः विद्यते। स्त्रियाः रूपं दृष्ट्वा तत्र वाञ्छाभावाद्दूरीभवनं ब्रह्मचर्यः - मैथुनमब्रह्म'[23] - मिथुनकर्मभावः अब्रह्म भवति।

**अपरिग्रहः -** विषयासक्तित्यागः अपरिग्रहः। एतद्व्रताय सर्वविषयाणां त्यागः कर्तव्य एव भवति तदैव इन्द्रियसुखं भवति। परिग्रहस्यार्थो भवति-धनादि-संग्रहः, अपरिग्रहस्य चार्थः धनाद्यसंग्रहः। पारिवारिकजनानां स्नेहत्यागोऽपि अपरिग्रह एव भवति - यथा मूर्च्छा परिग्रहः'[24] ।

एवं खलु जैनदर्शनं नास्तिकदर्शनं विद्यते। जैनदर्शनस्य सैद्धान्तिकः व्यावहारिकपक्षश्च आत्मनः शुद्धिसाधनम्, कर्मक्षयसाधनम् मोक्षप्राप्तिसाधनं च विद्यते। दर्शनमिदं दार्शनिकदृष्ट्या सह अनुशासनात्मिकां जीवनशैलीमपि अवबोधयति। दर्शनस्यास्य सन्देशः अस्ति - यत् व्यक्तेः कर्म, विचारः, आचरणमेव तस्योन्नतेः मुक्तेश्च मार्गं प्रशस्तयति।

**सन्दर्भः -**


1 *सर्वदर्शनसंग्रहः पृ. 103*

2 *सर्वदर्शनसंग्रहः पद्यसंग्रहः पृ. 154*

3 *सर्वार्थसिद्धिः पृ.6*

4 *पंचास्तिकायः गाथा 10*

5 *तत्त्वार्थसूत्रम् 5.1-2-39*

6 *आप्तपरीक्षा पृ. 87*

7 *तत्त्वार्थसूत्रम् 8.7*

8 *समयसारः, आत्मख्यातिगाथा 8*

9 *जैनेन्द्रसिद्धान्तकोशः भागः 1, पृ. 244*

10 *संस्कृतहिन्दीकोशः पृ. 819*

11 *तत्त्वार्थसूत्रम10,2*

12 *तत्त्वार्थवार्तिकम् 1.6.51*

13 *तत्त्वार्थसूत्रम् 1.1*

14 *श्रायसपथः 98*

15 *तत्त्वार्थसूत्रम् 7.13*

16 *सर्वार्थसिद्धिः 9.2*

17 *तत्त्वार्थसूत्रम् 6.6*

*18 तत्त्वार्थसूत्रम् 6.24*

*19 षड्दर्शनसमुच्चयः पृ.55*

*20 संस्कृतहिन्दीकोशः पृ. 141*

*21 तत्त्वार्थसूत्रम् 7.14*

*22 तत्त्वार्थसूत्रम् 7.15*

*23 तत्त्वार्थसूत्रम् 7.16*

*24 तत्त्वार्थसूत्रम् 7.17*

●●●

# 7

# नास्तिकदर्शनशास्त्रनिकाये मुक्तिवादः

*शुभ्रजित् सेनः*

धर्मार्थकाममोक्षाश्चतुर्वर्गाः। एतेषु मोक्ष एव परमः पुरुषार्थः। शास्त्रान्तरेषु यदेव मुक्तिपदवाच्यं तदेवेह मोक्षशब्देनोच्यते। तथाहि अमरकोशे मुक्तिशब्दस्य पर्यायत्वेन बहवः शब्दाः प्रोक्ताः - **कैवल्यं निर्वाणं श्रेयो निःश्रेयसममृतं मोक्षोऽपवर्गः**[1]**।** पूर्वोक्तान् पर्यायवाचकशब्दान् विहाय मुक्तिशब्दस्य अन्यानि शब्दान्तराणि प्राप्यन्ते, तद्यथा – स्वरूपप्राप्तिः, अपुनरावृत्तिः, ब्रह्मभवनम्, ब्रह्मनिर्वाणम्, ब्रह्मलयः, संज्ञानाशः, प्रलयश्चेति।

मुक्तिशब्दार्थस्तावत् मोचनमिति। 'मुच्लृ मोक्षणे' (तु. उ. अ.) इति धातोरुत्तरं क्तिन्-प्रत्ययेन (3.3.94) मुक्तिशब्दसिद्धिः। मुक्तिर्मोचनमोक्षयोः इति हैमः। जटाधरेणात्राधिकतयोक्तम् –'अपुनर्भवः स्थिरः, अक्षरमिति। सा च मुक्तिः सार्ष्टिः, सालोक्यं, सारूप्यं, सायुज्यं, निर्वाणञ्चे'ति पञ्चविधा उक्तेति श्रूयते।

वेदोपनिषत्सु अमृतत्वप्राप्तिर्हि मुक्तिः - **य इत्तद्विदुस्ते अमृतत्वमानशुः**[2]। ये च वेदोक्तं तत्त्ववस्तुजातं विदन्ति, त एवामृतत्वं लभन्ते। अपि च, यः ब्रह्मस्वरूपं वेत्ति, स तस्मिन् सम्यक्तया स्थितो भवति नाम पुनर्नावर्तते –**य इत्तद्विदु स्त इमे समासते**[3]**।** दीर्घतमार्षिणा आम्नातमेतत्। तन्नये, ब्रह्मज्ञानेनैव जीवो ब्रह्मणि सम्यक्तया स्थितिं लभते। ब्रह्मणि सकृत् सम्यक्तया स्थिते सति जीवः इह संसारे पुनर्न प्रत्यावर्तत इत्येव अमृतत्वं मोक्षो वेत्युच्यते। **ब्रह्मसंस्थोऽमृतत्वमेति**[4]। अर्थात् ब्रह्मज्ञानलाभात्परमेव जीवो ब्रह्म भवतीति न, ब्रह्मज्ञानोदयात्पूर्वमपि स ब्रह्मैवासीत् - तदपश्यत्तदासीत्तदभवत्। श्रुतौ आम्नायते –**ब्रह्मैव सन् ब्रह्माप्येति य एवं वेद**[5] **।**

इच्छामात्रमेव अविद्या। तस्या अविद्याया नाशे मुक्तिः –**इच्छामात्रमविद्येयं तन्नाशा मोक्ष उच्यते**[6]**।** वासनायास्तनुभावः मोक्षशब्देनोच्यते महोपनिषदि–

**वासनातानवं ब्रह्मन् मोक्ष इत्यभिधीयते।**[7] अत्र तनुभावशब्दार्थो नाश इति। निःशेषरूपेण वासनायाः परित्यागं साधवः उत्तममोक्षस्य विलयक्रमं कथितवन्तः। **मोक्षः स्यात् वासनाक्षय**[8] इति मुक्तिकोपनिषत्। योगवाशिष्ठरामायणे भोगवासनात्यागो हि मुक्तिरिष्यते[9]। सुखदुःखदायककर्मणां लयो हि मोक्षः इति। अपि च, सा मुक्तिर्ब्रह्मणा चैक्यम् इति गरुडपुराणम्। ब्रह्मवैवर्तपुराणे तु निर्वाणपददात्री, हरिभक्तिप्रदा चेति द्वैविध्यं समर्थितम्–

**मुक्तिस्तु द्विविधा साध्विश्रुत्युक्ता सर्वसम्मता।**
**निर्वाणपददात्री च हरिभक्तिप्रदा नृणाम्॥**
**हरिभक्तिस्वरूपञ्च मुक्तिं वाञ्छन्ति साधवः[10]।।**

निःशेषरूपेण वेदनाया निवृत्तिरूपिणी अवस्थैव मुक्तिः। तथाहि चरकसंहितायाम् उक्तम् –

**योगे मोक्षे च सर्वासां वेदनानामवर्तनम्।**
**मोक्षो निवृत्तिनिःशेषो योगो मोक्षप्रवर्तकः[11]।।**

धर्मग्रन्थादिषु हरिभक्तिप्रदा मुक्तिरेव उपपादिता, दर्शनग्रन्थेषु निर्वाणपददात्री मुक्तिरेव वैशद्येन तर्कवितर्कैः प्रत्यपादि।

दुर्गादासतर्कवागीशकृतायां धातुदीपिकायां मुक्तिशब्दस्य तात्पर्यमित्थम्[12] – बन्धनरहितभावे अकर्मकोऽयम्। आलानान्मुक्तो गजः कर्त्र्यतिरिक्तः। एवं पापान्मुक्त इत्यादौ पापबन्धनान्मुक्त इत्यर्थः।

वैष्णवानां मते – हरिरेवात्मा। तेषां नये, संसारी पुरुषो हरिभजनादेव मुक्तः सन् विष्णवात्मकत्वमेति।अतो, हरिभक्तिप्रदा मुक्तिर्यस्य भवति, स 'पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम्' इति जनिमरणचक्रे नावर्तते। तथाहि वह्निपुराणे उक्तम् –

**हरिरात्मा न सन्देहः यदा तत्समजायते।**
**तदा मुक्तः स संसारी विष्णोरेवात्मतां व्रजति।।**
**नान्यथा मुच्यते चात्मा भ्रमन् वै घटियन्त्रवद्।।**

अतः विषयवासनापरित्यागपुरः सरमीश्वरभजनादेव मुक्तिः। महाभारते तु विषयतृष्णापरित्यागपूर्विका ब्रह्मप्राप्तिरेव मुक्तिः[13]। आचार्यमनुमते, सर्वेषु स्थावरजङ्गमात्मकेषु अहमेव आत्मत्वेनास्मीति, सर्वाणि परमात्मापरिणामसिद्धानि मय्येव परमात्मनि प्रकाशन्त इति यः किल मनुते, स एव ब्रह्मत्वमाप्नोति। तदुक्तं मनुसंहितायाम् –

**सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि।**
**समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति।।**

गीतायाम् अपि सममेव भावो गीतः –

**सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि। ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः[14] ।।**

शङ्करभाष्ये भाषितः श्लोकार्थः -सर्वभूतस्थं सर्वेषु भूतेषु स्थितं स्वम् आत्मानं सर्वभूतानि च आत्मनि ब्रह्मादीनि स्तम्बपर्यन्तानि च सर्वभूतानि आत्मनि एकतां गतानि ईक्षते पश्यति योगयुक्तात्मा समाहितान्तःकरणः सर्वत्र समदर्शनः सर्वेषु ब्रह्मादिस्थावरान्तेषु विषमेषु सर्वभूतेषु समं निर्विशेषं ब्रह्मात्मैकत्वविषयं दर्शनं ज्ञानं यस्य स सर्वत्र समदर्शनः।। एतस्य आत्मैकत्वदर्शनस्य फलम् उच्यते इति।

पूर्वमेवोक्तं यत् 'मृच्लृ मोक्षणे' इति मोक्षणार्थकात् मृच्लृ-धातोः क्तिन्-प्रत्यये मुक्तिशब्दो निष्पन्नः। किन्तु कस्मिन्मोक्षणमिति चेत् कैश्चिदुच्यते दुःखादिति, कैश्चिद्वा बन्धादिति। बन्धादित्युक्ते कीदृशो बन्ध इति जिज्ञासा स्वाभाविकी एव। केचित्तु शरीरस्यैव बन्धत्वं स्वीकुर्वन्ति। परं तन्न युक्तम्, आत्महत्यादिना केवलशरीरादपि मोक्षसम्भवात्। यतः शरीरस्य बन्धत्वं दुःखहेतुत्वादेव जायत इति कृत्वा दुःखमेव बन्ध इति स्वीकार्यम्। तस्मादेव भारतीयदर्शनप्रस्थानानि भिन्नमतानि प्रस्तुवन्ति स्म। अत्र प्रतिदर्शनप्रस्थानं मोक्षविषयकाः राद्धान्ता वादा वेति आलोच्यन्ते –

**क). नास्तिकानां मुक्तिविमर्शः –**

दृश्यतेऽवबुध्यते वस्तुतत्त्वमनेन इति दर्शनम् । परमं वस्तुतत्त्वमेकं चेदपि दृष्टिकोणगतं भेदमनुसृत्य दर्शनानां भेदः सञ्जातः। एतेषु चार्वाक-बौद्ध-जैनदर्शनानि नास्तिकदर्शनानि, अन्यानि आस्तिकदर्शनानि इति गण्यन्ते। ये वेदप्रामाण्यं नाङ्गीकुर्वन्ति, ते नास्तिकाः। आस्तिकानान्तु परमं प्रमाणं वेदाः भवन्ति। उक्तञ्च –

**नास्ति वेदोदितो लोक इति येषां मतिः स्थिरा।**
**नास्तिकास्ते तथाऽस्तीति मतिर्येषां त आस्तिकाः।।**
**अवैदिकप्रमाणानां सिद्धान्तानां निदर्शकाः।**
**चार्वाकप्रभृतयश्च त्रयो लोकेषु नास्तिकाः।।**
**वेदप्रमाणकानीह प्रोचुर्ये दर्शनानि षट्।**
**न्यायवैशेषिकादीनि स्मृतास्ते आस्तिकाभिधाः।।**

अस्मिन् शोधबन्धे नास्तिकदर्शनत्रितये प्रतिपादितस्य मोक्षवादस्य अवधारणा विचार्यते संक्षेपेण -

**क.1. चार्वाकमते मुक्तिः –**

चार्वाकमते, काम एवैकः पुरुषार्थः। मरणमेव अपवर्ग इति चार्वाकाः। आत्मकेन्द्रिकं संकीर्णं, स्थूलम्, इन्द्रियोपभोगजन्यं पशुसुलभं च सुखमेव एतेषां मतेन परमपुरुषार्थः। अङ्गनालिङ्गनादिजन्यं केवलमिह लौकिकं सुखमेव पुरुषार्थः, स एव च स्वर्गपदाभिधेयतामेति। प्रियवस्तुनो वियोगेन अप्रियवस्तुनः संयोगेन च जायमानं दुःखमेव चास्ति नरकः। एतन्मते, जगति सुखस्यैवोपादेयत्वं सिद्ध्यति निश्चीयते च। यद्यपि सुखस्य सर्वमतेन उपादेयत्वं सिद्धमेव न असिद्धमिति। परन्तु तथापि चार्वाकमते सन्मार्गेण असन्मार्गेण वा केनापि मार्गेण सुखं जायतामिति सुखप्राप्तिरेव चास्ति सर्वथा जीवनस्य प्रधानोद्देश्यीभूता। तथा चोक्तं चार्वाकषष्टौ -

**यावज्जीवेत् सुखं जीवेत् ऋणं कृत्वा घृतं पिबेत्।**
**भस्मीभूतस्य देहस्य पुनरागमनं कुतः।।**

एवं स्थिते अङ्गनाऽऽलिङ्गनादिजन्यस्य धर्मादिरूपकारणाजन्यस्य स्वर्ग रूपफलस्य सम्प्राप्तिरेव पुरुषार्थः। एतन्मते, धर्माधर्मौ नहि सुखदुःखयोः कारणे स्तः, भवितुं वार्हतः, अपि तु प्रियवस्तुनोऽवियोगस्य, अप्रियवस्तुनः संयोगस्य च धर्माऽधर्मौ प्रति हेतुत्वादिति।

चार्वाका वराका अर्थकामयोरेव पुरुषार्थत्वं स्वीकुर्वन्ति। 'आद्यन्तौ टकितौ' इति न्यायेन आद्यन्तयोः टित्-कित्संज्ञान्तर्गतत्वात् तादृशसंज्ञाया एव धर्मस्य अपुरुषार्थतायां मानत्वात्। तत्त्वतो धर्मस्य पुरुषार्थत्वमेव नास्ति, तस्य स्वयमेव खपुष्पायितत्वात्, वन्ध्यापुत्रायितत्वाच्चेत्यस्ति चार्वाकस्य अभिप्रायः। अर्थात् यथा बन्ध्यापुत्रस्य, खपुष्पस्य च नास्ति किमपि सत्त्वं नाम अस्तित्वम्, केवलं शब्दानुपूर्वीमात्रमेव समनुभूयते न तु तत्र चास्ति काऽप्यर्थानुपूर्वी, तस्याः सर्वथा समाप्तत्वात् ।

चार्वाकाः मोक्षविषये चेत्थं विचारयन्ति यत्, देहच्छेदरूपस्य मोक्षस्यापि नास्ति पुरुषार्थत्वम्। यतः-मोक्षस्य कोऽस्ति अनुभवकर्ता, तथा कोऽस्ति तस्य पूर्णतया ज्ञाता, कश्चास्ति मोक्षस्याऽऽधारः आत्यन्तिक-दुःखनिवृत्तिश्चेन्मोक्षस्तस्य अनुभवविधानन्तु, तथा प्राप्तिस्तु इदानीमप्यत्रैव भवितुमर्हति तेषां येषां पयोदधियुतस्य, सघृतस्य, भोजनस्य अङ्गनालिङ्गना देश्चाऽस्ति समीचीना साध्वी व्यवस्थेति ध्येयम् ।

किन्तु, सुशिक्षितचार्वाकाणां नये, न चाल्पं सीमायितं जैवसुखं काव्यम्, परन्तु असीमानन्तपरितृप्तिहीनानन्दमयं सुखमेव विजिज्ञासितव्यम्। तथाहि तेषां नये- 'नाल्पे सुखमस्ति भूमात्वेन विजिज्ञासितव्यः' (श्वेताश्वतरोपनिषद्) इति। अतो, 'भूमैव सुखमिति' उपनिषद्वाक्यमेव सुशिक्षितचार्वाकैरुच्चार्य्यते।

विषयभोग एव मुक्तिरिति चार्वाकमतमपि न युक्तम्, विषयभोगेन विषयवासनायाः क्रमेण वर्धनात्, तेन सांसारिकाणां जीवानां सुखदुःखभोगिनामपि मुक्तत्वापत्तेश्च।

**क.2. जैनमते मुक्तिः –**

जन्मजरामयमरणैः शोक-दुःख-भयैश्च परिमुक्तावस्थैव निर्व्वाणमुच्यते जैनाचार्यैः। इदञ्च निर्वाणं शुद्धसुखं नित्यं निःश्रेयसमिष्यते[15] इति रत्नकरण्डक-श्रावकाचारकृत्। अपि चोक्तम् –

**परमात्मनि जीवात्मलयः सेति त्रिदण्डिनः।**
**लयो लिङ्गव्ययोऽत्रेष्टो जीवनाशश्च नेष्यते[16]।।**

जैनधर्मस्य निर्वाणं मोक्षस्यैव पर्यायवाचकत्वेन स्वीकृतम्। परं क्वचित् निर्वाणं मोक्षस्य परवर्तिपर्यायत्वेन परिकल्पितम्[17]। जैनदर्शनमते जीवस्य दुःखान्तकमेव निर्वाणम्–जीवाः सिध्यन्ति बुध्यन्ते मुच्यन्ते परिनिर्वान्ति सर्वदुःखानामन्तं कुर्वन्तिइतिउत्तराध्ययनसूत्रकृत्।

किञ्च, मुक्तिर्नाम जीवात् पुद्‌गलस्य वियोगः। एतेषां मते, मुक्तिलाभस्याद्यप्रक्रिया हि – 'संवरः' पुद्‌गलसञ्चारनिरोधो वेति। द्वितीयाप्रक्रिया हि – निर्जरः जीवस्य 'कर्मनाशः' इति।

जैनमते, सम्यग्‌दर्शन-ज्ञान-चारित्राणि इति त्रिरत्नेन मोक्षो जायते। तथाहि– उपस्वामिना 'तत्त्वर्थाधिगमसूत्रे' आवेदितं– सम्यग्‌दर्शन-ज्ञान-चरित्राणि मोक्षमार्गाः' इति।

सम्यक्‌चरित्रलाभार्थम् अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा इत्येतानि पञ्चमहाव्रतानि उद्‌यापनीयानि। त्रिरत्नानां समाहारेणैव, न तु व्यस्तभावेन मुक्तिर्जायते। जैनमते, मुक्तजीवोऽनन्तज्ञान- अनन्तदर्शन- अनन्तशक्त्यनन्ता-नन्दानाम् अधिकारी भवति। परिशेषे वक्तव्यं यत्, केवलं जैनधर्मावलम्बी एव निर्वाणाधिकारी। अन्ये धर्मावलम्बिनो निर्वाणे प्रतिष्ठितास्सन्तोऽपि कृते जैनदर्शनदृष्ट्या बद्धाः।

**क.3. बौद्धमते मुक्तिः-**

प्राग्बौद्धयुगादेव निर्वाणशब्दस्तावत् संस्कृतभाषायां जीवस्य परमार्थ इत्यर्थे प्रयुज्यते। अस्त्यर्थे उदारता-प्रेम-प्रज्ञारूपस्य शीलत्रितयस्य अभ्यास एव निर्वाणम्। ज्ञानी आर्य्यश्रावकः इन्द्रिय-विषयाणामुपभोगे कथमपि निरतो न भवति। तत्र स आनन्दं नानुभवति। तदर्थं तस्य तृष्णाया उपशमो न भवति। तृष्णानिरोधाय उपादानस्य नाम अत्यन्ताकाङ्खाया निरोधो भवति। उपादानस्य निरोधे सति भवस्य नाम पुर्वजन्मगतसञ्चितकर्मणो निरोधो भवति। भवनिरोधेनैव जन्मनिरोधः। पुनर्जन्माभावे मृत्यु-शोक-क्रन्दन-उत्पीडनादिदुःखानि प्रध्वंसन्ति। एवं प्रकार को निरोध एव निर्वाणम्[18]। निर्वाणस्य सुखस्वरूपत्वं न केवलमनुभवन्ति प्राप्तनिर्वाणाः महापुरुषाः, अप्राप्तनिर्वाणा अपि[19]। निर्वाणावस्थितेः किमपि निर्दिष्टं स्थानं नास्ति। शीलप्रतिष्ठिते मनसि वशीकृते सर्वत्र निर्वाणस्य साक्षात्कारो भवितुमर्हति। महाकविना अश्वघोषेण उक्तम् –

**दीपो यथा निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम्।**
**दिशं न किञ्चिद् विदिशं न किञ्चित् स्नेहक्षयात् केवलमेतिशान्तिम्।।**
**तथा कृती निवृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम्।**
**दिशं न किञ्चित् विदिशं न किञ्चित् क्लेशक्षयात् केवलमेति शान्तिम्[20]।।**

अपि चोक्तं -निर्व्वाणे स्थापनीयास्तत् पुनर्जन्म निवर्तके[21]। किन्तु निर्व्वाणं मनुष्यशब्दवाच्यं ज्ञानगम्यं नेति कृत्वा नागार्ज्जुनेन अभावात्मकः शब्दः प्रयुक्तोऽस्य व्याख्यानार्थम्। तन्नये, निर्वाणमिदमप्रतीतम्, असम्प्राप्तम्, अनुच्छिन्नम्, अशाश्वतम्, अनिरुद्धम्, अनुत्पन्नञ्च[22]। माध्यमिककारिकायाःवृत्तिकृत् चन्द्रकीर्तिः निर्व्वाणं शून्यतया समं तुलितवान् कृतस्मात् शून्यतैव सर्वप्रपञ्चवृत्तिलक्षणत्वात् निर्वाणमित्युच्यते[23]। सर्वे बौद्धधर्मावलम्बिनः निर्वाणस्य द्वैविध्यमङ्गीकृतवन्तः– सोपाधिशेष-निर्वाणम्, अनुपाधिशेषनिर्वाणञ्चेति। निर्वाणावस्थायां कामना- शोक-दुःखादीनां निर्वाणं भवत्यपि देहः अवशिष्यते। अयमवस्था क्लेशनिर्वाणावस्थेति। परं परिनिर्वाणे किमपि नावशिष्यते। प्रसङ्गत उल्लेख्यं यत् महायानसम्प्रदायात् हीनयानस्य निर्वाणमुपजीव्य सविशेषं पार्थक्यं नास्तीति निर्वाण-शीर्षके प्रबन्धे श्रीसतीशचन्द्रविद्याभूषणेन स्पष्टीकृतम् –The exposition of the term Nirvaana as given in the works of Northern School, does not materially differ from that given in those of the Southern School[24].

वैभाषिक-सौत्रन्तिकभेदात् हीनयानसम्प्रदायः द्विधा विभक्तः। तत्र वैभाषिकाः निर्वाणं प्रतिसंख्यं निरोधं कथितवन्तः। अभिधर्मकोषस्य व्याख्यानुसारं विशुद्धप्रज्ञासहायेन सांसारिक-सास्रवधर्मस्य तथा संस्कारस्य यदा अन्तो भवति, तदा तन्निर्वाणं कथ्यते। निर्वाणं नित्यम्, असंस्कृतधर्मविशेषः, भाववस्तु, पृथग्भूतसत्यरूपपदार्थः। किन्तु सौत्रान्तिकमते, विशुद्धज्ञानोदये भौतिकजीवनस्य चरमनिरोधो हि निर्वाणम्। अस्यामवस्थायां भौतिकसत्ता कथमपि न विद्यत इति कृत्वा निर्वाणं भौतिकसत्तायाः अभावरूपम्। निर्वाणप्राप्तेः परं सूक्ष्मचेतना विद्यते केवलमिति मन्यन्ते सौत्रान्तिकबौद्धाः।

निवार्णलाभ एव मुक्तिरिति बौद्धाः। बौद्धदर्शने तथा अद्वैतवेदान्ते जीवन्मुक्तिः स्वीकृता। जीवितावस्थायामेव यन्मुक्तिः लभ्यते, सेव जीवन्मुक्तिः। आचार्यशङ्कर-गौतमबुद्धौ जीवन्मुक्तपुरुषत्वेन संस्मरणीयौ। तथा हि बुद्धदेवो दुःखकातराणां प्राणिनां त्राणमार्गनिर्देशार्थं बुद्धत्वलाभात्परमपि अजीवत्। बुद्धमते– मानवानां सार्विकदुःखनाश एव निर्वाणम्। ननु केनोपायेनैव निर्वाणमेतज्जायत इतिचेदुच्यते – 'अष्टाङ्गिकमार्गैः' इति। लब्धनिर्वाणः अर्हद्रूपेण लोके प्रयुज्यते।

सवासनमुच्छेदो ज्ञानोपरमो मुक्तिरिति बौद्धाः। 'न प्रेत्य संज्ञास्ति' इति श्रुतिः। बौद्धमतं न युक्तम्। सर्वतः प्रियतमस्यात्मानः समुच्छेदाय प्रेक्षावतां प्रवृत्त्यनुपपत्तेः बन्धविच्छेदात्मकस्य मोक्षस्य तथात्वाभावाच्च।

अपरे बौद्धा वदन्ति – निखिलवासनाया उच्छेदे विगते विषयाकारोपप्लवे विशुद्धज्ञानोदयो भवति। न्यायकन्दलीकारमते तदपि अयुक्तम्। कारणाभावे तदनुत्पत्तेः, बन्धमोक्षयोः एकाधिकरण्याभावात्, तन्नये, तस्य चासम्भवात्।

डॉ. सुरेन्द्रनाथ-दाशगुप्तो मन्यते यत् निर्वाणं जागतिकज्ञानेन भाषया वा व्याख्यागम्यं न भवति। कल्पनाजालस्य क्षयो हि निर्वाणमित्येव वक्तुमलम्। डॉ. सर्वपल्लीराधाकृष्णस्याशयो यत् बुद्धदेवेन मिथ्याकामनाया उच्छेदो निर्वाणमिति नोक्तम् किन्तु तत्सर्वास्तित्वस्य ध्वंसावस्थेति नाभिहितम्[25]। तन्नये, निर्वाणपदेन खलु कामनारूपाग्नेर्विद्वेषस्य अज्ञानस्य च विनाशोऽभिहितः । श्रीमती रिस्-डेभिड् इत्यस्य मते, बौद्धधर्मस्य निर्वाणस्य केवलमर्थस्तावत् ध्वंस[26] इति। ओलडेनवार्ग-महाभागः समभावनायाः समर्थकः।

बौद्धाः निर्वाणापरपर्यायं मोक्षमेव रागादिज्ञानप्रवाहरूपाया वासनाया उच्छेदरूपेण अभिहितवन्तः –

**रागादिज्ञानसन्तानवासनाच्छेदसम्भवा ।**
**चतुर्णामपि बौद्धानां मुक्तिरेषा प्रकीर्तिता[27] ।।**

परिशेषे वक्तव्यं यच्चार्वाकं विहाय सकलभारतीयदर्शनशास्त्राणि मोक्षमेव परमपुरुषार्थतयाङ्गीचक्रुः। बौद्ध-जैनसम्प्रदायौ नास्तिकावप्युभौ सम्प्रदायौ पुरुषार्थत्वेन मोक्षमेव उररीकृतवन्तौ इति शिवम्।

**तथ्यसूत्राणि -**

1. *अमरकोषः, 1.5.6-7*
2. *ऋक्संहिता, 1.6.23*
3. *तत्रैव,1.164.39*
4. *छान्दोग्योपनिषत् , 2.23.1*
5. *तैत्तिरीयारण्यकम्, 2.2*
6. *महोपनिषद्, 4.116*
7. *तत्रैव*
8. *मुक्तिकोपनिषद्, 2.68*
9. *योगवाशिष्ठरामायणम्, 2.35.3*
10. *ब्रह्मवैवर्तपुराणम्, द्वाविंशत्यध्यायः,*
11. *चरकसंहिता, 4.1.116*
12. *शास्त्रदीपिताया इदं व्याख्यानं मुख्यतस्तेन शब्दकल्पद्रुमादेव संगृहीतम्।*
13. *'मूलमेतत् त्रिवर्गस्य निवृत्तिर्मोक्ष उच्यते'। (महाभारतम्, शान्तिपर्व, 5)*
14. *श्रीमद्गगवद्गीता, 6.29*
15. *रत्नकरण्डक-श्रावकाचारः, 5.10*
16. *द्वात्रिंशद्वात्रिंशिका, 31.8*
17. *उत्तराध्ययनसूत्रम्, 28.30*
18. *मिलिन्द प्रश्न, 3.1.6*
19. *तत्रैव, 3.1.8*
20. *सौन्दरानन्दम्, 16.28, 26*
21. *बुद्धचरितम्, 15.30*
22. *माध्यमिककारिका, 25.3*

*23. माध्यमिकवृत्तिः, पृ. 125*
*24. Nirvaana. Journal of the Buddhist Text (Vol-I), p 27*
*25. Indian Philosophy, Vol. I, Radhakrishnan, p 447*
*26. Buddhism, T W Rhys Davids (Encyclopaedia Britannica)*
*27. सर्वदर्शनसंग्रहः (बौद्धदर्शनम्), श्लोकः 44*

●●●

# 8
# जीवगोस्वामिविरचितसर्वसंवादिन्यां शब्दप्रमाणविवेचनम्

*अञ्जनाशर्मा*

प्रमाणं विना प्रमेयज्ञानं न संभवति। अत एव भारतीयदर्शने प्रमेयेन सहैव प्रमाणमपि वर्णितम्। दर्शनेषु तस्य स्वरूपविषये, तत्संख्याविषये च नैकानि मतानि सन्ति। एकप्रमाणात् दशपर्यन्तं प्रमाणानि स्वीकृतानि। तेषु शब्द एव पृथक् प्रमाणमिति नैकदर्शनैर्मन्यते। जीवगोस्वामिना स्वकीये सर्वसंवादिनीनामके ग्रन्थे शब्द एव मूलप्रमाणमिति सिद्धम्। शब्दस्य नैरपेक्ष्यं प्राधान्यञ्च सौदाहरणैः प्रकटितम्। तन्मतं समासेन पत्रेऽस्मिन् प्रस्तूयते।

**जीवगोस्वामी, तदीया रचनाश्च-**

जीवगोस्वामीमहाकविर्महादार्शनिकोमहावैयाकरणश्चेत्यादिविविध विरुद्धद्द गुणगणसमन्वयादतिशेतेकवीनन्यान्। बंगप्रदेशेरामकेलिनामकेग्रामे लब्धजन्मनोऽस्यसमयः षोडशशताब्द्यावउत्तरार्द्धस्सप्तदश शताब्द्या पूर्वार्द्धश्चौवेतिसु निश्चितम्। अस्यपितावल्लभोरूपसनातनयोः भ्राता आसीत्। स अनुपमइतिनाम्ना अपि प्रसिद्धः आसीत्। परमवैष्णवाएतेगौडदेशस्यनबाव - आलावुद्दिन - हुसैन- शाह - इत्यस्यराजसभायांउच्चपदाधिकारिन आसन्। रूपसनातनौचौतन्यमहाप्रभोदर्शनान्तरंभक्तिवैराग्यभावनयापदंत्यक्त्वावृन्दावनमात्य भक्तिपथमन्वसरताम्। वैष्णवेषुज्ञानिषुसमादृतौपरमविद्वांसौ-एतौनैकान्ग्रन्थान्विरचय्यभक्तिसिद्धान्तान्अप्रकटयतः। पितुर्वल्लभस्य अकाले देहान्तेभक्तिमान्जीवगोस्वामीअपिवृन्दावनेरूपगोस्वामिनोमन्त्रदीक्षांप्राप्यभक्तिसाधना यांग्रन्थरचनायाञ्चसंलग्नोऽभवत्। अस्यकर्तृत्वेचतुर्विंशतिः ग्रन्थाउपलभ्यन्ते, येषुकाव्यव्याकरणदर्शनग्रन्थाश्च,यथाहि - हरिनामामृतव्याकरणं, गोपालचम्पू,

धातुसूत्रमालिका, माधवमहोत्सवः, रसामृतशेषः, क्रमसन्दर्भः इत्यादयः। दर्शनग्रन्थेषुषट्‌सन्दर्भः सर्वसंवादिनीचग्रन्थद्वयंवैष्णववेदान्तस्य अचिन्त्यभेदाभेदवादं प्रतिष्ठापयति। तत्त्वंभगवत्परमात्माभक्तिः प्रीतिश्चेतिषट्‌सन्दर्भः। एतेषुश्रीमद्‌ भागवतपुराणमाश्रित्यतत्त्वानां वर्णनंविद्यते। अतःषट्सन्दर्भग्रन्थस्यअपरनामभागवतसन्दर्भोऽपिप्रसिद्धोऽस्ति। भागवतसन्दर्भान्तर्गततत्त्वभगवत्परमात्माकृष्णसन्दर्भाणामनुव्याख्यारूपेणसर्वसंवादिनीविरचिता। रचनायामस्यांयुक्तितर्कप्रमाणपुरस्सरंदार्शनिकमतैः सहसंवादपूर्वकंमत-मुपस्थापितम्।

**प्रमाणम्-**

सर्वसंवादिन्यां प्रमाणानां वर्णनंप्राप्यते। प्रथमं विचारणीयमस्ति प्रमाणपदम्। 'प्र' उपसर्गपूर्वकमाधातोर्भावकरणयोः ल्युट्-प्रत्यये कृते प्रमाण - शब्दो निष्पद्यते[3]। भावे 'प्रमीयते इति प्रमाणमि' ति व्युत्पत्त्या प्रमारूपे प्रमाणं गृह्यते। करणे 'प्रमीयते अनेन इति प्रमाण मि' ति व्युत्पत्त्या प्रमाया करणं प्रमाणमस्ति। सांख्यन्यायवेदान्तदर्शनेषु प्रमाणपदस्य निष्पतिः करणार्थे एव कृता, यथाहि सांख्यकारिकायां लक्षितं 'प्रमेयसिद्धिः प्रमाणाद्धि'[4], तर्कभाषायां 'प्रमाकरणं प्रमाणं' वेदान्तपरिभाषायामपि च। वेदान्तमतानुयायिनो जीवगोस्वामिन मतेऽपि करणार्थे एव प्रमाणमस्ति। तेनोक्तम्-'अर्थानां निर्णयाय तावत् प्रमाणं निर्णीयते।

कतिप्रमाणानि? विषयेऽस्मिन्नैकमतं दर्शनेषु। तेषु एकत दशपर्यन्तं प्रमाणानि सन्ति, यथाहि 1. प्रत्यक्षं 2. अनुमानं 3. शब्दः 4. आर्षः 5. उपमानं 6. अर्थापत्तिः 7. अभावः 8 संभवः 9. ऐतिह्यम् 10. चेष्टा। सर्वसंवादिन्यां जीवगोस्वामी दशविधं प्रमाणं संक्षिप्तेन वर्णयन् शब्दप्रमाणं सविशदं वर्णयति।

**शब्दप्रमाणम् -**

चार्वाका बौद्धा वैशेषिकाश्च शब्दस्य पृथक् प्रामाण्यं नाभ्युपगच्छन्ति। जैन-सांख्य-योग-मीमांसा-वेदान्तदर्शनेषुशब्दस्यपृथक् प्रामाण्य- मङ्गीकृतम्। जैनदर्शने श्रुतज्ञानं शाब्दज्ञानञ्चागम इत्युक्तम्। तैः पृथक् प्रमाण-त्वेनागमः स्वीकृतः। 'यथार्थाऽभिधानं शब्द' इत्युमास्वामिनां मतम् । सिद्धसेन-दिवाकर-प्रभाचन्द्र-माणिक्यनन्दि-देवसूरि-यशोविजयप्रभृतिजैनाचार्यैः शब्द (आगम) लक्षणेआप्तत्वमपिप्रविष्टम्। तेषां मते 'यथास्थितार्थपरिज्ञानपूर्वक हितोपदेशप्रणव आप्तः'। तथा च रागद्वेषमोहादिशङ्कापङ्काभ्यां रहितः पुरुष आप्त इति।

जैनदर्शने शाब्दज्ञानस्य द्वैविध्यं प्रदर्शितं - दृष्टार्थकः अदृष्टार्थकश्च। तत्र दृष्टार्थः लौकिकः अदृष्टार्थश्चपारलौकिकः। अदृष्टार्थकशब्देषु वेदानां परिगणनं ते नैव कुर्वन्ति, अपितु अर्हतवचनमेव प्रमाणत्वेनाभ्युपगच्छन्ति। सूत्रगम-अर्थागम-उभयागम-भेदेनागमस्य त्रैविध्यमेतैः स्वीकृतम्। शब्दप्रमाणस्य तात्पर्यं जैनागमार्थमेव। तस्मात् जैनागम एव एतेषां शब्दप्रमाणमिति एतैः संसूचितं भवति। शब्दप्रमाणविषये सांख्यमतं न्यायमततुल्यमेव। किन्तु आप्तशब्दव्याख्याने परस्परमनयोर्मतभेदो–दृश्यते। सांख्यसूत्रं शब्दप्रमाणंलक्षयति 'आप्तोपदेशःशब्दः'। सांख्यकारिकाकारकथयति यद् 'आप्तश्रुतिराप्तवचनं तु' इति। व्याख्यामस्य कुर्वन् गौडपादभाष्यं स्पष्टीकरोति यद् आचार्या ब्रह्मादयः, श्रुतिर्वेदः आप्ताश्च आप्तश्रुतिः तदुक्तम्-आप्तवचनमिति। न्यायसूत्रे शब्दप्रमाणस्य लक्षणमस्ति- 'आप्तोपदेशः शब्दः'। सद्विविधो–दृष्टा–दृष्टार्थत्वात्। तदिदं न्याय-भाष्यकारो वात्स्यायन आह 'आप्तः खलु साक्षात्—कृतधर्मा यथा–दृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा। साक्षात्करणमर्थस्याऽऽप्तिः, तया वर्तते इत्याप्तः। ऋष्यार्मम्लेच्छानां समानं लक्षणम्। तथा च सर्वेषां व्यवहाराः प्रवर्तन्ते इति । भाष्यकारानुसारेण आप्ततायाः सम्बन्धः कुलस्य श्रेष्ठतायां नास्ति। ऋषिः आर्य म्लेच्छोऽपि आप्त भवितुमर्हति। प्रचीनन्यायमतानुसारेण 'आप्तोपदेशः शब्द' इति शब्दप्रमाणलक्षणम्। केशवमिश्रान्नम्भट्टाभ्यां 'आप्तवाक्यं शब्द' इत्युक्तम्। ताभ्यामुपदेशस्थाने वाक्यार्थस्य प्रयोगः विहितः। योगदर्शनेऽपि शब्दस्य स्वातन्त्र्येण प्रामाण्यमभ्युपगतम्। तदुक्तंव्यासभाष्ये- श्स्वबोधज्ञानार्थंतत्त्वज्ञानीपुरुषः आप्तो-च्चारितशब्दघ माध्यमेन य उपदिश्यते स आगम इति। मीमांसकानां मते शब्दप्रमाणजन्यज्ञानं द्विविधं पौरुषेयमपौरुषेयञ्चेति। पौरुषेयवाक्येषु आप्तपुरुष-प्रयुक्तमेव वाक्यं प्रमाणम, अन्यदप्रमाणम्। अपौरुषेयशाब्दज्ञानं वेदेषु निहितम्। वेदान्तपरिभाषायां धर्मराजाध्वरीन्द्रानुसारेणयस्य वाक्यस्य तात्पर्यविषयी-भूतसंसर्गः प्रमाणान्तरेण न बोध्यते तत् वाक्यमागमप्रमाणम्। एतन्नये शब्दप्रमाणस्य स्वरूपं न्यायदर्शनतुल्यमेव। इत्येवं विविधेषु दर्शनेषु स्वं स्वं सिद्धान्तानुसारं शब्दप्रमाणस्य स्वरूपं विविधतया निरूपितम्।

जीवगोस्वामी तत्त्वनिर्णयाय शब्दप्रमाणमेव मूलं प्रमाणं मनुते। श्रीकृष्ण-तद्भक्ति-तत्प्रेमाख्यानां पदार्थानां निर्णनाय शब्दस्य एव प्रामाण्यमङ्गीकरोति। तन्मते 'प्रत्यक्षानुमानशब्दार्षोपमानार्थापत्यभावसम्भवैतिह्य--चेष्टा-ख्यानि दश

प्रमाणानि विदितानि तथापि भ्रमप्रमादविप्रलिप्साकरणापाटव-दोषरहितवचनात्मकः शब्द एव मूलं प्रमाणम्। अन्येषां प्रत्यक्षादीनां प्रायः पुरुषभ्रमादिदोषमयतयान्यथा प्रतीति-दर्शनेन प्रमाणं वा तदाभासं वेति पुरुषैर्निर्णेतुमशक्यत्वात्। तस्य तद्भावात्, अतो राज्ञा भृत्यानामिव तेनैवान्येषां बद्धमूलत्वात्, तस्य तु नैरपेक्ष्यात्, यथाशक्ति क्वचिदेव तस्य तैः साचिव्यकरणात् स्वाधीनस्य तस्य तु तान्युपमर्द्यापि प्रवृत्तिदर्शनात्, तेन प्रतिपादिते वस्तुनि तैर्विरोद्धमशक्यत्वात्'।

अत्र स्फुटमिदम् अपौरुषेयत्वात् शब्दप्रमाणे भ्रमादिदोषाः न भवन्ति। भ्रमः प्रमादो विप्रलिप्सा करणापाटवञ्चेति जीवे चत्वारो दोषाः। तेष्वतस्मिंस्तद्बुद्धिर्भ्रमः, येन स्थाणौ पुरुषबुद्धिः। अनवधानतान्यचित्ततालक्षणः प्रमादः येनान्तिके गीयमानं गानं न गृह्यते। वञ्चनेच्छा-विप्रलिप्सा, यथा शिष्ये स्वज्ञातोऽप्यर्थो न प्रकाश्यते। इन्द्रिय-मान्द्यं करणापाटवमं, येन दत्तमनसापि यथावत् वस्तु न परिचीयते। एते प्रमातृजीवदोषाः प्रत्यक्षादिषु प्रमाणेषु सञ्चरन्ति, न तु शब्दे।

प्रत्यक्षादीनां शक्तिभिरस्पृष्टे वस्तुनि शब्द एव साधकतमः। तदिदं जीवगोस्वामी इत्थं प्रदर्शयति- 'प्रत्यक्षं मनोबुद्धीन्द्रिय-पञ्चक-जन्यतया षड्विधं भवेत, प्रत्येकंसविकल्पक-निर्विकल्पकभेदेन द्वादशविधंभवति। तदेव वैदुषमवैदुषञ्चेति द्विविधम। तत्र वैदुषे न विप्रतिपत्तिः भ्रमादि-नृ-दोषराहित्यात् शब्दस्यापि तन्मूलत्वात्। किन्त्ववैदुष एव संशयः, तदीयं ज्ञानं हि व्यभिचरति, यथा-मायामुण्डावलोकने देवदत्तस्यैव मुण्डमिदं विलोक्यत इत्यादौ। न तु शब्दः - यथा हिमालये हिमं रत्नाकरे रत्नमित्यादौ तच्छब्देनैव बद्धमूलम। यथा दृष्टचरमायामुण्ड- केन केनचित् भ्रमात् सत्येऽप्यश्रद्धीयमाने सत्यमेवेदमिति नभो-वाण्यादौ जानन्नपि वृद्धोपासनं विना न किञ्चिदपि तत्त्वेन निर्णेतुं शक्नोतीति हि सर्वेषामेव न्यायविदां स्थितिः। शब्दस्य तु नैरपेक्ष्यम्। यथा- दशमस्त्वमसीत्यादौ- स एष शब्दो दशमोऽहमस्मीति प्रमायास्तिरस्कारिणं मोहं श्रवणपथ-प्रवेश-मात्राद्विनिवर्त्तत्यत्येवेति स्पष्टमेव नैरपेक्ष्यम्। आत्मशक्त्यनुरूपमेव प्रत्यक्षेण शब्दस्य साचिव्यकृतिः। यथा अग्निहिमस्य भेषजमित्यादावेव'। अनया रीत्या जीवगोस्वामी प्रत्यक्षापेक्षया शब्दस्य प्राबल्यं स्थापयति।

प्रत्यक्षतुल्यमेव अनुमानम्। अनुमानादपि शब्दप्रमाणं बलवत्तरम्। तदिदं जीवगोस्वामीआह-'प्रतिज्ञा-हेतूदाहरणोपनय-निगमनाभिध-पञ्चाङ्गमनुमानं यत्

तदपिव्यभिचरति। तत्र विषमव्याप्तौ-यथा-वृष्ट्या तत्कालनिर्वापितवह्नौ चिरमधिकोदित्वर-धूमे पर्वते पर्वतोऽयं वह्निमानित्यादौ, वर्षासु धूमायमानस्वभावे पर्वते वा, न तु शब्दः। यथा-सूर्यकान्तात् सौरिमरीचियोगेनाग्निरुत्तिष्ठत इत्यत्र तच्छब्देनैव बद्धमूलम्। यथा-अरेशीतातुराः पथिका! माऽस्मिन् धूमाद्वह्निसम्भावनां दृढ्वं दृष्टमस्माभिरत्रासौ वृष्ट्या- धुनैव निर्वाणः किन्त्वमुत्रैव धूमोद्गारिणि गिरौ दृश्यते वह्निः इत्यादौ धूमाभास एवायं न तु वह्निः किन्त्वमुत्रैवेत्यादिवाक्यादौ च। अनेन स्पष्टमेव यदानुमानं व्यभिचरति न तु शब्दः। शब्दस्य तदुपमर्द्दकत्वं यथा वह्नितप्तमङ्गं वह्नितापेन शाम्यति। शुण्ठ्यादि-द्रव्यं जठराग्निपाकादौ माधुर्यादिभाग्भवतीत्यादौ। तेन प्रतिपादितेऽनुमाने नाविरोध्यत्वं यथा-एकैवेयमौषधिस्त्रिदोषघ्नीत्यादौतच्छक्तिभिरस्पृश्येऽर्थे शब्दस्यैव साधकतमत्वम्। यथा ग्रहचेष्टादावेवेति। तदेवं मुख्ययोरेव तयोराभासी—तौ पराणि तु स्वयमेवानपेक्ष्याणि भवन्ति। तस्य तयोश्चानुगतत्वात्'। परेषु प्रमाणेषु आर्षप्रमाणं देवानामृषीणाञ्च वचनम्। गोस–शो गवय इति ज्ञानमुपमानम्। पीनत्वमह्णयभोजिनि नक्तभोजित्वं गमयति। तदन्यथा न भवतीत्यर्थगिरोः कल्पनं यस्य फलमसावर्थापत्तिः। सन्निकर्षं विना नेन्द्रियाणि गृह्णन्ति। तस्मात् घटाभावे प्रमाणं तदनुपलब्धिरूपोऽभाव एव। सहस्रे शतं सम्भवतीति बुद्धौ सम्भावनं सम्भवः। अज्ञातवक्तकृतागतपारम्पर्यप्रसिद्धमैतिह्यम्। अङ्गुल्युत्तोलनतोघटदशकादि-ज्ञानञ्चचेष्टेति। प्रत्यक्षानुमानयोरनुगतत्वातनपेक्षाणि नैतानि।

जीवगोस्वामिन मतानुसारं प्रत्यक्षादीनि परमार्थप्रमाकरणानि न भवन्ति। तेनोक्तं- 'पश्वादिभिश्चाविशेषान्न प्रत्यक्षादिकं ज्ञानं परमार्थप्रमापकम्।–दृश्यते चामीषामिष्टानिष्ट्योर्द्दर्शनघ्राणादिना प्रवृत्तिनिवृत्ती, न च तेषां काचित्परमार्थ-सिद्धिः।–दृश्यते चातिबालानां मातरपित्राद्याऽप्तशब्दादेव सर्वज्ञानप्रवृत्तिस्तंविना चौकाकितया रचितानां जड़मूकतेति न च व्यवहारसिद्धिरिति'।

कोऽसौ शब्दः? इति जिज्ञासायामाह जीवगोस्वामी- 'भ्रमादिरहितं वचः शब्दः इत्यनेनैव पर्याप्तिर्न स्यात् यथा-स्वमतिगृहीते पक्षे भ्रमादिरहितोऽयमयमेवेति प्रति स्वं मतिभेदे निर्णयाभावापत्तेः तथा तस्यापि शब्दस्य प्रत्यक्षावगम्यत्वेन परानुगतत्वात् अप्रामाण्यापत्तेः। तस्माद् यो निज-निज-विद्वत्तायै सर्वैरेवाभ्यस्यते, यस्याधिगमेन सर्वेषापि सर्वैव विद्वत्ता भवति, यत्—तयैव परमविद्वत्तया प्रत्यक्षादिकमपि शुद्धं स्यात्, यश्चानादित्वात् स्वयमेव सिद्धः, स एव

निखिलैतिह्यमूलरूपो महावाक्यसमुदायः शब्दोऽत्र गृह्यते । स च शास्त्रमेव तच्च वेद एव, य सृष्ट्यादौ भगवत आविर्भूतमपौरुषेयं वाक्यम्-तदेव भ्रमादिरहितं-सम्भावितम्। अतः तन्मते वेद एव प्रमाणम्। तच्चानुमतंब्रह्मसूत्रे यथाहि 'तर्काप्रतिष्ठानात्' 'शास्त्रयोनित्वात्' 'श्रुतेस्तु शब्दमूलत्वात्' चेत्यादिषु।

जीवगोस्वामी स्पष्टीकरोति यद् वेद-शब्दस्य दुष्पारत्वाद् दुरधिगमार्थत्वाच्च तदर्थनिर्णायकानां मुनीनामपि परस्परविरोधाद् वेदरूपो वेदार्थनिर्णायकश्चेतिहास-पुराणात्मकः शब्द एव विचारणीयः। तत्र च यो वा वेदशब्दो नात्मविदितः, सोऽपि तद्दृष्ट्यानुमेय एव। यथाहि महाभारते प्रोक्तम्- ''इतिहास-पुराणाभ्यां वेदं समुपबृंहयेत्''। जीवगोस्वामिन मते इतिहास-पुराणयोरभेदो वेदेन। तत्कथं तेषु भेद-निर्देशः वर्तते? शंकामिमामं समादधति यद्विशिष्टैकार्थ-प्रतिपादक-पदकदम्बस्यापौरुषेयत्वादभेदेऽपिस्वरक्रम-भेदाद्भेद-निर्देशोऽप्युपपद्यते। ऋगादिभिः सममनयोरपौरुषेयत्वेनाभेदो माध्यन्दिनश्रुतावेव व्यज्यते -- ''एवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेत–ग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणम्'' इत्यादिना। एवमेवं साम-कौथुमीयशाखायां छान्दोग्योपनिषदि 'ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासं पुराणपञ्चमं वेदानां वेदम्' इति। तदेवंजीवगोस्वामीइतिहास-पुराणयोः अपौरुषेयत्वमङ्गीकरोति। पुराणेष्वपि सात्त्विकमेव पुराणादिकं परमार्थ-ज्ञानाय प्रबलम्। कारणमस्य स्पष्टयन् जीवगोस्वामी आह - सत्त्वादितारतम्येनैवेति, यथाहि - 'सत्त्वात्सञ्जायते ज्ञानम्' इति, सत्त्वं यद्ब्रह्मदर्शनम् इति च न्यायात् सात्त्विकमेव पुराणादिकं परमार्थज्ञानाय प्रबलमित्यायातम्। सात्त्विकपुराणेषु अपि श्रीमद्भागवतस्य भगवत्प्रियत्वेन भगवताभीष्टत्वेन च परमसात्त्विकमङ्गी—तम्। श्रीमद्भागवतं पुराणलक्षणमपौरुषेयं शास्त्रं सर्ववेदेतिहासपुराणानामर्थसारं ब्रह्मसूत्रोपजीव्यञ्च। ब्रह्मसूत्राणाम—त्रिम-भाष्यभूतमेव श्रीमद्भागवतमिति। तदेवं श्रीमद्भागवतपुराणस्य प्रामाण्यं स्थितम्।

इत्येवं शब्दस्वरूपं पर्यालोच्य निश्चीयते यद् जीवगोस्वामी शब्दस्य स्वरूपे निर्दुष्टतां द्योतयति। तेन अपौरुषेयवाक्यमेव शब्दप्रमाणमङ्गीकृतम्। पौरुषेयवाक्यानां भ्रमादिदोषग्रस्तत्वात् पारमार्थिकवस्तुस्पर्शायोग्यत्वाच्च प्रत्यक्षादीनि सदोषाणीति। प्रत्यक्षादीनां प्रमाणानां शक्तिभिरस्पृश्येऽर्थे शब्द एव साधकतमः। माया-मुण्डावलोके 'तस्यैवेदं मुण्डम्' इत्यत्र प्रत्यक्षं व्यभिचारि। वृष्ट्या

तत्कालनिर्वापित-वह्नौ चिरं धूमप्रोद्गारिणि गिरौ 'वह्निमान् धूमात्' इत्यनुमानञ्च व्यभिचारि दृष्टम्। शब्दप्रमाणमुभयनिरपेक्षं 'दशमस्त्वमसि' इत्यादौ। तदुभयागम्ये साधकतमञ्च - ग्रहाणां राशिषु सञ्चारे यथा। शब्देनानुगृहीतं तदुभयं प्रमापकम्। यथा दृष्टचरमाया मुण्डकेन पुंसा सत्येऽप्यविश्वस्ते तस्यैवेदं मुण्डमिति नभो वाण्यानुगृहीतं प्रत्यक्षम्। 'अरे शीतार्ताः पान्थाः ! मास्मिन्नग्निं सम्भावयत, वृष्ट्या निर्वाणोऽत्र स दृष्टः किन्त्वमुष्मिन् धूमोद्गारिणि गिरौ सोऽस्ति' इत्येवं शब्देनानुगृहीतमनुमानं च। अनेन प्रत्यक्षादिषु प्रमाणेषु शब्दस्य नैरपेक्ष्यं प्राधान्यञ्च सिद्धम्। अपौरुषेयं वाक्यं वेद एव भ्रमादिदोषरहितत्वेन शब्दप्रमाणम्। वेदार्थनिर्णयाय इतिहास-पुराणयो प्रामाण्यम्। पुराणेष्वपि श्रीमद्भागवतस्य प्रामाण्यं वर्तते। प्रत्यक्षादीनि परमार्थप्रमाकरणानि न भवन्ति। लौकिकार्थग्रहे प्रत्यक्षादीनि प्रमाणानि, न तु तात्त्विके अर्थे। तात्त्विके अर्थे तु अपौरुषेयस्य निर्दोषस्य शब्दस्य एव प्रामाण्यम्। निष्कर्षे भ्रमादिदोषमयेषु प्रत्यक्षादिषु प्रमाणेषु शब्दस्य प्राबल्यमिति सोदाहरणैः प्रकटय्य शब्दप्रमाणस्य स्वरूपावगमनाय महदवदानं जीवगोस्वामिन इति न संशयः।

**संदर्भ :**


1. *Early History of Vaishnava faith and movement in Bengal, Calcutta, I edition.1961, pp. 148*
2. *तत्रैव,159*
3. *पाणिनिसूत्रम्, 3/3/18, 3/3/117*
4. *सांख्यकारिका, ईश्वरकृष्णः, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, कारिका 4*
5. *तर्कभाषा, केशवमिश्रः, मेरठ,2001,पृ.13*
6. *तत्त्वसंदर्भः, जीवगोस्वामी, व्रजगौरव-प्रकाशनम्, वृन्दावनम्, पृ. 13*
7. *तत्त्वार्थाधिगमसूत्रम्, कलकत्ता, 1903, 1-35*
8. *क. आप्तवचनादाविर्भूतार्थसंवेदनमागमः, जैनतर्कभाषा, सिन्धीजैनग्रन्थमाला, 1938,पृ.19*

   *ख.आप्तवचनादिनिबन्धनमर्थज्ञानमागमः, प्रमाणनयतत्त्वालोकालंकारः, 4-9*
9. *सांख्यसूत्रम्, महर्षिकपिलः, सम्पादक- रमाशंकर भट्टाचार्य, प्राच्यभारतीप्रकाशनम्, वाराणसी,1964,101*

10. *सांख्यकारिका,गौडपादभाष्यम्,विमला कर्णाटक (सम्पादकः), चौखम्बा ओरियण्टालिया.1997,5*
11. *सांख्यकारिका,गौडपादभाष्यम्, 5*
12. *न्यायसूत्रम्, महर्षिगोतमः, सम्पादक-महेशझा, चौखम्बासंस्कृतसीरीज, वाराणसी, 2013, 1-1-7, 8*
13. *न्यायसूत्रभाष्यम्, 1-1-7, 8*
14. *क. तर्कभाषा, पृ. 108*
    *ख. तर्कसंग्रह, अन्नम्भट्टः, व्या-श्रीनिवास शर्मा, भारतीयविद्यासंस्थानम्, वाराणसी, 2002, पृ.183*
15. *योगसूत्रम्, व्यासभाष्यम्, मोतीलालबनारसीदास, वाराणसी, 1980, पृ.21*
16. *मानमेयोदय, नारायणभट्टः, सम्पादक-टी. गणपति शास्त्री, त्रिवेन्दम, शब्दपरीक्षा, पृ. 45*
17. *वेदान्तपरिभाषा, धर्मराजाध्वरीन्द्रः, चौखम्भाविद्याभवनम्, वाराणसी, 1983, पृ.187*
18. *तत्त्वसंदर्भः, जीवगोस्वामी, व्रजगौरव-प्रकाशनम्, वृन्दावनम्, पृ. 13*
19. *सर्वसंवादिनी, जीवगोस्वामी, मथुरा, संवत् 2022, पृ.5*
20. *तत्रैव,पृ.5*
21. *तत्रैव,पृ.6*
22. *तत्रैव,पृ.8*
23. *तत्रैव,पृ.8*
24. *ब्रह्मसूत्रम्, बादरायणः, गीताप्रेस-गोरखपुरम्, संवत् 2012, 2-1-11*
25. *तत्रैव,2-1-27*
26. *तत्रैव,1-1-3*
27. *क. तत्त्वसंदर्भः, जीवगोस्वामी, व्रजगौरव-प्रकाशनम्, वृन्दावनम्, पृ.23*
    *ख. महाभारतम्, भण्डारकर-प्राच्य-शोध-संस्थानम्, पुणे, आदि पर्वम्, 1/267*
28. *तत्त्वसंदर्भः, जीवगोस्वामी, व्रजगौरव-प्रकाशनम्, वृन्दावनम्, पृ.24*
29. *बृहदारण्यकोपनिषद्,गीतप्रेस, गोरखपुरम्म् 2-4-10*
30. *छान्दोग्योपनिषद्,संवत् 2058*
31. *श्रीमद्भगवद्गीता,14-17*
32. *श्रीमद्भागवतपुराणम्1-2-24*
33. *तत्त्वसंदर्भः, जीवगोस्वामी, व्रजगौरव-प्रकाशनम्, वृन्दावनम्, पृ.47*

# 9

# रुद्रटप्रणीतकाव्यालङ्कारमाश्रित्यातिशय मूलकालङ्कारविमर्शः

*आशुकुमारठाकुरः, रञ्जनकुमारत्रिपाठी च*

संस्कृतकाव्यशास्त्रेऽलङ्काराणामध्ययनं विश्लेषणञ्च काव्यशास्त्रस्याभिन्नाङ्गं विद्यते इति नास्ति लवोऽपि सन्देहः। अलङ्काराः काव्यशोभाभिवर्धकतत्त्वरूपेण मन्यन्ते परं केचनाचार्या एतान् अलङ्कारान् न केवलं शोभावर्धकं-वदन्ति अपितु काव्यात्मानमपि-उरीकुर्वन्ति। आचार्याणां मतवैभिन्यानुगुणमेव काव्येऽलङ्काराः स्वरूपाधायका उत शोभाधायका इति विषयकं विवेचनम् अचरिकारीत्। अलङ्कारप्रस्थानस्याचार्या इमानलङ्कारान् काव्यात्मानं स्वीकुर्वन्ति, तथापरे रसादिप्रस्थानानाम् आचार्या अलङ्कारान् काव्यशोभाधायकं तत्त्वमेव उदीरयन्ति। इत्थमलङ्कारा अन्तराङ्गबहिराङ्गधर्मत्वेन मताः। केषाञ्चिदाचार्याणां मनीषायाम् अलङ्काराः काव्येषु नित्यत्वं भजन्ते तथान्येषां मतेऽनित्यत्वमपि भजन्ते। अलङ्कारस्य स्वरूपं तथा तस्य काव्ये कीदृशी स्थितिः स्यादिति विपश्चित्सु नूनमेव मतभेदो दृश्यते तथा चालङ्काराणां विभाजनविषयेऽपि मतान्तरं दरीदृश्यते। संस्कृतकाव्यशास्त्रेऽलङ्काराः चतुस्सङ्ख्याकेभ्य आपञ्चविंशत्यधिकैकशतसङ्ख्याकं गताः। अलङ्काराणां न्यूनाधिक्यमाचार्याणामार्षमनीषायाः सूक्ष्मदृष्टेश्च परिणामो विद्यते। विभिन्नाचार्यैरलङ्काराणां भिन्नभिन्नं वर्गीकरणमूप्रस्तुतम्। परमेतेषु समेषु सर्वादौ आचार्यरुद्रटेनैवालङ्कारस्य वैज्ञानिकवर्गीकरणम् प्रस्तुतम्। एतेनाचार्येणालङ्कारा वास्तवम्, औपम्यमतिशयः, श्लेष इत्याख्येषु वर्गेषु विभक्ताः। एतच्छोधपत्रमाध्यमेन आचार्यरुद्रटेन विभक्तेषु चतुर्षु अलङ्कारवर्गेषु अतिशयमूलकवर्गान्तरगता अलङ्कारा वर्ण्यन्ते। काव्ये काव्यशास्त्रे चातिशयमूलकालङ्काराणाम् उपयोगितां सिसाधिषैव एतच्छोधपत्रस्य मुख्योद्देश्यं वर्तते।

'अलङ्करोतीति अलङ्कारः' व्युत्पत्तिरियं काव्यशरीरस्य शोभाकतृन् धर्मान् अलङ्कारान् परिपोषयति। यथा कटककुण्डलाद्याभूषणं शरीरमण्डनेनालङ्कारत्वम्भजते तथैव काव्येऽप्यनुप्रासोपमादिवृत्तयः काव्यशरीरस्थौशब्दार्थावलङ्कुर्वन्ति अत एवैते अलङ्कारा इति मन्यन्ते (काणे 170)। अलङ्कारा अलङ्कार्यस्य केवलमुत्कर्षाधायकतत्त्वम्भवन्त्युत स्वरूपाधायकं तत्त्वम्भवन्तीत्ययं विषय आचार्येषु नितरां चर्चित एव। कतिभिश्चिदाचार्यैरलङ्काराः काव्यात्मत्वेन अभ्यर्च्यते यतोहि एतैरलङ्काराः स्वरूपाधायकत्वेन प्रतिष्ठिताः। अलङ्काराणामात्मतत्त्वेन प्रतिष्ठापनस्य श्रेय आचार्यभामहाय दीयते। एतेनालङ्काराः काव्ये समवायसम्बन्धेन प्रतिष्ठापिताः। आचार्यभामहस्य सारस्वतीवाग् विद्यते यद् यथानलङ्कृतायाः कामिन्या मुखन्न विभाति तद्वदेवानलङ्कृति काव्यमपि न विभाति। (भामह 1.13)। इत्थमाचार्य-भामहेनालङ्कारा नित्यत्वेनाभिमताः। भामहमतानुसारी जयदेवश्चन्द्रालोके निगदति यद् योऽनलङ्कारं काव्यमङ्गीकरोति, असावग्निमनुष्णं कथन्नाङ्गीकरोति? (जयदेव 1.8)। अलङ्कारप्रस्थानकैः आचार्यैर्यद्यप्यलङ्काराः काव्ये नित्यधर्मत्वेन स्वीक्रियन्ते तथापि अलङ्कारप्रस्थानातिरिच्य प्रस्थानेषु अलङ्कारा इत्थं नाभ्यचर्यन्ते प्रत्युतेमे काव्यस्य उत्कर्षाधायका एव भवन्ति न तु स्वरूपाधायकाः। दण्डिनालङ्काराः काव्यशोभावर्धकधर्माः प्रोक्ताः। इत्थमेव रीतिप्रस्थानपरमाचार्येण वामनेनालङ्काराः काव्यशोभातिशायकाः प्रोक्ताः। काव्येऽलङ्कारान् उत्कर्षाधायकम् अस्थिरधर्मत्वञ्च अधिकुर्वतामाचार्णाम् अभिकथनमस्ति यदनलङ्करणेनशरीरस्थाः समवेतधर्मास्तु न नश्यन्तेपरमलङ्करणेनालङ्कार्यम्-आशुरेव लोकातिगोचरीभवति। अत एव काव्येऽलङ्काराणां स्थितिरपरिहार्या वर्तते। इमे काव्योत्कर्षाधायकत्वेनैव काव्यस्थागृहीताः, अन्यथा तु काव्ये वैचिर्त्यमात्रमेव भवन्ति। एतदर्थमलङ्कारा अस्थिरकाव्यधर्मत्वेन अङ्गीक्रियन्ते। एतत् तत्थ्यं स्पष्टकर्तुम्मम्मटाचार्येण प्रोक्तकाव्यलक्षणं विपश्चिद्भिः पोपूज्यते। आचार्यस्य प्रज्ञावर्धकं चिन्तनं विद्यते यदलङ्काराः जातुचिद्रसमुपकुर्वन्ति, न तु सदा( मम्मट 1.3)। अत एवैते अलङ्काराः काव्यस्यास्थिरधर्मत्वेन गृह्यन्ते। साहित्यदर्पणे आचार्यविश्वनाथोऽलङ्कारस्य लक्षणमवोचद्यद्अलङ्काराः काव्यशरीरस्थयोः शब्दार्थयोः शोभाविवर्धका-अथ च रसादीनामुपकरिष्णवः

काव्यस्यास्थिरधर्मा भवन्ति। परं काव्ये अलङ्कारा अस्थिरधर्मत्वं भजन्त इति विचारो न सकलसहृदयहृद्ग्राहितां स्पृशति । अलङ्कारप्रस्थान एते अलङ्कारास्तु काव्यस्यापरिहार्यधर्माः स्थिरतत्त्वञ्च मन्यन्त एव। अलङ्काराणां स्थितिविषये मतवैभिन्यं भवतु वा परम् अलङ्काराणां यद् विभाजनं वर्तते तत्प्रायः काव्यशास्त्र-सामान्ये सर्व एकस्वरेणाधिकुर्वन्ति। प्रायः सर्व आचार्याः शब्दार्थौ काव्यमित्यङ्गी कुर्वन्ति। अलङ्कारः काव्यशरीरस्य शोभाधायको भवति। अत एव काव्ये अलङ्कारः शब्दार्थयोरुत्कर्षाधायको धर्मोवर्तते।

अर्थादलङ्कारस्याधारौ शब्दार्थौ स्तः। इत्थमेवशब्दालङ्कारः, अर्थालङ्कारोऽथ चैतदुभयमिश्रितालङ्कार उभयालङ्कार इत्यालङ्कारस्त्रोधाभिहितम्। शब्दालङ्काराणाम् अर्थालङ्काराणाञ्च भेदः शब्द परिवृत्ति-सहत्वेनिर्बिभर्ति। शब्दपरिवृत्यसहत्वं शब्दालङ्कारत्वं-शब्दपरिवृत्तिसहत्वमर्था-लङ्कारत्वम्। शब्दार्थावुभयाश्रितौ वर्तेते, यत्र शब्दप्राधान्यं तत्रार्थोऽङ्गतां नयति तथा च यत्रार्थप्राधान्यं तत्र शब्दोऽङ्गतां भजतेऽन्योऽन्याश्रितावेतौ शब्दार्थौ ।

**शब्दप्रमाणवेद्यर्थो व्यनक्त्यर्थान्तरं यतः।**
**अर्थस्य व्यञ्जकत्वे तच्छब्दस्य सहकारिता।।**

**अलङ्काराणां प्रमुखवर्गीकरणम्-**

एतत्तु निर्विवादेन प्रसिद्धं यदाचार्यभामहेनैव प्रथमं काव्यशास्त्रेऽलङ्काराणां विशदी चर्चाकारि। तत्पश्चाद् विभिन्नविद्वभिः काव्येऽलङ्काराणां स्वरूपं व्यमर्शि। ततः परमेवालङ्कारविभाजनविषये आचार्येषु-मतभेदावर्धितः। काव्यस्य बाह्यस्वरूपप्रतिपादकैराचार्यै 'शब्दार्थौ काव्यमध्यकारिषातामपरैः केवलं शब्दः काव्यमन्यैश्चार्थमेव काव्यमिति प्रत्यस्थायि। वस्तुतोऽलङ्कारः काव्यशरीरस्थयोः शब्दार्थयोरुत्कर्षाधायको भवति- अतोऽलङ्कार' शब्दार्थाश्रित उच्यते । एतदाधृतमेव प्रारम्भे कैश्चनाचार्यैः केवलं शब्दालङ्कारः स्वीकृतस्तथा च कैश्चनार्थालङ्कारोऽभ्यर्चितः। ये शब्दालङ्कारमात्रं स्वीकुर्वन्ति तेषां तर्कणास्ति यच्छब्दो यदा श्रुतिगोचरो भवति तदैवार्थप्रतीतिः सम्भवति न चौतमन्तरेण कथमपि अर्थप्रतीतिर्भवितुमर्हति। शब्द एव सहृदयहृदयहरिणहारी भवत्यतः काव्ये-शब्दालङ्काराः प्राधान्यं भजन्त इति तैः प्रोक्तम्। एतद्विपरीतं काव्ये केवलम् अर्थालङ्कारान् एव स्वीकुर्वतां सारस्वती

मेधास्ति यत्काव्यजा आनन्दानुभूतिर्वस्तुतोऽर्थप्रतीतिमनुगच्छति अतः अर्थाश्रितचमत्कृतिरेव काव्यानन्दानुभूतेरव्यवहितोपकारको भवितुम्पारयति अतोऽर्थालङ्कार एव काव्यशोभायाः जनकोऽस्ति। अलङ्कारस्य व्युत्पत्तिमाचार्यकुन्तकश्च स्वस्मिन् ग्रन्थे प्रतिपादयाञ्चकार- केचिद्कविकौशलकल्पितसौन्दर्यातिशयशालिशब्द एव काव्यमिति वदन्ति अपरे रचनावैचित्र्यचमत्कारिणमर्थमेव काव्यमुदीरयन्ति। इत्थं शब्दःकाव्यमिति मतावलम्बिभिराचार्यैः काव्ये शब्दालङ्कारस्य उपादेयत्वमध्यक्रियत अथ चान्यैरर्थालङ्कारस्य महत्त्वम्प्रोक्तम्। आचार्यभामहेन शब्दार्थ रामणीयकमनुभवतः शब्दालङ्कारश्चार्थालङ्कार उभयविध एवालङ्कारोऽभीष्ट इति प्रतिपादितम्। ततः परं समैरेव उभयविधालङ्कारात्मको विचारोऽध्यग्राहि। अनन्तरमाचार्यैः काव्य एतयोर्द्वयोरपि शोभाजनकतां स्पृश्यैव अलङ्कारविषयिणी चर्चा उरीकृता तथालङ्काराणां सङ्ख्यापि-अनेनहेतुनैववरिवृधीति। प्रारम्भ आचार्यैः अलङ्काराणांशब्दोऽर्थश्चेति भेदद्वयमेवस्वीकृतं किञ्च एतयोः आन्तरिकविभाजने न कस्यापि दृष्टिर्गता, प्रप्रथमम् एतयोर्वैज्ञानिकविभाजनमाचार्यरुद्रटेनैव विहित-एतद्विभाजनं नूनमेव काव्यं सुदृढीकरोतितराम्। एनेन शब्दालङ्कारः पञ्चधेति प्रोक्तम्। सर्वादौ वक्रोक्तिस्तत्परमनुप्रासः, यमकम्, श्लेषः चित्रालङ्कारश्चेति वर्णितमथैतेषाम्भेदोपभेदमपि आचार्येण-उदीरितम्। यद्यपीतः पूर्मप्येतेषाम् अलङ्काराणां भेदोपभेदं भामहादिवचोगर्भितंपरं रुद्रटेन एतेषाम् अलङ्काराणां नवीनोपभेदाः समावीक्ष्य इमे समे भेदाः प्राक्तनापेक्षा सारल्येन चेतिताः। अर्थालङ्कारनिरूपणे 57 अलङ्कारा वर्णिता अमीषु 26 अलङ्कारा एव पूर्वाचार्यैर्निगदिताः। यद्यपि 31 नवीनालङ्काराः प्रतिपादितास्तथापि रुद्रट एवैतेषां जनको वर्तत इति न वक्तुं पारयते प्रत्युतेदं तर्क्यते यद्रुद्रटः कस्यचिदीगाचार्यवर्गात् प्रभावितस्याद्ये प्रसिद्धप्रस्थानातिरिच्य अन्यदपि तत्त्वमुरीकृत्य काव्यशास्त्रीयतत्त्वेषु विचारं व्यम्राक्षुः यतोहि एतेऽलङ्कारा आचार्यैकप्रणीता स्युरिति कल्पना न सम्भवति सामान्यतः विशालमौलिककृतित्वम् एकेन कर्तुमशक्यमिति प्रतीयते। अत आचार्यरुद्रटो यद्यप्येतदलङ्काराणां प्रणेता न स्यात् तथाप्येतान् नूतनालङ्कारान् एकत्रीकृत्यसर्वप्रथमं काव्यशास्त्रीयपरम्परायां सङ्ग्रहीतुम् आचार्यरुद्रटः अवश्यमेव कीर्त्यते (मिश्र 155)। एनेनार्थालङ्कारश्चतुर्धेति सर्वथा नवीनप्रकारेण विभाजनं

प्रास्तावि। आचार्येण वास्तवौपम्यातिशयश्लेषाख्याश्चत्वारः अर्थालङ्कारा वर्गीकृताः। वास्तवे 23 अलङ्काराः, औपम्ये 21 अलङ्काराः, अतिशये 12 अलङ्कारा अथ च श्लेष एक एवालङ्कारश्चोदीरितः। इत्थमाचार्यरुद्रटः 57 अर्थालङ्कारान् विशिनोति।यत्र वस्तुस्वरूपं पुष्टार्थमविपरीतमनुपमानमनतिशयम-श्लेषमिति विधीयते तत्र वास्तवम् इति अलङ्कारो भवति। वर्गेऽस्मिन् प्रमुखत्वेन-सहोक्तिः, समुच्चयः, जातिः, यथासङ्ख्यम्, अनुमानम्, दीपकः, परिसंख्या, व्यतिरेकप्रभृतयः अलङ्काराः समाहिताः। वस्तुस्वरूपं सम्यक्प्रतिपादनोन्मुखतया तत्सदृशद्वितीयवस्तुवर्णनं वक्त्रा यत्र विधीयत अद औपम्यम्। वर्गमेनम् - उपमा, उत्प्रेक्षा, रूपकम्, समासोक्तिः, अर्थान्तरन्यासः, आक्षेपः, दृष्टान्तः, सहोक्तिप्रभृतयः अलङ्काराअलङ्कुर्वन्ति। चतुर्थभेदः अनेकार्थकपदै रचिताद् वाक्यैकाद् अनेकार्थस्य निश्चयो यत्र विधीयत असौ अर्थश्लेष इति। इत्थमाचार्येण काव्य एतानि विभाजनानि प्रास्ताविषत। श्लेषात्पूर्वमतिशयाख्यम् अलङ्कार-वर्गमाचार्योऽवोचत्परमतिशयालङ्कारस्य विस्तृतविवेचनमेवैतच्छोधपत्रस्य विवेच्यो विषयोऽस्ति अतस्तदग्रे विस्तरेणवक्ष्यते-

**काव्य अतिशयमूलकालङ्कारः**

आचार्यरुद्रटोऽतिशयमूलकालङ्कारं निरूपयँल्लिखति यद्यत्रकश्चिदर्थः स्वधर्मं परिभाव्य प्रसिद्धेः वशाद् लोकातिक्रान्तविपरीततां लभते तत्र अतिशय इति। अर्थाद् यद् वस्तुवर्णनमतिशयत्वेन विधीयत असावेवातिशयता प्रोक्ता। अस्मिन् समूहे द्वादशालङ्कारा अधिकृताः यथाक्रमम्- पूर्वः, विशेषः, उत्प्रेक्षा, विभावना, तद्गुणः, अधिकम्, विरोधः, विषमः, असङ्गतिः, पिहितः, व्याघातः, हेतुः इति 12 अलङ्काराः प्रतिपादिताः। एतेषु प्रथमः पूर्वालङ्कारः अस्ति एतल्लक्षणावसरे कथ्यते यद्यत्रातिप्रबलत्वकारणाद् उत्पन्नपदार्थस्य वर्णनम्पूर्वं विधीयते तदनन्तरम् उत्पाद्यस्योत्पादकपदार्थवर्णनं विधीयत असौ पूर्वालङ्कारः अभिहितः। अर्थाद्यत्र कार्यकारणपौर्वापर्यव्यतिक्रमो विवक्ष्यते तत्रासावलङ्कारो भवति। अत एवायमतिशयगर्भोऽलङ्कारो मन्यते । विशेषालङ्कारं स्पष्टं कुर्वन्नाचार्य आह यद् यत्र-निश्चिताश्रयसम्पन्नं वस्तु अनाश्रितमेव भण्यते तथा यत्र आधाराधेयत्वं सम्भवत्यपि कविप्रतिभया तन्नियम्यते तत्र विशेष इत्याख्यः कश्चिदलङ्कारो भवति। अस्य भेदत्रयमाचार्यरुद्रटेन उक्तम्। प्रथमो भेदः-यत्राधेयभूतवस्तुन

आधारस्सन्नपि वस्तुतः तन्निराधारत्वेन कल्प्यते तदाद्यम्। द्वितीयो भेदो वर्ततेयत्रानेकेषु अधिकरणेषु एकस्य वस्तुन एककालावच्छेदेनसद्भावः प्रतिपाद्यते तद्द्वितीयः। यत्र कर्ता अन्यद् कार्यं कुर्वन् तत्क्रियावधावेव काचिदन्यामशक्यां क्रियां करोतीति तत्तृतीयो वर्तते। एतत्त्रयाणामपि लक्षणं सर्वथा नवीनं वर्तते। आचार्य उत्प्रेक्षालङ्कारविषये वक्ति यद् यत्र पदार्थातिशये सति असम्भवक्रियायाः सम्भवीकरणमुच्यते वाविद्यमानक्रिया विद्यमानतामधिगच्छतिइत्युत्प्रेक्षा। विभावनालङ्कारमतिशये निरूपयताचार्येण लक्षणमित्थं व्यधीयत- यत्र दृश्यमानं वस्तु अहेतुमत् स्थाप्यते तत्र विभावनाइत्युच्यते। अस्या द्वितीयो भेदोविद्यते यद्यत्र वस्तुविकारः, विकारोत्पादकपदार्थंविहायैव प्रस्तूयते तद्द्वितीयः। विभावनाया अन्यो भेदोऽस्ति- यदि कस्यचिदर्थस्य यद्धर्मः समवायसम्बन्धेनलोके प्रसिद्धो वर्तते तथापि तादृग्धर्मः काव्येयदि अन्यस्मिन्नर्थेसंस्थाप्यतेतर्हि तद् विभावनायाः तृतीयो भेदः अधिकृतः। अस्य वर्गस्य अलङ्कारेषु तद्गुणालङ्कारो अतीव प्रथितः तस्य लक्षणमस्ति यद् ये पदार्थाः लोके परस्परं योगरूपेण पश्यति सति विभिन्नरूपतामवाप्नुवन्ति ते गुणैकमात्रपदार्थाः यदि काव्ये कविप्रतिभयान्येषां वस्तूनां संसर्गेऽपि विभिन्नरूपतां न अवाप्नुवन्ति तर्हितत्तद्गुणालङ्कारोभवति। अस्यान्यभेदः विद्यते-कश्चित्पदार्थः अन्यपदार्थस्य संसर्गवशात् स्वस्वरूपाद् भिन्नरूपं यदा लभतेतद्द्वितीयः। अधिकनामकालङ्कारस्य द्वौ भेदावाचार्येण प्रत्यपादिषाताम्। यत्रैकस्मादेव कारणात् परस्परं विरुद्धस्वभावस्य विरुद्धक्रियायाश्च पदार्थस्य प्रादुर्भावो वर्ण्यते तत्र-अधिकम्-इत्याख्यः अलङ्कारः अङ्गीकृतः। प्रस्तुतालङ्कारस्य प्रकारान्तरं ब्रवीति यद्यत्र महत्याधारेऽपि स्वल्पाधेयस्य आधाराधेयान्वयो न सम्भवति तद्द्वितीयः। अस्यालङ्कारस्य स्वरूपोद्भावनायाः श्रेय आचार्यरुद्रटाय दीयते।

विरोधवर्णनावसरे कथ्यते- यत्रैकस्मिन्नैवाधारे परस्परविरुद्ध-द्रव्यादीनामवस्थानं निरूप्यते तत्र विरोधालङ्कारः भवति। सजातीय विरोधः गुणविरोधः, क्रियाविरोधः यद्रच्छाविरोध इत्थं चतुर्धायमुच्यते परञ्च सजातीयेतरेभ्यः विरोधवशादयम् इतोऽपि पञ्चधा वर्तते। विषमालङ्कारो नवीन एव प्रतिभाति। यत्र कार्यकारणगुणेषु उत कार्यकारणक्रियासु परस्परं विरोधो भवति सविषमालङ्कारः उच्यते। असङ्गत्यलङ्कारस्य धारणापिरुद्रटस्यैव मौलिकोद्भावना वर्तते।

विषमासङ्गत्योर्भेदोऽयं वर्तते यद्विषमालङ्कारे कार्यकारणगुणेषु क्रियासु च विरोधो भवति परमसङ्गतौ एकस्मिन्नैव काले कार्यकारणयोः भिन्नाधिकरणत्वं कल्प्यते। लोके कार्यकारणयोः सामानाधिकरण्यमेव भवति परमसङ्गतौ कविप्रतिभया एतद्विपरीतं प्रतिपाद्यते, अपरत्र सद्भाववर्णनेन या चमत्कृतिरुत्पद्यते तस्मिन्नेव अलङ्कारत्वम्मतम्। यदा कश्चिद्गुणः स्वाश्रये विद्यमानम् अन्यमर्थमाच्छादयति तदापिहितालङ्कारःभवति। पिहिते कस्यचिद् वस्तुनः तिरस्कारो नियमनं वा असमानगुणवतः पदार्थान्तराद्भवति। अयमलङ्कारोऽपि आचार्यरुद्रटेनैवोद्भूतः। यत्र कार्योत्पादकस्य अवरोधितत्त्वस्याभूते सत्यपि कार्यं नोत्पद्यते तत्रव्याघातालङ्कारः प्रतिगृहीतः । यत्र वस्तुविकारस्य बलवद्धेतोः विद्यमाने सति कस्मिँश्चिद् वस्तुनि स्थैर्यप्रभावाद्विकारो नोत्पद्यते तत्र-अहेतु इत्यभिधेयोऽलङ्कार-उपात्तः। अहेतावपि व्याघातसदृश एव मूलतो हेतुसद्भावे कार्याभावो वाञ्छनीयः। वस्तुतो रुद्रटेन प्राचीनानामाचार्याणां विशेषोक्त्यलङ्कारो साक्षाद् न अग्राहि परमेतस्य अलङ्कारस्योपक्षां विधातुं न अपीपरद्। व्याघाताहेतू नामकावलङ्कारौ विशेषोक्तिस्वरूपाधृतावेव वर्तेते।

**निष्कर्षः-**

अतिशयवर्गस्यालङ्काराणां स्वरूपसमीक्षयैव स्पष्टीभवति यद्रुद्रटेनास्मिन् वर्गेऽनेकेषामलङ्काराणां स्वरूपस्य कल्पना स्वातन्त्र्येण व्यधायि। विशेषादयोऽलङ्कारा एतत् प्रमाणीकुर्वन्ति। 'काव्यालङ्कारे विविक्ता नवीनाभिधेयभूतालङ्कारास्तु प्राक्तनमनीषिमनीषाच्छायास्सन्ति परमेतेषां सामान्यविशेषस्वरूपस्य कल्पनाचार्यस्य स्वतन्त्रान्वेषणं विद्यते। अतिशयवर्गस्य विभावनालङ्कारस्य सामान्यप्रकृतिः पूर्ववर्तीनाम् आचार्याणां विभावनयाभिन्नास्ति। हेत्वभावे कार्यसद्भावो विभावनाजनकः स्वीक्रियते। अभावशब्देनौ नैकार्थाधारेणविभावनाया अनेकभेदः कल्पितः। विशेषस्यापि यद्भेदा आचार्येण प्रदर्शितास्ते मम्मटादिभिस्तथा न स्वीकृता परवर्तिभिराचार्यैरयमलङ्कारः अनुक्तनिमित्तम्, उक्तनिमित्तम्, अचिन्त्यनिमित्तमित्यादिरूपैः वर्णितः। वस्तुतः रुय्यकस्य अलङ्काराणांयद्वर्गीकरणं वर्तते तदत्यन्तमुचितं वैज्ञानिकं च वर्तते परं रुय्यकादिनामलङ्कारवर्गीकरणभवनस्य भूरिव भूमिकाचार्यरुद्रटेनैव प्रदत्तम्। इत्थमाचार्यरुद्रटस्यातिशयमूलकालङ्काराणां स्थानमद्वितीयं विद्यते। एतदलङ्काराणां विशेषतास्ति यदेतेष्वतिशयशब्दार्थं प्रयुज्यकाव्यमलङ्कारिकं

प्रभावशालि च विधीयते ये काव्येऽलौकिकचमत्कारकारिणः रसानत्यधिकं पुष्णन्ति तथा सहृदयानाम् ब्रह्मास्वादसहोदरानुभूतिरपि भवति। एषामलङ्काराणां सन्निवेशेन कविप्रतिभया काव्ये विशेषसौन्दर्यसञ्चारो भवति। एतेऽलङ्काराः कविवर्णनाशक्तिम्मनोरचनात्मकताञ्च व्यक्तीकरोति येनकविः स्वीयभावनाम् अत्यधिकप्रभावशालितयाभिव्यनक्ति। अतः काव्य एतेषाम् अलङ्काराणामुप्रयोगो न केवलम् अलङ्कारिकसौंदर्यस्य प्रतीको विद्यते, प्रत्युत रसानुभूतेरपि आकरो वर्तते।

**संदर्भ :**

1. *न कान्तमपि निर्भूषं विभाति वनिताननम् – भामह काव्यालंकार 1.13*
2. *अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती। असौ न मन्यते कस्मात् अनुष्णमनलं कृती ।। - चन्द्रालोक 1.8*
3. *काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते।- काव्यादर्श 2.1*
4. *काव्यशोभायाः कर्तारो धर्माः गुणाः तदतिशयहेतवस्त्वलंकारः काव्यालंकारसूत्र 3.1.1-2*
5. *तद्दोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि काव्यप्रकाश 1.3*
6. *उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।*
   *हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः।।- काव्यप्रकाश 8.67*
7. *शब्दार्थयोरस्थिराः ये धर्माशोभातिशायिनः।*
   *रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्।। सा. 50 10/1*
8. *काव्यप्रकाशः 3.23*
9. *केषाञ्चिन्मतं कविकौशलकल्पितकमनीयातिशयः शब्द एव केवलं काव्यम् इति, केषाञ्चिद्वाच्यमेव रचनावैचिर्त्यचमत्कारकारि काव्यम् इति।- वक्रोक्तिजीवितम् (1/7 की वृत्ति)*
10. *शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः।- काव्यालङ्कार (1/15)*
11. *अर्थस्यालंकारा वास्तवमौपम्यतिशयः श्लेषः। एषामेव विशेषा अन्ये तु भवन्ति निःशेषाः।।– रुद्रट काव्यालंकार (सप्तम् अध्याय, कारिका 9)*
12. *वास्तवमिति तज्ज्ञेयं क्रियते वस्तुस्वरूपकथनं यत्। पुष्टार्थमविपरीतं निरूपममनतिशयमश्लेषम्।।- रुद्रट काव्यालंकार (सप्तम् अध्याय, कारिका 10)*

13. सम्यक्प्रतिपादयितुं स्वरूपतो वस्तु तत्समानमिति। वस्त्वन्तरमभिदध्याद्वक्ता यस्मिंस्तदौपम्यम्।।- रुद्रट काव्यालंकार (अष्टम् अध्याय, कारिका 1)
14. यत्रार्थधर्मनियमः प्रसिद्धिबाधाद्विपर्ययं याति। कश्चित्क्वचिदतिलोकं स स्यादित्यतिशयस्तस्य।। रुद्रट काव्यालंकार (नवम् अध्याय, कारिका 1)
15. यत्रातिप्रबलतया विवक्ष्यते पूर्वमेव जन्यस्य। प्रादुर्भावः पश्चाज्जनकस्य तु तद्भवेत्पूर्वम् रुद्रट काव्यालंकार (नवम् अध्याय, कारिका 3)
16. किंचिदवश्याधेयं यस्मिन्नभिधीयते निराधारम्। ता–गुपलभ्यमानं विज्ञेयौऽसौ विशेष इति।।- रुद्रट काव्यालंकार (नवम् अध्याय, कारिका 5)
17. यत्राततथाभूते संभाव्यते क्रियाद्यसंभाव्यम्। संभूतमतद्वति वा विज्ञेया सेयमुत्प्रेक्षा।।- रुद्रट काव्यालंकार (नवम् अध्याय, कारिका 11)
18. सेयं विभावनाख्या यस्यामुपलभ्यमानमभिधेयम्। अभिधीते यतः स्यात्तत्कारणमन्तरेणैव।।- रुद्रट काव्यालंकार (नवम् अध्याय, कारिका 16)
19. यस्मिन्नेकगुणानामर्थानां योगलक्ष्यरूपाणाम्। संसर्गे नानात्वं न लक्ष्यते तद्गुणः स इति।।- रुद्रट काव्यालंकार (नवम् अध्याय, कारिका 22)
20. यत्रान्योन्यविरुद्धं विरुद्धबलवत्क्रियाप्रसिद्धं वा। वस्तुद्वयमेकस्माज्जायत इति तद्भवेदधिकम्।।- रुद्रट काव्यालंकार (नवम् अध्याय, कारिका 26)
21. कार्यस्य कारणस्य च यत्र विरोधः परस्परं गुणयोः। तद्वत्क्रिययोरथवा संजायेतेति तद्विषमम्।।- रुद्रट काव्यालंकार (नवम् अध्याय, कारिका 45)
22. विस्पष्टे समकालं कारणमन्यत्र कार्यमन्यत्र। यस्यामुपलभ्येते विज्ञेयासंगतिः सेयम्।।- रुद्रट काव्यालंकार (नवम् अध्याय, कारिका 48)

●●●

# 10

# मेघदूतप्रयुक्तकाव्यशिल्पसमीक्षा

*बाबूलालः मीना*

कवितावनिताविलासेन कविकुलगुरुकालिदासेन प्रणीते मेघदूताख्ये खण्डकाव्ये विप्रलम्भशृङ्गाररसमधुरिमा पाषाणमपि द्रवीकरोतीवाभाति। काव्यशिल्पप्रयोगनैपुण्येनात्र कविकुलगुरुणा पद्यरूपे मनोभावा अभिव्यक्ताः। प्रकृतिसंयोजनम्, नायकनायिका-मनोदशाविश्लेषणम्, ग्रामीणजीवनचर्याचित्रणम्, वक्रोक्तिपूर्णभाषाप्रयोगः, सूक्तिमयपद्यबन्धः, अलङ्कारचमत्कृतिः, रसमाधुरी, रसभावाभिव्यञ्जना चेति मेघदूतस्य वैशिष्ट्यसम्पादकानि तत्त्वानि सन्तीति वक्तुं नितरां पार्यते। अनयैव धिया सहृदयजनसमुदायानामत्यन्तं हृद्यमस्तीदं काव्यम्। मेघदूतकाव्यचिन्तनेऽसङ्ख्यसङ्ख्यावद्भिर्बहुकालः प्रदत्तः। अत्र सत्यपि चिन्तनमननादिके पुनरप्यध्ययनमपूर्णमिव प्रतीयते। कालिदासस्य काव्यं सर्वदा सर्वथाधीत्यापि शश्वन्नवायत इति तत्काव्यविलक्षणता। अतोऽत्रालेखे कालिदास-मेघदूते काव्यशिल्पः कीदृश इति चर्च्यते।

संस्कृतकाव्यपरम्परायां कनिष्ठिकाधिष्ठितोपाह्वः[1] कविकुलगुरुर्महाकविकालिदासः समस्तेऽपि प्राचीनसंस्कृतवाङ्मयसुरवर्त्मनि दिवाकरायते। तत्कृतकाव्यभणितिभावविह्वला भावका नितरां काव्यानन्दसारग्ना विस्मृतात्मपरिचयाः सन्तो रमन्त इव प्रतीयते। ऋतुविचार-मेघदूत- शृङ्गारतिलक-कुमारसम्भव-रघुवंश-विक्रमोर्वशीयाभिज्ञानशाकुन्तल-मालविकाग्निमित्रादीनां काव्यानां तथा विविधमुक्तककाव्यानां रचयितुः कालिदासस्य काव्यशिल्प-सौन्दर्यास्वादस्य को जनोऽनभिज्ञो भवेदिह। कालिदासमहाकवेः सर्वतः काव्येषु केचन समानाः प्रयोगाः सन्त्यपि कुत्रचित् विशेषरूपेण कथानकानुसारिका शैली शोभितालोक्यते। पौरस्त्यकाव्यचिन्तनसन्दर्भे वीरशृङ्गारयोरङ्गिरसत्वेन स्वीकृता

वीक्ष्यते। 'एक एव भवेदङ्गी शृङ्गारो वीर एव वा'[2] इति मतानुसारमेव कालिदासेनापि स एव मार्गः स्वीकृतः। 'उपमा कालिदासस्य'[3] इति कथनं तु प्रसिद्धमेव। तथैव वैदर्भिरीतिप्रयोगचतुरता कालिदासस्य स्वनामाभिन्ना दृश्यते। लघुसमासशब्दप्रयोगः, भाषिकरसिकता, सूक्तिमयता, अनर्थशब्दप्रयोगविहीनता चेति कालिदासस्य प्रमुखं काव्यवैशिष्ट्यं वर्वर्ति ।

**कथावर्णनशिल्पम्**

कालिदासरचितकृतिष्वनितरसाधारणकाव्यरूपेण मेघदूतस्य चर्चा भूयसी विपश्चिन्मण्डलेषु। एतच्च दूतकाव्यं सन्देशकाव्यं प्रौढप्रतिभापाण्डित्यपरिलसितं समुच्छ्वलितकालिदासकीर्तिपताकं सहृदयहृदयग्रन्थिभेदकं काव्यरत्नं वरीवर्ति संस्कृतकाव्यजगति। काव्यं लघ्वस्ति तथापि भावगाम्भीर्यात् समुद्रायमाणमस्त्येतत्। विप्रलम्भशृङ्गारजन्यशोकभूयस्त्वादत्र प्रेमगीतरूपेण श्लोका दृष्टा इति गीतिकाव्यरूपेण केचन पण्डिताः अस्य चर्चां विदधति। परन्तु संस्कृतकाव्यशास्त्रानुसारमेतस्य स्थानं खण्डकाव्यरूपेणैवास्ति। यथाह विश्वनाथः 'खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि च' इति।।[4] एतत्काव्यं विषयिप्रधानं काव्यमस्ति न तु विषयप्रधानम्, यतो हि यक्षस्यैव मानसी व्यथात्र निःशेषरूपेण वर्णिता। अत्तत्या यक्षाभिव्यक्तिः वियोगजन्यपीडाग्निदग्धहृदयान्निःसृतो धूम इवालोक्यते सहृदयिभिः। अत्र एकविंशत्यधिकशतकल्पाः श्लोकाः सन्तीति न सर्वजनसम्मतं मतम् । परन्तु टीकाकारबाहुल्यादत्राध्ययनमपि विविधकालावच्छिन्नं जातम्। प्रक्षिप्तश्लोकसहितमत्र तत्सङ्ख्यैव श्लोकानां दृष्टमित्यत्र न सन्देहः। इदञ्च काव्यं पूर्वोत्तरमेघरूपेण द्विधा विभक्तम्। अत्र स्वस्वामिकुबेरापराधजन्य-प्रवासकष्टं सहमानस्य पत्नीवियुक्तस्य यक्षस्य विप्रलम्भशृङ्गाररसपूर्णा कथा वर्णितास्ति। तत्र रामगिरिमधिवसता यक्षेणाषाढमासस्य प्रथमदिवसे पर्वतशिखरारूढो मेघो दृष्टस्तेनैव सह स्वसन्देशप्रापणप्रार्थना कृतेति समग्रस्य मेघदूतस्य वर्ण्यविषयः । एतदवधिपर्यन्तमत्र यक्षस्य एकालापशैली सर्वोत्कृष्टायते काव्यजगति। अत्र कालिदासस्य कविप्रौढोक्तिरपि क्वचित्क्वचित् प्रस्तुता। तथापि कविनिबद्धवक्तृप्रौढोक्त्या कालिदासकला कालान्तरस्थायिन्यत्र मेघदूते संस्थितावाप्यते। अत्रत्या प्रेमार्द्रहृदयोद्गीर्णाभिव्यक्तिः, मन्दाक्रान्तावृत्त-सम्बद्धगेयात्मकता, कविकल्पनाप्रचुरता, सहृदयहृदयग्राहिता च कविकाव्यशिल्पद्योतिका दृश्यते । अतः मेघदूते वस्तुवर्णनशिल्पमद्वितीयमस्ति।

विप्रलम्भशृङ्गाराङ्गितया कल्पितकथात्मकेऽस्मिन् काव्ये कालिदासेन सर्वथा हृदयसंवेद्यभावना प्रस्तुता प्राप्यत इति वैलक्षण्यं काव्यस्यास्य ।

**प्रकृतिसंयोजनशिल्पम्**

प्रकृतिसंयोजन–द्दशेदं काव्यमतीव महत्त्वपूर्णं मन्यते। यतो हि प्रकृतिकुक्षावेव कवीनां कल्पनाप्रसवेन प्रसूयते। 'यथास्मै रोचते विश्वं तथेदं परिवर्तते।'[5] इति कविवैशिष्ट्यविशिष्टत्वात्कालिदासस्याप्यत्र प्रकृतिप्रेम सर्वथा वरीवृत्यत एव। रामगिर्याश्रमवर्णनात्प्रारब्धेयं मेघदूतकथा सुन्दरीमलकानगरीं प्राप्य विश्रान्ता। अतः तावदवधिरेवास्य काव्यस्य प्रकृतिः। तत्र मेघस्य मार्गरूपेण वर्णितानि विविधस्थानान्यपि प्रकृतिचित्रणगौरवाद्विभूषितानि प्राप्यन्ते। छायावृक्ष-स्वच्छसरोवर-कुटजवृक्ष-सरसनिचुल-पदार्थसुशोभितस्य रामगिरिप्रदेशस्य वर्णनं प्रकृतिप्रेमाणं कं जनं न द्रवीकुर्यात्। तथैव मेघमार्गे मालक्षेत्रस्य वर्णनमद्वितीयमस्ति तत्र कृषिक्षेत्रत्वसङ्केतोऽपि कविना प्रदत्तः। यथा 'सद्यः सीरोत्कर्षणसुरभि-क्षेत्रमारुह्य मालम्।'[6] इति। आम्रवृक्षाच्छन्नाम्रकूटपर्वतस्य सुषमा समेषां भावकानां हृदये स्वाभाविकरूपेण प्रतिबिम्बं तनुत एव। जम्बूकुञ्जपरिवेष्टितनर्मदाक्षेत्रवर्णनम्, नीचौराख्यपर्वतवर्णनं च मेघदूते महनीयतां द्योतयति । अत्र नीचैःपर्वतशिलावेश्मसु पण्यस्त्रीकृतरतिपरिमलवर्णनं सुष्ठु कृतं दृश्यते-–

**यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा-**
**मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि।।**[7] **इति।**

मेघदूते उज्जयिनीवर्णनं विशेषतः कविकल्पनाचमत्कृतिद्योतकं मन्यते। अत्र विलक्षणप्रतिभापरिणामरूपेण उज्जयिनीप्रदेशच्छटा चित्रिता प्राप्यते। 'विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि।।[8]' इति शृङ्गाररसपूर्णवक्रोक्त्या कविना यक्षमुखादुज्जयिनीवनितासौन्दर्यं वर्णितम्। तथैव निर्विन्ध्याचित्रणम्, शिप्रानदीवर्णनम्, महाकालमन्दिरवर्णनम्, गम्भीरानदीवर्णनम्, देवगिरिवर्णनम्, दशपुरनगरीवर्णनम्, ब्रह्मावर्तवर्णनम्, तथा पूर्वमेघान्ते कैलासस्य वर्णनमद्वितीयमस्ति। उत्तरमेघे च कैलाशादूर्ध्वभागस्थितालकापुरीशोभा रुचिरतया वर्णिता प्राप्यते। मेघदूतस्य प्रकृतिवर्णनशैली विविधविषयस्पर्शिन्यस्ति। अत्र न केवलं प्रकृतिरेव वर्णितापितु तया सह विविधविषयाणां वस्तुतथ्यमपि उपस्कृतं कविधुरन्धरेण। अलकापुरीवर्णने यक्षाणामवस्थितिः, कन्याक्रीडनम्, यक्षाणां

वैशिष्ट्यम्, अलकायां मेघावस्थितिः, स्त्रीणां रतिकेलीक्रीडनम्, अलकोद्यानम्, रात्रिकालप्रयाताभिसारिकाचरितम्, इत्यादयः सर्वेऽपि विषयाः क्रमशः मनोहरशैल्या वर्णिताः। अलकावर्णनप्रसङ्गे अलकासम्बद्धाः अनेके विषया वर्णिताः। तत्र एकस्मिन्नेव काले षड्तुजन्यपुष्पवर्णनात्, षड्तुस्थायित्वं वैलक्षण्यद्योतकं यथा –

**हस्ते लीलाकमलमलके बालकुन्दानुविद्धं**
**नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः।**
**चूडापाशे नवकुरबकं चारु कर्णे शिरीषं**
**सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम्।।[9] इति।**

अन्ततः प्रकृतिप्रयोगशिल्पसन्दर्भे मेघदूतमहाकाव्यमद्वितीयमिवाभाति सहृदयानाम्। अत्र मेघमार्गसम्बद्धस्थानाश्रिता सर्वापि प्रकृतिः कविना महत्त्वपूर्णतया विश्लेषिता। आलङ्कारिकभणितिभङ्गमाधुर्येण चर्चिता मेघदूतप्रकृतिः भूयोभूयः कर्णरसायते भावकानाम्।

**ग्रामीणजीवनचर्याचित्रणम्**

मेघदूते ग्रामीणजनानां चित्रणं कलात्मकरूपेण विहितं विलोक्यते। ग्रामीणमर्यादानुरूपं यक्षकृतमेघस्वागतमपि गृहस्थ—कृतातिथिसत्काररूपं कृत्यं प्रदर्शयति - 'स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार।।[10] इति। एवमेव मेघं दृष्ट्वा विरही जनः लोके जायासङ्गमाभिलाषी भवतीति लोकदृष्टोदाहरणमत्र सकौशलं प्रस्तुतम्।[11] मेघस्य स्थाने स्थाने विश्रम्य गमनाय यक्षेण—कृतानुरोधः मेघस्य मानवीकरणं दर्शयति। मालक्षेत्रस्य वर्णनप्रसङ्गे कृषकवनितानां मेघदर्शनोत्सुकतावर्णनेन तत्रत्यकृषिपरकजीवनचर्यावलोक्यते। एवमेव आम्रकूटपर्वतस्योदारतां वर्णयता कविना यक्षमुखाद् महात्मनश्चरित्रं चित्रितम्, तच्च सामाजिकानामप्युपदेशायते। उज्जयिनीवर्णनप्रसङ्गे सविद्युत्कमेघसौन्दर्यहृतनयनापाङ्गानां वनितानां वर्णनाकौशलं कविप्रतिभालिङ्गकं दरीदृश्यते 'लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि।।[12] ॥इति। अवन्तीप्रदेशस्थवृद्धानामुदयनकथायां निपुणता-वर्णनेन तात्कालिकग्रामीणजीवनं दर्पणे इव दृश्यते । उज्जयिनीस्थस्थविरैः कृतस्य वत्सराज—कृतवासवदत्तापहरणवृत्तान्तस्यापि सङ्केतेन सामाजिकघटना-प्रसङ्गोऽपि उज्जयिनीवर्णनप्रसङ्गेऽन्तर्भूय रुचिरायमाणोऽवगम्यते। रमणवसतिं

गच्छन्तीनां योषितां वर्णनसन्दर्भे मेघ—कृतमार्गदर्शनवर्णनमुज्जयिनीनगरीवैशिष्ट्यं सूचयति। कैलासे सुरवनितानां यन्त्रधारागृहक्रीडा स्वाभाविकरूपेण रमणीयतया वर्णिता, तथैव अलकायां यक्षणां जीवनस्थितिः, तेषां दिनचर्या, तत्—कृतव्यवहारास्तथा यक्षिणीनां लीलादिकमपि सर्वं हृद्यतया वर्णितम् । एतैर्वर्णनैः पौरग्राम्यजीवनचर्यायाः स्पष्टबिम्बं विलोक्यते। अतः स्वाभाविकमनुष्यजीवनवर्णन- कौशले मेघदूतस्य शिल्पमद्वितीयमाभाति ।

**भाषाप्रयोगशिल्पम्**

मेघदूतस्य भाषा सरसा कोमला हृदयग्राहिणी दृश्यते। लघुसमासयुक्त-पदावलीनां प्रयोगेण क्षीणकथाप्रयोगेण भावबाहुल्यसंयोजनेन चास्योद्देश्यं परिपूर्णमिव प्रतीयते। विरहजन्यशोकोद्गीर्णाभिव्यक्त्या भावकानां हृदयार्द्रीकरणमेवास्य प्रमुखमुद्देश्यमवगम्यते। तदुद्देश्यपूरणायात्रत्या भाषा नेषदप्यवरोधिका दृश्यते। नदीतरङ्गसञ्चलनवदेव तरङ्गो भाषायामत्र दृश्यते 'खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र, क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य।'[13] इति। मन्दाक्रान्ताछन्दप्रयोगाद्गेयात्मकतापि काव्ये शोभावर्धिकाव-गम्यते। मेघमपि मानवीकृत्य ततः यक्षद्वारा सन्देशप्रापणकार्यनियोजनावसरे कृतस्वागतकार्ये कविना मधुरा भाषा साधुसम्मतातिथेयानुसारिणी प्रयुक्ता 'प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार।'[14] इति ।एवमेव यक्षस्य वचनशैली स्वाभाविकी सरला च विद्यते। मेघप्रार्थनावसरे यक्षद्वारा प्रयुक्ता भाषा क्लेशरहिता, भावनाभूमिनिःस्यन्दिनी सहृदयहृदयगम्यालोक्यते। मध्ये मध्ये विविधघटना-वर्णनसन्दर्भे सूक्तिमयालङ्कारिकव्यङ्ग्यमयवाक्पटुतयाभिव्यक्तिरभिहिता दृश्यते। अन्त्ये यक्ष कृतमङ्गलासुशानमाशीर्वचनं वा मेघदूतकाव्यस्य भाषासौन्दर्य-मुज्ज्वलयति 'मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः।।'[15] इति। एवमेव मेघदूते भाषिकशिल्पवैशिष्ट्यं बहुविधतया भासते। क्वचित् सूक्तिमयवचनेन चेत् क्वचिदालङ्कारिकवचनरचनेन, क्वचिच्च व्यङ्ग्यात्मकशैलीमाधुर्येण चेत् कुत्रचित् वक्रोक्तिपरकमधुरिम्णापि मेघदूतकाव्यस्य भाषिकशिल्पमुद्दीप्यते।

अत्र सूक्तिप्रयोगोऽपि भिन्नतया भाषिकचमत्कारिकतां द्योतयति। मेघदूतेऽनेका सूक्तयः कविना यथावसरं स्वाभाविकरूपेण सुष्ठु प्रयुक्ताः प्राप्यन्ते। 'कामार्ता हि प्रकृति—कृपणाश्चेतनाचेतनेषु।।'[16] इत्यत्र कामार्तो जनः चेतनाचेतनेषु

विवेकं न करोतीति सन्देशः प्रदत्तः। तथैव- 'याञ्च्या मोघा वरमधिगुणे नाधमे लब्धकामा।।[17] 'रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय'[18], 'के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः[19]', 'प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा[20]', 'कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण'[21], 'प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव[22]' इत्येवम्प्रकारेण सूक्तिमयभाषया मेघदूतवर्णितविषयः समुज्ज्वलित इव प्रतीयते।

भाषायां वक्रोक्तिप्रयोगसौन्दर्यच्छटापि क्वचिदनुभूयते मेघदूतकाव्ये। आचार्यकुन्तकेन वक्रोक्तिश्च चत्मत्कारपूर्णकथनमिति लक्षितम्। वक्रोक्त्या एव काव्ये चामत्कारिकता दृश्यते। वक्रोक्तिलक्षणञ्च वक्रोक्तिजीविते-

**उभावेतावलङ्कार्यौ तयोः पुनरलङ्कृतिः।**
**वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते।।**[23] इति।

अतः भङ्गीकथनमेव वक्रोक्तिरिति धियात्र मेघदूतेऽपि विविधप्रसङ्गे कविना स प्रयोग कृतो दृश्यते- 'कश्चित्कान्ताविरहगुरुणा' इत्यत्र 'कश्चित्'-शब्दप्रयोगचमत्कारः काव्ये किमपि चमत्काराधायकः प्रतीयते। तथैव 'धूमज्योतिसलिलमरुतां सन्निपातः मेघः क्व?, पटुकरणैः प्राणीभिः प्रापणीयः सन्देशार्थश्च क्व?' इत्यत्र क्वशब्दप्रयोगपुरः सरं क्रियाविहीनप्रयोगः उक्तिवैचित्र्यं प्रकटीकरोति। तथैव विविधस्थानेषु वक्रोक्तियुक्तप्रयोगेषु सत्स्वपि मेघ कृतसन्दृशश्रावणारम्भे प्रयुक्तं कथनं महत्त्वपूर्णं विद्यते। यथा -

**भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं**
**तत्सन्देशैर्हृदयनिहितैरागतं त्वत्समीपम्।**
**यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां**
**मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि।।**[24] इति।

अत्र 'अविधवे!' इति पदस्य चामत्कारिकता सहृदयानाममन्दमानन्दमातनोति। अत्र 'तव पतिः जीवित एवास्ते' इति व्यञ्जना च एतस्मात्कथनाद्बुद्ध्यते। अतः पतिजीवितत्वकथनस्य शब्दवाच्यता नावश्यकी। एकशब्दचमत्कारेणैव जीवितभर्तृकत्वं यक्षिण्याः सुस्थितम्। एवमेव 'हन्तैकस्मिन् क्वचिदपि न ते चण्डि सादृश्यमस्ति[25]' इत्यादिस्थलेष्वपि ता–दृशचमत्कारः प्रतीयते। अन्ततः- 'एतत्कृत्वा प्रियमनुचितप्रार्थनावर्तिनो मे सौहार्दाद्वा विधुर इति

वा मय्यनुक्रोशबुद्ध्या ।' इत्यत्र 'सौहार्दाद्वा विधुर इति वा' इति पदावली सहृदयहृदयं कारुण्यरसेन द्रवीकरोत्येव । अतः एवम्प्रयोगा मेघदूते बहुस्थलेषु दृश्यन्ते ।

**ध्वनिप्रयोगशिल्पम्**

ध्वनिप्रयोगसन्दर्भोऽपि वक्रोक्तिरिव विविधपरिवेशप्रकरणेऽत्र दृश्यते। तल्लक्षणमानन्दवर्धनेनेत्थं प्रतिपादितं ध्वन्यालोकग्रन्थे- –

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।**

**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ।।**[27] इति ।

काव्ये व्यङ्ग्यप्रधानकथनमेव ध्वनिरित्युच्यते। स च वाच्यादुत्कृष्टश्चमत्काराधायको भवतीति काव्ये तस्योत्कृष्टाधायकता सिद्ध्यति। अत्र 'कनकवलयभ्रंशरिक्तप्रकोष्ठः'[28] इति विशेषणाद्यक्षस्य वियोगशोकोपलक्ष्यमाण दुर्बलत्वं व्यज्यते । 'मन्दं मन्दं नुदति पवनश्चानुकूलः.........................[29]' इति पद्ये पवनचातकबलाकानां मेघसेवनवर्णनाद् मेघयात्रायाः सुखकारित्वं ध्वन्यते। 'निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः.... सतामीप्सितार्थक्रियैव ।'[30] इत्येवम्प्रकारेण बहुत्र ध्वनिप्रयोगः काव्येषु दृश्यते ।

**अलङ्कारप्रयोगशिल्पम्**

एवमेवालङ्कारमयभाषाप्रयोगे मेघदूतस्य महनीयता वर्णनातीता वर्तते। मम्मटकृतं 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि'[31] इति काव्यलक्षणानुसारमस्मिन् काव्येऽपि अलङ्कारस्य काव्यशोभाधायकत्वात्कापि रमणीयताह्लादयति भावकहृदयम्। 'अलङ्कारविहीना तु विधवेव सरस्वती' इति उक्तिमनुशीलयता कालिदासेनापि समस्तेऽपि काव्येऽलङ्कारस्य प्रयोगः कृतः। अत्रापि उपमा-रूपकोत्प्रेक्षार्थान्तरन्यासादीनामलङ्काराणां भूयान् प्रयोगो दृश्यते। अलङ्कारसंयोजनशिल्पित्वेन कालिदासकवेर्महनीयता श्रेष्ठता च विद्यते संस्कृतकाव्यजगति। अत्र मेघदूते चालङ्कारस्य मनोरमः प्रयोगो दृश्यते 'कुसुमसदृशं प्रणयि हृदयम्'[32], 'प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः'[33] इत्यादिषु बहुस्थलेषु उपमायाश्चमत्कारो दृश्यते चेत्, 'वप्रक्रीडापरिणतगजप्रेक्षणीयम्'[34], 'मध्ये श्यामः स्तन इव भुवः'[35] इत्यादिषु स्थलेषु उत्प्रेक्षाया रमणीयता वर्तते। एवमेव 'विद्युत्कलत्रः'[36], 'प्रालेयास्रम्'[37], 'सलिलवसनम्'[38] इत्यादिस्थलेषु रूपकालङ्कारस्य छटा शोभिता दृश्यते। एवमेवार्थान्तरन्यासस्य प्रयोगो विविधसूक्तिप्रयोगसन्दर्भे जातो दृश्यत इति ।

**रसप्रयोगशिल्पम्**

रसप्रयोगदृशा मेघदूते शृङ्गाररसस्याङ्गित्वं दृश्यते। विश्वनाथोक्तम् 'वाक्यं रसात्मकं काव्यम्'[39] इति लक्षणं कालिदासकाव्येष्वपि लक्षितं प्राप्यते। अत्र विप्रलम्भशृङ्गारस्याङ्गित्वेऽपि सम्भोगशृङ्गारस्य वर्णनं कविना कृतं दृश्यते यथा-–

**तस्याः किञ्चित्करधृतमिव प्राप्तवानीरशाखं**
**नीत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम्।**
**प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि**
**ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः।।[40] इति।**

अत्र गम्भीरनद्याः नायिकात्वं कल्पयित्वा मेघरूपनायकस्य सम्भोगशृङ्गाररसपरिपाकावस्था वर्णिता। 'ज्ञातास्वाद'-इति शब्दप्रयोगेनात्र सम्भोगाख्यशृङ्गाररसोऽभिव्यक्तः। तथैव 'मन्द्रस्निग्धैर्ध्वनिभिरबलावेणि-मोक्षोत्सुकानि।।[41]' इत्यादिनापि सम्भोगशृङ्गारस्यैव मधुरिमाभिव्यक्तः। एवमेव विशेषतो विप्रलम्भस्यैवात्र प्रयोगो द्योतयत्येतत्पद्यम् 'क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः'[42] इति। अनया रीत्यात्र मेघदूते विप्रलम्भशृङ्गाररसः प्रामुख्येन भासते।

मेघदूतखण्डकाव्यं कालिदासस्याद्वितीयप्रतिभामण्डितं कवित्वशिल्प-प्रवर्धितं काव्यमस्ति। अत्र कविकुलगुरुणा कवितावनिताविलासेन कालिदासेन यक्षेश्वरशापाद्वनितावियुक्तस्य यक्षस्य विप्रलम्भशृङ्गारच्छटा वर्णिता। अतः विप्रलम्भशृङ्गाररसस्याङ्गित्वेऽत्रत्या कथा निष्पन्ना। नायकप्रधानभूतेऽस्मिन् काव्ये कविना चेतनाचेतनयोः प्रेषकप्रेष्यभावं कल्पयता प्रकृतेरपि मानवीकरणं कृतम्। कतिपयघटनावर्णनसन्दर्भे कविना प्राकृतिकवस्तूनामपि मानवीकरणं कृतम्। एतत्कौशलं कालिदासजं बहु शोभितं दृश्यते। उपमोत्प्रेक्षारूपकालङ्कार-प्रयोगमाध्यमेन, वक्रोक्तिप्रयोगेण, व्यङ्ग्यात्मकभाषाविस्तारेण वा नायकं यक्षं पुरस्कृत्य कविनोज्जयिनीमलकां च वर्णयित्वा स्वकल्पनाशिल्पं प्रादर्शि। विरहावस्थाप्रेरितप्रेमपूर्णां कथां परिकल्प्य प्राकृतिकतत्त्वानामपि मानवीकरणं कृत्वा आलङ्कारिकभाषया लोकप्रचलितपरम्परानुस्यूतव्यवहारवर्णनपुरः सारमत्र मेघदूते मेघमार्गस्थप्रकृतीनां ग्रामाणां भवनानां गिरिशिखराणां वननदीनां च वर्णनं कृतम्। नगरवनितानामलकासुन्दरीणां वर्णनेन कविना शृङ्गारप्रयोगकौशलमपि प्रादर्शि।

एवमेव विपुलकाव्यतत्त्वानां यथोचितप्रयोगशिल्पेनैव समष्टितः मेघदूतकथा सुरम्या जातेति न कश्चित् सन्देहः। अतः सुतरां वक्तुं शक्यते यत् मेघदूतमिदं काव्यं कविशिल्पप्रदर्शकम्। इति ।

**संदर्भ :**


1. *पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः।*
   *अद्यापि तत्तुल्यकवेरभावात्कनिष्ठिका सार्थवती बभूव। इति सूक्तिः प्रसिद्धा।*
2. *साहित्यदर्पणः, 6/10 ।*
3. *प्रसिद्धसूक्तिः ।*
4. *साहित्यदर्पणः, 6/329।*
5. *प्रसिद्धसूक्तिः।*
6. *मेघदूतम्, पूर्वमेघः, 16 ।*
7. *मेघदूतम्, पूर्वमेघः, 25 ।*
8. *मेघदूतम्, पूर्वमेघः, 27 ।*
9. *मेघदूतम्, उत्तरमेघः, 2 ।*
10. *मेघदूतम्, पूर्वमेघः, 4 ।*
11. *मेघदूतम्, पूर्वमेघः, 8 ।*
12. *मेघदूतम्, पूर्वमेघः, 27।*
13. *मेघदूतम्, पूर्वमेघः, 13।*
14. *मेघदूतम्, पूर्वमेघः, 4 ।*
15. *मेघदूतम्, उत्तरमेघः, 52 ।*
16. *मेघदूतम्, पूर्वमेघः, 5 ।*
17. *मेघदूतम्, पूर्वमेघः, 6।*
18. *मेघदूतम्, पूर्वमेघः, 20 ।*
19. *मेघदूतम्, पूर्वमेघः, 54।*
20. *मेघदूतम्, उत्तरमेघः, 30।*
21. *मेघदूतम्, उत्तरमेघः, 46।*
22. *मेघदूतम्, उत्तरमेघः, 51।*

23. वक्रोक्तिजीवितम्, 1/10।
24. मेघदूतम्, उत्तरमेघः, 30।
25. मेघदूतम्, उत्तरमेघः, 41।
26. मेघदूतम्, उत्तरमेघः, 52 ।
27. ध्वन्यालोकः, 1/13 ।
28. मेघदूतम्, पूर्वमेघः, 2।
29. मेघदूतम्, पूर्वमेघः, 9।
30. मेघदूतम्, उत्तरमेघः, 51।
31. काव्यप्रकाशः, 1/4।
32. मेघदूतम्, पूर्वमेघः, 10।
33. मेघदूतम्, उत्तरमेघः 26।
34. मेघदूतम्, पूर्वमेघः, 2।
35. मेघदूतम्, पूर्वमेघः, 18।
36. मेघदूतम्, पूर्वमेघः, 38।
37. मेघदूतम्, पूर्वमेघः, 39।
38. मेघदूतम्, पूर्वमेघः, 41।
39. साहित्यदर्पणः, 1/3।
40. मेघदूतम्, पूर्वमेघः, 41।
41. मेघदूतम्, उत्तरमेघः, 36।
42. मेघदूतम्, उत्तरमेघः, 42।

# 11
# उत्तररामचरिते रसविचारः

*आशासिंहरावतः*

संस्कृतनाट्यजगति लब्धप्रतिष्ठेन नाटककारेण महाकविभवभूतिना विरचितमुत्तरचरिताख्यं नाटकं करुणरसाद्रीभूतं सहृदयहृदयद्रवनिःस्यन्दकं नयनबाष्पप्रवाहकं रमणीयं नाटकमस्ति । अत्र रामायणस्यैवोत्तरकाण्डान्तर्गता कथा कविकल्पनासंवलिता गुम्फिता । भगवतः श्रीरामचन्द्रस्य कर्तव्यनिष्ठता, सहिष्णुता, राजधर्मश्चात्र अभिव्यक्ता। करुणरसस्याङ्गित्वे विनिर्मितेयं कथा भावकानां चित्तमाद्रीकर्तुं नितरां सामर्थ्यं धत्त इति विद्वांसः प्रमाणम्। अत्रालेखे बहुषु रसेष्वत्र प्रयुक्तेष्वपि करुणरसस्यैव अङ्गित्वं समर्थितमस्ति। ''शोकः श्लोकत्वमागतः'' इत्यनया सूक्त्या रामायणं शोकोद्भूतमिति करुणरसप्रधानम् । तत्कथासम्बद्धमिदं च नाटकं करुणरसप्रधानमेव। नाटकस्याङ्गिरससन्दर्भे कृतिरियं क्रान्तिरिव दरी दृश्यते। अनेन नाटकेन महाकविभवभूतिः बहुरालोचितोऽपि ''उत्पत्स्यते तु मम कोऽपि समानधर्मा कालो ह्ययं निरवधिः विपुला च पृथ्वी'' इति तदुक्तिः क्रमशः सार्थकतां गतेति जानीमः। नाटकस्यास्य नायकभूतो दाशरथिः रामः सर्वदा शोकान्वितश्चित्रितः सीतावियोगमनुभवन् नात्मानं न्यक्करोति। तथा स्वजीवन-प्रयोजनस्य समाप्तिं चाकलयति। ''दुःखसंवेदनायैव रामे चैतन्यमागतम् इति ''हन्त हन्त अद्यावसितं जीवितप्रयोजनं रामस्य, शून्यमधुना जीर्णारण्यं जगत्, कष्टप्रायं शरीरम्, अशरणोऽस्मि'' इत्यादिरामोद्गारे शुचः पराकाष्ठानुभूयते। विभावानुभावव्यभिचारिभावानां संयोगेन नाटके मुख्यतया शोक एव स्थायिभावः अभिव्यक्तः परिपुष्टश्च, अत एव नाटके प्रामुख्येन करुणरसस्यैव परिपाको दृश्यत।

महाकविवाल्मीकिप्रणीतरामायणमुपजीव्य संस्कृतवाङ्मये बहवः ग्रन्थाः प्रणीता दृश्यन्ते। यतो हि रामायणं लौकिकसंस्कृतवाङ्मयस्यादिग्रन्थरूपेण परिचीयतेऽत एव एतस्य च्छत्रच्छायायामन्येऽपि ग्रन्थकाराः कृतकृत्याः सञ्जाताः।

रामायणस्योपजीव्यत्वेऽपि कविकल्पना संसारसंरचने कवयः स्वस्वसंकल्पजन्योपकरणैश्चित्रविचित्राञ्जगत्प्रबन्धाञ्जग्रन्थुः। एवमेव क्रमे महाकविः भवभूतिरप्यन्यतमः। महाकविनानेनोत्तरकाण्डान्तर्गता कथा गृहीता। तत एव स्वकल्पनासूत्रे भगवतो रामचन्द्रस्य जीवनचक्रं परिवर्तयन् कारुणिकमुत्तर-रामचरिताख्यं नाटकं ग्रन्थकारेणानेन विरचितम् ।

अत्र नाटके पौरस्त्यकाव्यशास्त्रिणां मतं तिरस्कृत्य करुणरसस्याङ्गित्वं विधाय कथा प्रस्तुतेति भवभूतिकवेः नाट्यक्रान्तित्वं विलोक्यते। नाट्यसिद्धान्तेनाङ्गीकृता ''एक एव भवेदङ्गी शृङ्गारो वीर एव वा''[1] इति परम्परा च कविनानेन न्यक्कृता। शृङ्गारादिरसान् यथावसरं प्रयुञ्जानो रससिद्धोऽयं कविः सर्वरसचूडामणित्वेन करुणरसं व्याचष्ट। उत्तररामचरितं रसदृशा निरन्तरं निभालयतां निःशेषाणां साहित्यनिकषाणां समालोचकानां मते नाटकस्यास्य मुख्यरसविषये काचिद्विमतिरनुभूयतेऽस्माभिः। अत्र नाटके केवलं करुणरस एव परिपुष्ट इति नैव युक्तियुक्तं वचनम्। अत्र वर्णितानां नायकादीनां समयचक्रसम्बद्ध घटनानामध्ययने सति विविधपरिस्थितिगतावस्थासु शृङ्गारहास्यादयोऽपि रसाश्चाभिव्यक्ता इति नैव निवारयितुं शक्यते। सीतारामयोः प्रेमालापः ''अशिथिलपरिरम्भव्यापृतैकैकदोष्णोरविदितगतयामा रात्रिरेव व्यरंसीत्''[2] इति, संयोगशृङ्गाररसस्य परिपाकावस्थां द्योतयत्येव। एवञ्च ''मार्गं यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः, सौमित्रेरपि पत्रिणामविषये तत्र प्रिये क्वासि मे''[3] इत्यादिपद्ये सीतावियोगजन्यविप्रलम्भशृङ्गारस्य कमनीयता विभात्येव। एवमेव नाटकस्यास्य चतुर्थाङ्कस्य प्रारम्भे समुपनिबद्धः सौधातकिदाण्डायनयोः संवादस्तथा अश्वमेधप्रयुक्तघोटकवर्णनविषयश्च हास्यरसस्य समुद्बोधको विद्यते । यथा- ''अयं शैलाघातक्षुभितवडवाक्त्रहुतभुक, प्रचण्डक्रोधार्चिर्निचयकवलत्वं व्रजतु मे''[4] इत्यादिलवोद्गारे च वीररसस्य चरमोत्कर्षमनुभवामः। अनया रीत्यान्येषां रसानामपि प्रभावोत्पादकोपस्थितिः दृश्यते ।एवमिह श्यामवस्थायामुत्तरचरितनाटके को रसः प्रामुख्येनाङ्गित्वेन वा परिपुष्टः? इत्येव चिन्तनविषयः। एतच्च नाटकं रामकथासम्बद्धं नाटकमस्ति। अतः रामायणोपजीव्यतायां ग्रथितमिदं नाटकं रामायणमिव रसिकत्वमुद्वहति। लौकिकसंस्कृतस्यादिमश्लोकरूपेण वाल्मीकिकविप्रयुक्तः क्रौञ्चद्वन्द्ववियोगोत्थशोकहेतुकः 'मा निषाद.'[5] इत्याख्यः श्लोकोऽस्ति-

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः।।[6]द**

इति पद्यबन्धाभणितिः समग्रस्यैव पद्यसाहित्यस्यादर्शभूतमादिमं पद्यं शोकपरिणामरूपं निश्चिनोति। अतः शोकस्थायिनः करुणरसस्यैव प्रथमः प्रभावः पद्यवाङ्मयस्य आदिमे काव्ये रामायणेऽस्ति। महर्षिर्वाल्मीकिरेकदा मध्याह्नस्नानाय नदीं तमसामुपपन्नः । तस्मिन्समये युग्मचारिणोः कौञ्चपक्षिणोरेकं व्याधेन विध्यमानं ददर्श ।तदैव वाल्मीकिमुखादनुष्टुभेन छन्दसा निबद्धं पद्यं निरयात्-

**मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।[7]द**

तत ब्रह्मप्रेरितो वाल्मीकिर्मुनी रामायणं विरचितवानिति। उत्तररामचरितं च रामायणोपजीव्यमिति नाटकस्यास्य करुणरसप्राधान्ये न कोऽपि सन्देहः। यद्यपि नाटकेऽस्मिन् सर्वेषां रसानां मूलतोंऽशतो वा समानः प्रयोगो दरीदृश्यते। ''त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता''[8]। इत्यादिपद्येषु सम्भोगशृङ्गारस्य रमणीयतानुभूयते चेत् ''हा हा देवि स्फुटति हृदयं ध्वंसते देहबन्धः। शून्यं मन्ये जगदविरतज्वालमन्तर्ज्वलामि।''[9] ''वियोगो मुग्धाक्ष्याः स खलु रिपुघातावधिरभूत, कथं तूष्णीं सह्यो निरवधिरयं त्वप्रतिविधः।''[10] ।"मार्गं यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः । सौमित्रेरपि पत्रिणामविषये तत्र प्रिये क्वासि मे?''[11]। इत्यादिषु पद्येषु विप्रलम्भशृङ्गारस्य परिपाकोऽनुभूयते। एवमेवान्यत्रापि स्थले स्थले शृङ्गाररसः समुच्छलितो वरीवर्ति। वीररसोऽपि नाटकेऽस्मिन् नास्ति प्रच्छन्नः। सर्वत्र लवोद्गारे वीररसो द्रवित इव लक्ष्यते। ''यदि नो सन्ति सन्त्येव केयमद्य विभीषिका? विमुक्तैरेभिरधुना तां पताकां हरामि वः।''[12]। इति पद्ये लवस्य महोत्साहः स्फुटीभवति। ''ज्या जिह्वया वलयितोत्कटकोटिद्रंष्ट''[13]। ''विनिवर्तित एष वीरपोतः।''[14] इत्यादिपद्येषु परिपुष्टेनोत्साहस्थायिभावेन वीररसताङ्गीकृता। एवमेव करुणरसस्याभिव्यक्तिस्तु नाटकेऽस्मिन् प्रतिपदमनुभूयते। ''किसलयमिव मुग्धं बन्धनात् विप्रलूनं हृदयकुसुमशोषी दारुणो दीर्घशोकः।''[15] ''पुटपाकप्रतिकाशो रामस्य करुणो रसः।''[16] ''करुणस्य मूर्तिरथवा शरीरिणी विरहव्यथेव वनमेति जानकी।''[17] इत्यादिषु बहुत्र करुणरसः दरीदृश्यते। एवमेव लवस्य पौरुषे अद्भुतरसः समास्वाद्यते। यदा युद्धविद्यायां लवो लोकोत्तरं चमत्कारं प्रदर्शयति तत्र

अद्भुतरसस्योत्कृष्टं निदर्शनं प्राप्यते। ''मुनिजनशिशुरेकः''।[18] ''पातालोदरकुञ्ज''।[19] इत्यादि पद्येषु तदनुभवन्ति रसिकाः। चतुर्थाङ्कस्य प्रारम्भे सौधातकिदाण्डायनयोः संवादे हास्यरसोऽप्यभिव्यक्तः। ''स्वागतमनेकप्रकाराणां जीर्णकूर्चानामनध्यायकारकाणां तपोधनानाम्।'' (भवभूतिः, उत्तररामचरितम्, सन् 1999, पृ. 229)। ''मया पुनर्जातं व्याघ्रं वा वृको वैष इति'' (भवभूतिः, उत्तररामचरितम्, सन् 1999, पृ. 231)। इत्यादिषु सौधातकेः वचनेषु हास्यत्वं दरीदृश्यते। अतः हास्यरसोऽप्यंशतोऽत्र विद्यत एव। एवञ्च ''कूजत्कुञ्जकुटीरकौशिकघटाघुत्कार-वत्कीचकस्तम्बाडम्बरमूकमौकुलिकुल.''[20]। इत्यादिषु कठोरप्रकृतिवर्णने भयानकरसोऽनुभूतिं यातः। तथैव लवस्य युद्धचातुर्यं दृष्ट्वा स्वसैन्यविनाशं च परिलक्ष्य चन्द्रकेतुः भयभीतो दृश्यते। ''आगर्जद्गिरिकुञ्जकुञ्जरघटानिस्तीर्णकर्णज्वरम्''[21]। इत्यादिपद्येषु भयानक-रसोऽनुसृतोऽस्ति। नाटकेऽस्मिन् प्रत्यक्षतया बीभत्सरसो नानुभूयते तथापि युद्धादिषु अन्यथानुपपत्त्या तत्कल्पयितुं शक्यते। एवञ्च लवस्य सेनापतिभिः सह युद्धे रौद्ररसो दृश्यते । ''आः कथमिदानीं भग्ना अपि प्रतिनिवृत्य युद्धाभिसारिणः पर्यवष्टम्भयन्ति मां चमूपतयः। धिग्जाल्मान्।'' (भवभूतिः, उत्तररामचरितम्, सन् 1999, पृ. 302) इत्युक्त्वा लवेन क्रोधः प्रदर्शितः। ''अयं शैलाघातः।''[22] इत्यादिषु रौद्ररसोऽभिव्यक्तोऽस्ति। शान्तरसस्त्वत्र बहुत्र दरीदृश्यते तथापि ''अहो निरन्वयविपर्यासविरसवृत्तयो विप्रलब्धपर्यवसायिनस्तापयन्तिसंसारवृत्तान्ताः।'' (भवभूतिः, सन् 1999, पृ.387), इति निर्वेदगर्भिता रामभणितिः शान्तरसं द्योतयति। तथा ''सुखे वा दुःखे वा क्व नु खलु तदैक्यं हृदययोः, तथाप्येषः प्राणः स्फुरति न तु पापो विरमति।''[23] इत्यादौ शान्ताख्यो रसः अनुभूतिगोचरोऽस्ति। एतावता शृङ्गारादि-शान्तान्तानां रसानां समाना उपस्थितिः दृश्यतेऽत्र। नाटकस्य कथानकं करुणापूर्णमस्तीति अस्य प्रधानो रसः करुणरसः इति वदन्ति विज्ञाः। तथापि रसान्तराणामपि साधुप्रयोगेन तेषामपि रमणीयतानिवारणे न कोऽपि समर्थः।

नाटकेऽस्मिन्न बहुत्र विविधरसानां प्रयोगे सत्यपि विशेषतः भवभूतेरत्र करुणरसे एव रुचिः परिदृश्यते। अतो नाट्यजगति क्रान्तिमिव विदधानो भवभूतिः उत्तररामचरिताख्यं नाटकमिदं प्रास्तौत् । विशेषतः रसप्रयोगे कवेरस्य पृथक् पन्थाः प्रतिपद्यते । ''एक एव भवेदङ्गी शृङ्गारो वीर एव वा। अङ्गमन्ये रसाः सर्वे कार्ये निर्वहणेऽद्भुतः''।।[24] इति रसप्रयोगविधानं सैद्धान्तिग्रन्थेषु प्रतिपादितम्। परन्त्वत्र

नियमोऽयं नैव सङ्गच्छते। अङ्गिरसरूपेण प्रधानरसरूपेण वा शृङ्गारवीरयोः स्थितिः नैवावलोक्यते। अत्र करुणरस एव सर्वत्र अनुभूतिविषयतामापद्यते। अत्र विचारणीयो विषयो विद्यते यत्, नाटकसिद्धान्तानुसारं नाटकेन भाव्यमथवा नाटकानुसारं सिद्धान्तः प्रतिष्ठापितः? इति विषयोऽयं न केवलं विचारणीयः अपि तु अनुसन्धेय एव विद्यते। शृङ्गाररसस्य प्राधान्ये भवभूतिना मालतीमाधवाख्यं नाटकं विरचितम्। तथा वीररसस्य प्राधान्ये च महावीरचरिताख्यं नाटकं प्रस्तुतम्। उत्तररामचरितं तु करुणरसस्य मुख्यतायां निबद्धम्। कविरयं नाट्यसिद्धान्तानभिज्ञो नासीत्, तथापि किमर्थं स्वकीये तृतीये नाटके करुणरसस्य प्राधान्यमूरी कृतम्? एतावता यथा नाटकं तथा सिद्धान्तः। इति नियमोऽङ्गीकर्तव्यः। अनेनैतद्गम्यते यत् भवभूतेः पूर्वमेतादृशं नाटकं नासीत्। अतः नाटकसिद्धान्ते करुणादिरसानां प्राधान्यं नैवोल्लिखितम्। नाट्यसिद्धान्तवादिभिः यदि उत्तररामचरितस्य नाटकत्वं निवार्यते तर्हि नाटकसिद्धान्तपक्षः प्रबलः स्यात्। परं तन्न सम्भवति। अतः उत्तररामचरितस्य यदा नाटकत्वमङ्गीकृतं सर्वैस्तदा नाटकसिद्धान्तपक्ष एव संशोधनार्हो जातः। तस्मात् रसप्रयोगप्रसङ्गे उत्तररामचरितमनितरसाधारणं नाटकमस्ति। स्वगुणगरिम्णा सर्वाण्यन्यानि नाटकान्यतिशेते। मूलतो नाटकस्य प्रयोजनं मनोरञ्जनप्रदानमेव।

**दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।**
**विश्रान्तिजननं काले नाट्यमेतद्भविष्यति।। इति**[25]

अर्थात् दुःखार्ताः श्रमार्ताः शोकार्ताः अपि जनाः यद् दृष्ट्वा मनो विनोदयन्ति, तस्यैव नाटकत्वमाख्यातम्। उत्तररामचरिताख्यं नाटकं विलोक्य च रसिका लोकोत्तरमानन्दमनुभवन्तीति नाटकस्यास्योत्कृष्टतायां को विवादः? नाटकेऽस्मिन् करुणरसस्य प्राधान्यमनुभूयते। करुणरसस्योत्कर्षतायामेव रसान्तराणां पर्यवसानमस्ति। एतावता रसप्रयोगसरणिः अत्रत्या असमीचीना इति न केऽपि समालोचका वक्तुमुत्सहन्ते। भारतीये समग्रकाव्यसिद्धान्ते वीरशृङ्गाररसयोः प्रधानरसत्वमङ्गीकृतं दृश्यते। रसान्तराणां तयोरेव सहायकत्वं व्याख्यातं रसतत्त्वविद्भिः। परन्तु अयं सिद्धान्तः प्राचीनः। परवर्तिभिराचार्यैः शान्तादिरसानामपि प्रमुखरसत्वं सम्भावितं व्याख्यातञ्च। एतादृश्यां परिस्थितौ करुणरसस्य प्राधान्येऽपि काव्यनाटकादीनां निर्मितिः नितरां स्वीकार्यैव। अतः उत्तररामचरितेऽङ्गीकृतं रसविधानं नास्त्यनुपयुक्तमिति निश्चित्य वक्तुं शक्यते।

मनोरञ्जनादिविषयेषु यथा वीरशृङ्गारादीनामुपयोगः न तथा करुणादीनामिति धियैव ''शृङ्गारो वीर एव वा'' इति परिभाषितम्, परन्तु नात्र करुणादयो रसा निषिद्धाः। नाटक विद्भिः करुणरसस्यापि मनोविनोदहेतुत्वं सतर्कं प्रतिपादितमिति विवादेनालम् ।

**''करुणादावपि रसे जायते यत्परं सुखम्।**
**सचेतसामनुभवः प्रमाणं तत्र केवलम्।।''[26]**

इत्यादि विदुषां कथनमेव तत्समर्थयति। अतः रसप्रयोगविधौ नाटकेऽस्मिन् न कापि विप्रतिपत्तिः विमतिर्वा दरीदृश्यते। नाटकस्यास्याङ्गिरसविषये विद्वत्सु मिथो विवादो भिन्ना भिन्ना धारणा च समवलोक्यते। विशेषतः नाटकस्य प्रधानो रसः करुणरसः करुणविप्रलम्भो वेति विदुषां मतभेदविषयः। ''एक एव भवेदङ्गी शृङ्गारो वीर एव वा'' इति सैद्धान्तिकीमुक्तिं स्वीकृत्य केचन विद्वांसः भवभूतिमालोचयन्त्यपि। शृङ्गारवीरावतिक्रम्य कविनात्र पदे पदे करुणरसः प्रसारितः। नूतननाट्यसिद्धान्तः प्रचारितश्च। नाटकसिद्धान्तानुसारं शृङ्गारवीरौ विहाय न कोऽपि रसो नाट्ये प्राधान्यं प्राप्नोति। परन्तु यदा भवभूतिना सिद्धान्तोऽयं तिरस्कृतः। स्वकीये नाटके उत्तररामचरिते तदुभयभिन्नो रसः प्राधान्येनाङ्गी कृतस्ततः कविसमाजे नाटककारो भवभूतिः बहुरालोचितः। येन भवभूतिना शृङ्गारवीरयोः प्राधान्यं स्वीकृत्य मालतीमाधवं महावीरचरितं च विरचितम्। तेनैव रसान्तरमङ्गी कृत्य उत्तररामचरितं प्रस्तुतमिति नाटकेऽस्मिन् कवेर्नवीनः प्रयोगो दरीदृश्यते। ''रामायणे हि करुणो रसः''।[27] इति आचार्याणामपि सम्मतिः विद्यते। भवभूतिनापि रामायणस्य करुणरसमूलकत्वं व्याख्यातमेव। अतः वाल्मीकिमनुसृत्य रामायणकथां स्वीकृत्य च कविनानेनापि नाटकस्यास्य करुणरसप्रधानत्वं साधितं स्यात्। केचन रसविदो विद्वांसोऽत्र करुण-विप्रलम्भ-रसस्य प्राधान्यमपि तर्कयन्ति। वस्तुतः यत्र पुनः संयोगस्यापेक्षा दृश्यते तत्र करुणविप्रलम्भो रसः। यत्र च पुनः संयोगापेक्षा न जायते तत्र करुणो रसः। विरहस्तु उभयत्रैव समानः। परमेतच्चिन्त्यं यत्- करुणविप्रलम्भरसे संयोगापेक्षया तत्रत्यो विरहः रतिसम्भूतो भवति। करुणरसे च संयोगस्य निरपेक्षत्वात् तत्रत्यो विरहः शोकसम्भूतो जायते। अत उभयोर्मध्ये अयमेव विरहः। उत्तररामचरिते करुणविप्रलम्भरसं स्वीकुर्वतां विदुषां मतमस्ति यत् नाटकेऽस्मिन् पुनर्मिलनस्य सम्भावना दृश्यते। अतोऽत्र करुणविप्रलम्भो रसः। यथा सीतां प्रति प्रयुक्त-तमसायाः कथने, देवताप्रसादात् पश्यन्ती प्रियं भूयाः ।

(भवभूतिः, सन् 1999, पृ. 181)। ''विदेस्तवानुकूलो भविष्यति'', ''त्वयि वितरतु भद्रं भूयसे मङ्गलाय''[28] इत्यादिवाक्येन सीतायाः मनसि रामेण सह पुनर्मिलनस्याशा जागृता दृश्यते। तथैव लवकुशदर्शनानन्तरं रामस्य मनस्यपि सीतया सह पुनर्मिलनस्य आशातन्तुः प्ररूढोऽस्ति। तथा सीताविनाशस्य विश्वस्ता सूचनापि न दृश्यते। एवमेव विलापसमये रामेण सम्भावितं ''क्रव्यादि्भरङ्गलतिका नियतं विलुप्ता''[29] इत्यादिकथनं चातिशयवियोगनिमित्तमेव। फलतः सीतारामयोर्मिलनमपि नाटकस्यान्ते सम्पन्नम्। अतो नात्र करुणरसो मुख्यः। स्वोहापोहं करुणविप्रलम्भरसस्यैव मुख्यत्वं निश्चीयत इति करुणविप्रलम्भवादिनां मतम्। परन्तु सिद्धान्ततः आधिकारिकतया च उत्तररामचरितस्य मर्मविदि्भः विद्वदि्भः नाटकस्यास्य करुणरस एव प्रधानो रस इति सम्भावितमिति। उत्तररामचरितस्य आधिकारिकव्याख्यात्रा वीरराघवेन च करुणरसस्यैव प्रधानत्वं व्याख्यातम्। करुणविप्रलम्भो रसः शृङ्गाररसस्यैवान्यतमो भेदोऽस्ति। अस्य स्थायिभावः रतिरस्ति चेत् करुणरसः एकः रसो विद्यते। एतस्य स्थायिभावश्च शोकः अस्ति। कदाचित् करुणकरुणविप्रलम्भयोरवस्था समाना दृश्यते। तदा भेदप्रदर्शने अवश्यं काठिन्यं जायते। विप्रलम्भशृङ्गारस्य चतुर्षु भेदेषु करुणात्मको भेदः करुणरसेन साम्यं भजते। ते च भेदाः विश्वनाथेन प्रदर्शिताः यथा- ''स च पूर्वराग- मान- प्रवास- करुणात्मकः चतुर्धा स्यात्''[30]। तत्र करुणात्मकस्य विरहः, करुणस्य विरह इव प्रबलो भवति। अतः नाटकेऽस्मिन् करुणविप्रलम्भरसस्य सम्भावना कैश्चिदुद्भाविता। परन्तु अत्र करुणरस एव विभावानुभावव्यभिचारिभिः पुष्टिं प्राप्तोऽस्ति। वस्तुतः इष्टवस्तुनो नाशात् समुत्पन्नो मानसो भाव एव करुणरसः। अस्य रसस्य स्थायिभावः शोको विद्यते। यस्य शोकः स आलम्बनः, तत्सम्बद्धाः विषयाः उद्दीपनविभावाः। दैवनिन्दा, भूपातः, क्रन्दनम्, इत्याद्याः अनुभावाः तथा वैवर्ण्यम्, उच्छ्वासः, स्तम्भनम्, प्रलपनम्, निर्वेदः, ग्लानिः, इत्याद्या करुणरसस्य व्यभिचारिभावाः चेद् एतैः विभावानुभावव्यभिचारिभिः परिपुष्टः शोकस्थायिभावः करुणरसरूपतां व्रजति। तच्च सहृदयाः स्वहृदि अनुभवन्ति। नाटके च सीतावियोगाज्जातः शोकः स्थायिभावः। शोकस्य विषयीभूता सीता आलम्बनविभावरूपा, सीतासम्बद्धा दण्डकारण्यम्, जलस्थानम्, सीतायाः प्रियमुद्यानम्, सीतायाः प्रियाः पशुपक्षिणः इत्यादयो विषयाश्च उद्दीपनविभावाः। तथा तेषां दर्शनेन जायमानाः भूपात-अश्रुपातादयो विकृतयः अनुभावाः सन्ति चेत्

विलपनं चिन्ता, मूर्च्छा, जडता इत्यादयो विषयाः व्यभिचारिभावाः सन्ति। एतेषां संयोगात् अत्र शोकः करुणरसतां प्राप्तोऽस्ति। अतः नाटकमिदं करुणरसप्रधानमस्तीत्यत्र न कोऽपि सन्देहः। नाटकस्यारम्भादेव कथायां करुणरसः स्रवते। एकत्र रामः सीतायाः परित्यागात् शोकान्वितोऽस्ति चेत्, अपरत्र सीता च स्वयं दयनीया सती रामं स्मरति शोचति च। एतत्सर्वं विलोक्य सामाजिकाः सहृदयाश्च एतयोः प्रति सहानुभूतिं प्रकटयन्तः स्वयं च करुणरससरसि निमग्नाः जायन्ते। भरतस्य करुणरसाभिनयपद्धतिः नाटकेऽस्मिन् सङ्गच्छते। स्वयं कविना च नाटकस्यास्य करुणरसमूलकत्वं सूचयितुमाह-

**एको रसः करुण एव निमित्तभेदाद्**
**भिन्नः पृथक् पृथगिवाश्रयते विवर्तान् ।**
**आवर्तबुद्बुदतरङ्गमयान् विकारा-**
**नम्भो यथा सलिलमेव हि तत्समग्रम्।।**[31]

इत्यभिव्यक्तम् तथा सीता च करुणरसस्य विग्रहरूपा स्वीकृता ''करुणस्य मूर्तिरथवा शरीरिणी''[32] इत्यादि। अतः उत्तररामचरितं करुणरसप्रधानमथवा नाटकस्यास्य मुख्यो रसः करुणः इत्यत्र न किमपि बाधकम्।

संस्कृतवाङ्मये प्रधानभूतस्य दृश्यकाव्यस्य अङ्गपङ्क्तौ परिगणनीयस्य उत्तररामचरितस्य मुख्यरसः करुण एव इति बहुभिस्तथ्यैः सतर्कं निश्चेतुं शक्यते। ''एको रसः करुण एव निमित्तभेदात्'' इति अत्रत्या सूक्तिरति तत्समर्थयति। इयं सूक्तिश्च नाटकस्यास्य करुणरसप्रधानत्वसाधने एव नैव निश्चिता अपि तु समग्ररसजगति करुणस्यैव प्रधानैकरसत्वसाधनेऽपि लक्षिता दृश्यते। कैश्चित् शृङ्गाररसस्य प्रधानैकरसत्वमङ्गीकृतं चेत् कैश्चित् शान्तरसस्य तथा कैश्चिच्च अद्भुतरसस्य प्रधानैकरसत्वं व्याख्यातम्। परन्तु भवभूतिमते करुणरस एव मुख्यैको रसः भवितुमर्हति। वस्तुतः मानवजीवनं दुःखमूलकं शोकमूलकं च विद्यते। शोकस्थायिभावकस्य करुणरसस्यैव बाहुल्यं जीवने जना अनुभवन्तीति रसमध्ये करुणरस एव मुख्यः इत्यपि कवेराशयः। अत एव कविना करुणकथानकयुक्तां रामायणस्य उत्तरकाण्डान्तर्गतां रामकथां स्वीकृत्य नाटकं प्रस्तुतम्। तत्र च करुणरसः सर्वोत्कर्षेण व्यवस्थापितः। ''एतत् कारुण्ये किमन्यथा रोदिति ग्रावा'' इति कथनमपि भवभूतेः करुणरसवादित्वं समर्थयति। ''अपि ग्रावा रोदित्यपि दलति

वज्रस्य हृदयम्'' इति नाटकपद्यांशोऽपि भवभूतेः कारुण्यं परिचाययति। अतः भवभूतेः कारुण्यं जगत्प्रसिद्धमस्ति। उत्तररामचरितनाटकमाधृत्यैव महाकविः भवभूतिः पृथग्धर्मेण विशिष्टो बभूव। तत एव उत्तरे रामचरिते भवभूतिर्विशिष्यते इति प्रसिद्धा सूक्तिः प्रचलिता। केचन आचार्याः नाटकस्यास्य अङ्गिरसस्य रूपेण करुणरसस्य स्वीकारे सम्मताः न सन्ति। परन्तु बहवो विद्वांसः टीकाकाराः अध्येतारश्च करुणरसस्यैव अङ्गित्वं समर्थयन्ति। तथा रसान्तरापेक्षयात्र करुणरसस्यैव विशेषाभिव्यक्तिः परिपाकश्च दरीदृश्यत इति करुणरसस्यैवाङ्गित्वमविरुद्धमिति।

**संदर्भ :**


1. *साहित्यदर्पणः, 6/10*
2. *उत्तररामचरितम्, 1/27*
3. *उत्तररामचरितम्, 3/45*
4. *उत्तररामचरितम्, 5/9*
5. *उत्तररामचरितम्, 2/5*
6. *ध्वन्यालोकः, 1/5*
7. *उत्तररामचरितम्, 2/5*
8. *उ.रा.च. 1/24*
9. *उ.रा.च. 3/38*
10. *उ.रा.च 3/44*
11. *उ.रा.च. 3/45*
12. *उ.रा.च. 4/28*
13. *उ.रा.च. 4/29*
14. *उ.रा.च. 5/8*
15. *उ.रा.च. 3/5*
16. *उ.रा.च 3/1*
17. *उ.रा.च 3/4*
18. *उ.रा.च 5/3*

*19. उ.रा.च. 5/14*

*20. उ.रा.च. 2/29*

*21. उ.रा.च. 5/6*

*22. उ.रा.च 5/9*

*23. उ.रा.च 6/33*

*24. साहित्यदर्पणः, 6/10*

*25. नाट्यशास्त्र, 1/114*

*26. साहित्यदर्पणः, 3/4*

*27. ध्वन्यालोकः, 4/5, वृत्तिः ।*

*28. उ.रा.च. 3/48 ।*

*29. उ.रा.च. 3/18*

*30. साहित्यदर्पण 3/187*

*31. उ.रा.च. 3/47*

*32. उ.रा.च 3/4*

●●●

# 12

# कालिदासस्योपमासु वैष्णवदर्शनस्याभिव्यञ्जना

*सदानन्दत्रिपाठी*

**यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै।**
**तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये।।**
**अवन्तिकापुरीशाय निःशेषक्लेशनाशिने।**
**ज्योतिर्लिङ्गस्वरूपाय महाकालाय ते नमः।।**

(दयालू पाहवस्य सदानन्दत्रिपाठिनः)

**शङ्करं शङ्कराचार्य्यं केशवं बादरायणम्।**
**सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः।।**
**सदाशिवसमारम्भां शङ्कराचार्य्यमध्यमाम्।**
**अस्मदाचार्य्यपर्य्यन्तां वन्दे गुरुपरम्पराम्।।**

अनादिकालादेव भारतवर्षं निखिलविश्वस्याध्यात्मिकधर्मगुरुपदे सर्वमान्यतया राराजते। एतत्समादरस्याधारो वरीवर्त्ति देशस्यास्य सनातनंसार्वभौमं दार्शनिकं चिन्तनं, यत्ते वर्त्तते सर्वथाऽपौरुषेयवैदिकवाङ्गमयेनानुमोदितम्। आर्षश्रौतपरम्परायां निहितानि सन्ति बीजरूपेण भारतीयदर्शनस्य समग्राणि स्रोतांसि। परमेश्वरस्यसृष्टौ मनुष्य एवास्ति, यो हि चिन्तनमननशीलो विद्यते। यतोहि सः 'मत्वा सीव्यति कर्म्माणि' इति व्युत्पत्त्यनुसारं मत्वैव कर्मं सम्पादयति। तस्य मानसपटले सम्पूर्णतया सह जीवनजगतोश्च विषये प्रादुर्भवति जिज्ञासा। स तु सदा कामयते - 'सदा सुखं मे स्याद् दुःखं मा भूयात्'। दुःखनिवृत्तिपूर्वकं सुखप्राप्तेरुपायाः सूत्ररूपेण सन्दृब्धाः साक्षात्कृद्भिर्मन्त्रद्रष्ृभिर्ऋषिमुनिभिः वेदप्रतिपादितानुसारेषु दर्शनशास्त्रीयग्रन्थरत्नेषु। वस्तुनः परमार्थतत्त्वस्य यथार्थावबोधानुभूतिरिति दर्शनं पदवाच्यम् अतएवोच्यते - 'दृश्यते अनेनेति

दर्शनम्।' विचारस्य प्रयोजक- प्रयोज्यज्ञानस्य नामास्ति दर्शनमिति। आत्म-परमात्मतत्त्वज्ञानस्य साधनशास्त्रस्यनाम 'दर्शनशास्त्रम्'; पदार्थस्य यथार्थरूपेण येनावबोधो ज्ञानमवाप्यते तन्नाम दर्शनम् इति। दर्शनशास्त्रं प्राणिनामाधिभौतिकमाधिदैविकन्तथाध्यात्मिकमिति त्रिविधतापनिवारणाय समूलोच्छेदाय च निर्दिश्य परमानन्दावाप्तेर्मार्गं प्रदर्शयति। दुःखनिवृत्तये चतुर्णां तत्त्वानां-(1) हेयः (2) हेयहेतुः (3) हानस्तथा (4) हानोपायः - इत्येतेषां विमर्शनं विधाय, तत्त्वत्रयाणां-जीव-माया-ब्रह्मणश्चात्र विवेकः समुपलभ्यते। भारतीयदर्शनमास्तिकनास्तिकभेदाभ्यां द्विधं वर्त्तते। 'नास्तिको वेदनिन्दकः' इत्यनुसारं जैन-बौद्ध-चार्वाकादयोऽवैदिका दार्शनिकाः। ये वेदप्रणिहितमनुसरन्ति, प्राणपणेन च परिपालयन्ति; त एवास्तिकदार्शनिकाः। आस्तिकदर्शनस्यापि बह्व्यः शाखाः प्रसारकास्सन्ति सम्प्रदायपरम्परानुसारि। यथाशैव- श्रीवैष्णव- शाक्त-गाणपत्य-सौर-प्रभृतयः सनातनवैदिकधर्मस्य पञ्चदेवोपास्वज्ञानुसारिण्यः। यतोहि-एताः पञ्चमहाभूतानामधिष्ठातृदेवताः। उक्तम् -

**आकाशस्याधिपो विष्णुरग्नेश्चैव महेश्वरी।**
**वायोः सूर्यः क्षितेरीशो जीवनस्य गणाधिपः।।**[1]

वैदिकवाङ्मयादारभ्य भारतीयदर्शनशाास्त्रस्य सुदीर्घा परम्परा विद्यते। आदिकविः प्राचेतसो वाल्मीकिः कृष्ण द्वैपायनो भगवानवेदव्यासः, खीष्टाब्दात्पूर्व षष्ठ्यांशताब्द्यां (509 ईसा पूर्व) लब्धजन्मा साक्षाच्छितावतारः भगवत्पादो जगद्गुरुरादिशङ्कराचार्य्यः, कविकुलगुरुः कालिदासः प्रभृतयो नैकाः विभूतयोऽस्य परम्पराधुरमावहन्ति। महाकविः कालिदासः न केवलं काव्यग्रन्थेषु, अपितु नाट्यत्रय ग्रन्थेषु मङ्गलाचरणभरतवाक्ययोश्च भगवतः शिवस्याष्टधा प्रकृतिमयीं स्तुतिं करोतीत्यनेनैव कारणेन संस्कृतविद्वत्समाजे परमशैवकविरित्यभिधानेन समाद्रियते; केषाञ्चन मतेऽयं काश्मीर-शैवदर्शनस्याप्रतिमो महाकविः। अस्मन्मते तु सत्यमिदमस्ति यत्कालिदासः 'शिवस्य हृदयं विष्णुर्विष्णोर्हृदयं शिवः' इति मतानुसारमभेदवादिराद्धान्त समन्वयवादिदार्शनिकः कविः। स्थावरजङ्गमात्मकस्य जगतोऽधिष्ठानत्वेन वर्तमानं भेदत्रय-विवर्जितमद्वैतदर्शनतत्त्वं क्वचिच्छिवरूपेण क्वचिद् ब्रह्मरूपेण क्वचिन्यत्र च विष्णुरूपेण कवयति कविताकामिनीकान्तः कालिदासः। महाकवेरस्य जगत्प्रसिद्धिः 'उपमाकालिदासस्य'[3] इत्यभियुक्तोक्त्या दिग्दिगन्तव्यापिनी। कालिदासस्योपमायोजना विषये ध्यातव्यमिदमस्ति यच्छी

मद्वाल्मीकीयरामायणं महाकाव्यमत्रोपजीव्यत्वेन वरीवर्त्तीति निश्चप्रचम्। रघुवंशमहाकाव्ये कविचक्रचूडामणिरयं 'अथवा कृतवाग्द्वारे वंशेऽस्मिन्पूर्वसूरिभि'।[4] इत्युक्त्वा पूर्ववर्त्तिकविपरम्परां स्मरन् रससिद्धकवीश्वरस्यादिकवेः प्राचेतसवाल्मीकि भगवतो नामोल्लेखपुरःसरं तम्प्रति सादरमधमर्णतामभिव्यनक्ति।

महाकविकालिदासस्य वेदान्तसिद्धान्तानुरूपिणी दार्शनिकीप्रतिभायाः दर्शनं सर्वप्रथमं कुमारसम्भवमहाकाव्ये भगवतो ब्रह्मणः स्तुतौ तथा च रघुवंशमहाकाव्यस्य दशमसर्गेऽन्यत्सर्गेष्वपिच सुष्ठुतया दरीदृश्यते। अत्र श्रीमद् भागवतमहापुराणस्य दशमस्कन्धस्यानुकरणं प्रतिभाति श्रीरामावतारवर्णने।

'कालिदासस्योपमासु वैष्णवदर्शनस्याभिव्यञ्जनेति शोधपत्रे किन्नामोपमा? संस्कृतकाव्यसाहित्यालङ्कारिकाचार्याणामभिमतं किम्? उपमायोजनया काव्यं कथं चमत्कृत्याधायकं भवति? इत्यत्र समासेनैव कालिदासस्योपमाप्रयोग विषये भावपक्षकलापक्षसन्दर्भे किञ्चिदिवमृशामः।-

उपमा- अत्र प्रयुक्तस्य 'उप' उपसर्गस्यार्थः समीपता। चिन्तमणिकोशकारः 'उप सामीप्ये' 'माङ्माने' धातोः स्त्रीत्वात् टाप् प्रत्यये कृतेऽनुबन्धलोपे उपमा शब्दः सिद्ध्यति। चिन्तामणिकोशकार मते 'मितिमानेविज्ञाने'- एते त्रयः पर्यायशब्दाः। 'उपमा' शब्दस्य निष्पतिः- उपसामीपयात् मा मानम् उपमा।[5] समरूपता, समता साम्यता, सादृश्यता, समानता, साधर्म्येत्यादयः पर्यायशब्दा उपमायाः। स्वामिश्रीगौरीशङ्करो भिक्षुः उपमायाः निर्वचनं करोति-' उपमानोपमेययोः साधर्म्ये भेदाभेदतुल्या।। वैधर्म्याविषयैकवाक्य विषयकत्वे सतीवादिवाच्यमुभयसम्बन्धि साधर्म्यम्।।[6]

उपमायाः परिभाषा सर्वैश्शूलङ्कारिकैराचार्यैः कृता विद्यते; किन्तु तेषां लक्षणे किञ्चिदन्तरं दृग्गोचरीभवति। अस्याः स्वरूपलक्षणनिर्माणे सर्वैरालङ्कारिकैः सादृश्यं, साम्यं तथा च साधर्म्यमित्येतेषु शब्देषु कस्याचिदेकस्य शब्दस्य प्रयोगः कृतः। आचार्योभरतः, दण्डी, जयदेवो, जगन्नाथस्तथा च विश्वेश्वर पण्डितः सादृश्य शब्दस्य सन्निवेशः कृतवान्। आचार्यो वामनः, भामहो, विद्यानाथो, विश्वनाथो वाग्भटश्च साम्यपदस्य प्रयोगमकरोत्। उद्भटो, मम्मटाचार्यो, संख्यकः हेमचन्द्रश्च साधर्म्य शब्दस्य विनियोगं विधाय उपमायाः स्वरूपं निर्धारितवान्।

सर्वेष्वर्यालङ्कारेषु प्रमुखत्वेन विद्यूत उपमालङ्कारः। इममलङ्काराणां मूलभूतं स्वीकृतमिति। संस्कृतस्य प्राचीनतमो ग्रन्थः ऋग्वेदः। अत्रोपमायाः प्रभूतान्युदाहरणान्युपलभ्यन्ते। दिङ्मात्रमुदाह्रियते ऋग्वेदमन्त्रः-

**अभ्रातेव पुंस एति प्रतीची गर्त्तारूगिव सनये धनानाम्।**
**जायेव पत्य उशती सुवासा उषा हस्रेव नि रिणीते अप्सः।।**[7]

उपमायाः परिभाषां प्रस्तुवन्नाह नाट्यशास्त्रकारो भरतमुनिः। काव्यबन्धेषु सादृश्यने समानतायाः कारणेन वा गुणाकृतिसमाश्रयेण या तुलना विधीयते, उपमेति पदेन सा वाच्या। यथा-

**यत्किञ्चित्काव्यबन्धेषु सादृश्येनोपमीयते।**
**उपमा नाम सा ज्ञेया गुणाकृतिसमाश्रया।।**[8]

आचार्योभामहः कथयति यद्देशकालक्रियादीननुसृत्योपमानोपमेययोः गुणलेशेन यत्र यत्साम्यं भवति, तत्रोपमालङ्कारो विजानीयात्-

**विरूद्धेनोपमानेन देशकालक्रियादिभिः।**
**उपमेयस्य यत्साम्यं गुणलेशेन सोपमा।।**[9]

आचार्यो रुय्यकराजानकः (मङ्खकस्य गुरुः) उपमायाः स्वरूपलक्षणं परिभाषयन्नाह यद्यत्र उपमेयोपमानयोः साधर्म्ये भेदाभेदतुल्यत्वं भवेदत्र भवत्युपमालङ्कारः।- **'उपमानोपमेययोः साधमर्ये भेदाभेदतुल्यत्वे उपमा।।**[10]

वाग्देवतावतारो मम्मटाचार्य्योऽपि रूय्यकस्य लक्षणं समर्थयन्नाह-यद् यत्रोपमानोपमेपयोरेव न तु कार्यकारणादिकयोः साधर्म्यं भवतीति तयोरेव समानेन धर्मेण सम्बन्धः उपमेत्यभिधीयते- **'साधर्म्यमुपमा भेदे'**।[11]

आचार्यमङ्खकः उपमाविषय वक्ति यत्- अर्थयोः परस्परं प्रसिद्धेरनु-रोधेन यथाकथञ्चित् सादृश्यकथनं सा उपमेति। कस्यचित् भावस्य सादृश्यं सर्वात्मनैव तत्र न भवति। यत्किञ्चित्सामान्यात्तूपमीयते शशिनैव। भूयः कैश्चिद् अवयवसामान्यापादुपमा कथ्यते। यथा-

**प्रसिद्धेरनुरोधेन यत् परस्परमर्धयोः।**
**यथाकथञ्चित्सादृश्यकथनं सोपमा स्मृता।।**
**सर्वातमनैव सादृश्यं नास्ति भावस्य कस्यचित्।**
**यत्किञ्चित्साम्यात्तु शशिनैवोपमीयते।**
**भूयोऽवयवसामान्यादुपमा कैश्चिदिष्यते।।**[12]

उपमायाः परिचायकाः पदानि भवन्ति क्वेवन्त वति, वा, यथा, इवच। आलेखविस्तरभियोपमाया सलक्षणोदाहरणाः भेदोपभेदा अत्र न विलिख्यन्ते। 'इव' पदप्रयोगोणोपमोत्प्रेक्षयोर्मध्ये किमन्तरमिति सङ्क्षेपेणैव प्रस्तूयते।

सादृश्यमूलकोपमोत्प्रेक्षयोर्वाचक 'इव' पदमिति। उभयोर्मध्ये विभेदकतत्त्वं परिचायकरूपेण विद्यते यद् उत्प्रेक्षायामिव शब्दस्य प्रयोगः प्रायः क्रियापदेन सहैव भवति। उदाह्वियते यथा-

**लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।**
**असत्पुरूषसेवेव दृष्टिर्विफलतां गता।।**[13]

काकरप्रयोगदृष्ट्याऽत्रोपमायां कर्म्मकरणकारकयोः प्रयोगस्तुल्यार्थे विधीयते। यथा सूत्रे भगवान् पाणिनिराह- **'तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्।।**[14]

कविकुलगुरोः कालिदासस्य काव्यसौन्दर्यं प्रेक्षं-प्रेक्षं सुतरां प्रशंसन्ति सहृदयाः सुधियस्तस्य भावकलाकौशलम्। उपमाप्रयोगचातुर्येणैवायं 'दीपशिखाकालिदासः' इति प्रसिद्धिमाप। सर्वानपि महाकवीनौपम्ये कालिदासोऽतिशेते। उपमासु न केवलं रम्यतायाः यथार्थतायाः पूर्णतायाः, विविधतायाश्च दर्शनं भवति; अपि तु सर्वत्रैव लिङ्गसाम्यौचित्ययोश्चापि। लिङ्गसाम्यौचित्ययोश्च सामाश्रयणेनोपमासु समाद्यते काचिदपूर्वा चारुता। कालिदासस्य काव्यादिषु बहूनि सन्ति उपमाप्रयोगस्थलानि। रघुवंशमहाकाव्ये तूपमाप्रयोगः सर्वातिशायी विद्यते। महाकविद्वारा प्रयुक्तानामुपमानां वैविध्यं केवलं नामनिर्देशमात्रेणैव पुरस्क्रियते-यथा (1) शास्त्रीया उपमाः - (क) वेदविषयकाः (ख) दर्शनविषयकाः (ग) यज्ञविषयकाः (घ) विद्याविषयकाः (ङ) व्याकरणविषयकाः (च) राजनीतिविषयकाः (छ) ज्योतिष विषयकाश्च।
(2) मूर्त्तस्यामूर्त्तरूपेण-दिलीपःक्षात्रधर्मज्ञवासीत्। 'क्षात्रोधर्म इवाश्रित'' (रघु. 1/13)
(3) प्रकृतिसम्बद्धाः उपमाः- (क) सूर्यसम्बद्धाः (ख) चन्द्रसम्बद्धाः (ग) वृक्षादिसम्बद्धाः (घ) पुष्पसम्बद्धाः (ङ) पशुसम्बद्धा(च) नद्यादिसम्बद्धाः(छ) पर्वतादिसम्बद्धाः (ज) पृथ्वीसम्बद्धाः (झ) द्युसम्बद्धाः (ञ) वायुसम्बद्धाः (ट) अग्निसम्बद्धाः (ठ) मासदिनादिसम्बद्धा (ड) वर्षादिसम्बद्धाः (ढ) खगादिसम्बद्धाश्च
(4) विविधविषयसम्बद्धाः- (क) देवसम्बद्धाः (ख) पुरुषसम्बद्धाः (ग) स्त्रीसम्बद्धाश्चेति।[15]

संस्कृतसाहित्यशास्त्रे काव्यप्रयोजनानि वर्णितानि सन्ति। तत्रतु शिवेतर क्षतिपूर्विका सद्यः पर निर्वृति[16], परमानन्दावाप्तये सत्काव्यरचनास्वादोऽपेक्षितः।

सच्चिदानन्द-घनस्वरूपस्य, निखिल ब्रह्माण्डनायकस्य, षड्गुणैश्वर्यसम्पन्नस्य परब्रह्माणः परमात्मनः श्रीमन्नारायणविष्णोः कीर्त्तिगानं विधाय सत्काव्यसृजन-माध्यमेन कविरात्मनो गिरां पवित्रीकृत्य देवदुर्लभं मानवजीवनं सम्यक्तया सफली करोति। आदिकविवाल्मीकिव्यास शुकदेवादिशङ्कराचार्य प्रभृतयो महापुरुषा उदाहरणस्वरूपाः सन्ति सनातनधर्मे। वर्णाश्रमव्यवस्थासमर्थकः कविः कालिदासः पुराणपुरुषोत्तमस्य श्रीहरेमाधवस्यावतार-मूर्त्तिमर्यादा-पुरुषोत्तमस्य श्री रामचन्द्रस्य रघुवंशवर्णनं कृत्वाऽऽत्मानं कृतार्थीकृतवान्। रघुवंशमहाकाव्यमाधरीकृत्य कालिदासस्योपमासु वैष्णवदर्शनस्यामिव्यञ्जना यत्र-यत्र स्थलेषु सम्प्राप्यते। तद्विषये यथामतिः किञ्चद्विमर्शयितुमीहे।

तावत्प्रथमंदशमेसर्गे- यदा लोकरावणस्य रावणस्यात्याचारैः प्रपीडिताः सन्तः सुराः निदाघार्त्ता पान्थाश्चछायावृक्षमिव श्रीमन्नारायणचरणशरणं ययुः।

**तस्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिम्।**
**अभिजग्मुर्निदाघार्त्ताश्छायावृक्षमिवाध्वगाः।।**[17]

पद्येऽस्मिन उपमारूपेण प्रयुक्तश्च्छायावृक्षः लौकिकमुदाहरणमिव प्रतिभाति। किन्तिवदं 'वृक्ष' पदमत्रोपलक्षणव्याजेन प्रसतुतमस्ति, सामान्यतयाऽऽधिभौतिकरूपेण। एषः छायावृक्षः आधिदैविकरूपेणाश्वत्थवृक्षः। भगवान् श्रीकृष्णः श्रीमद्भागवद्गीतायामर्जुनं समुपदिशन् कथयति- 'अश्वत्थः सर्ववृक्षाणा' मिति।[18] भगत्पादिशङ्कराचार्यः अस्याश्वत्थस्याध्यामिकीं व्याख्यां प्रकुर्वन ब्रूते-'न श्वः अपि स्थाता इति अश्वत्थः[19], अर्थात् सांसारिकोऽयं क्षणभङ्गुरोऽश्वत्थवृक्षः संसाररूपः श्वः भविष्यत्काले न स्थास्यति। भगवद्गीतायामूर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्[20] इत्याद्युक्त्वाऽस्यदार्शनिक स्वरूपं वर्णितं विद्यते। जिज्ञासासमाधये तत्रैव द्रष्टव्यम्। दार्शनिकस्तोत्रदृष्ट्या श्रीवैष्णवानां प्राणधनस्वरूपे 'श्रीविष्णुसहस्रनामस्तोत्रे' वृक्षोऽयं साक्षात्भगवत्स्वरूपः 555नमे नामक्रमे वर्णितः-

**वेधाः स्वाङ्गोऽजितः कृष्णो दृढः सङ्कर्षणोऽच्युतुतः।**
**वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः।।**[21]

शाङ्करभाष्ये वृक्षस्य भगवत्स्वरूपमिव स्थायित्वं निरुपयनं कथितमस्ति। यत्- 'वृक्ष इवाचलतया स्थित इति वृक्षः।' भावमिमं समर्थयति भगवती श्रुतः, यस्मात्परं नापरमस्ति किञ्चि-

द्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् ।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येक-
स्तेनेदं पूर्ण पुरुषेण सर्वम् ।।[22]

अपि च - द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलंस्वाद्वत्त्यनश्नन्यन्यो अभिचाकशीति ।।[23]

एवमेव - समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः ।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ।।[24]

अन्यदपि - स वृक्षकालाकृतिभिः परोऽन्यो यस्मात्प्रपञ्चः परिवर्त्ततेऽयम् ।
धर्मावहं पापनुदं भगेशं ज्ञात्वात्मस्थममृतं विश्वधाम ।।।[25]

(2) सर्वे देवाः सम्मिल्य भगवन्तं श्रीविष्णुं संस्तुवन् निगमागमप्रोक्त-भगवत्प्राप्तिहेतुं तमेवैकमात्रं परिगृणन्तिः-

बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः ।[26]

त्वय्येव निपतन्त्योद्या जाह्नुर्नाम ऋषिः। भगवती जगत्तापपापनाशिनी गङ्गा तत्सुतारूपेण जह्नोरपत्यंस्त्री जाह्नवीति नाम्ना सम्बोध्यते। अत्र महाकविः कथयति यद् यथा गङ्गायाः सर्वाः धाराः समुद्र एव मिलन्ति। एवमेव भिन्नाभिर्भिन्नाभि रुपासनापद्धतिभिरुपास्यमानेऽपि परमेश्वरे परब्रह्मणि महार्णवेऽन्नतः सर्वे चराचर प्राणिनः भवन्तं परमेष्ठिनमवाप्नुवन्ति इति निश्चयप्रचम्। अमराणां प्रार्थना यां प्रयुक्तः शब्दः 'जह्नुः' श्रीविष्णुसहस्रनामस्तोत्रे 244 नामक्रमे वर्णितो विद्यते।

**सत्कर्त्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ।।**[27]

अत्र शाङ्करभाष्ये भगवत्पादाः जह्नु शब्दस्याद्भुतां निरुक्तिं प्रस्तुवन्ति-

'जनान् संहारसमये अप्रह्नुते अपनयतीति जह्नुः, जहात्यविदुषो भक्तान्नयति परम्पदमितिवा'[28]

कालिदासस्य कथनमिदमनुसृत्येव सम्भवतः पुष्पदन्तोनाम गन्धर्वराजः स्वेष्टदेवतां प्रार्थयन्नाह-

त्रयी साङ्ख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः मध्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिलनानापथ जुषां
नृणामिको गम्यस्त्वमसि पयसामर्णव इव ।।[29]

(3) यदाऽयोध्याधिपतेर्दशरथस्य कौसल्यादिमहिष्यो लोकोपकाराय श्रीवैष्णवांश सम्भवं तेजो धृतवत्यस्तदा सर्वाः स्वप्नेषु शङ्खचक्रगदापद्मखड्गादिपञ्चायुधोपेतैर्वामनैर्मूर्त्तिभिरिवावृतमात्मनमपश्यन्- गुप्तं ददृशरात्मानं सर्वाः स्वप्नेषु वामनैः।
जलजासिगदाशार्ङ्गचक्रलाञ्छितमूर्त्तिभिः।।[30]

'वामन' शब्दस्य शाङ्करभाष्यं कुर्वताचार्यपादेनोल्लिखितः-बलिं वामन रूपेण याचितवान् इति वामनः। (एतत्तु पौराणिककथासुवर्णितः)। आध्यात्मिदृष्टया सम्भज इति वा वामनः' अर्थात् सदा भजनीयो भगवान इति।[32]
उपासनीयो भगवानिष्ट देवता सदा। एतदर्थं सत्प्रेरियति कठोपनिषद् श्रुतिः-
ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति।
मध्ये वामनमासीनं विश्वे देवा उपासते।[33]
शाङ्करभाष्यम्- ऊर्ध्वं हृदयात्प्राणं -वामनं संभजनीयं सर्वे।

सामवेदीय छान्दोग्योपनिषदिवारद्वयं वामनपदं प्रयुक्तमस्ति-

एत ँ संयद् वाम इत्याचक्षते। एत ँ हि सर्वाणि वामान्यभिसंयन्ति सर्वाण्येनं वामान्यभिसंयन्ति य एवं वेद।।2।। एष उ वामानीः। एष हि सर्वाणि वामानि नयति। सर्वाणि वामानि नयति य एवं वेद।।3।।
शाङ्करभाष्यम्- एवं यथोक्तं पुरुषं संयदवाम इत्याचक्षते। कस्मात्? यस्मादेतं सर्वाणि वामानि वननीयानि संभजनीयानि शोभनान्यभिसंयन्त्यभिसंगच्छन्तीत्यतः संयद्वामः।। तथैवं विदमेनं सर्वाणि वामानि पुण्यकर्मफलानि पुण्यानुरूपं प्राणिभ्यो नयति प्रापयति बहति चात्मधर्मत्वेन। विदुषः फलं सर्वाणि वामानि नयति य एवं वेद।।3।।
अपि च - सायणाचार्यकृतायां 'दीपिका' टीकायाम्-

'एतमिति- एतं यथोक्तमक्षिपुरुषं संयद्वामः संयन्ति वामानि वन नीयानि स संयद्वाम इत्येवमाचक्षते विद्वांसः। संयद्वामत्वगुणेन विशिष्टितयासावक्षिपुरुष उपास्य इत्यर्थः।[35]

**संदर्भ :**

1. *कपिलतन्त्रम्*

2. शङ्करावतरणम्-स्वामिश्रीज्ञानन्दसरस्वती वाराणसी (उ.प्र.); द्वितीयं पुष्पम्-2004 ईस्वीयं
3. सुभाषितरत्नभाण्डागारम्, द्वितीयंप्रकरणम् कविवृन्दम्, पद्यम् 63, पृष्ठसङ्ख्या 37 निर्णयसागर प्रेस, मुम्बई-2 परिवर्द्धितमष्टमंसंस्करणम्, सन् 1952 ई.
4. रघुवंशमहाकाव्यम्, सर्गः 1/4
5. चिन्तामणिकोशः, संस्कृत-हिन्दीकोशः, पृष्ठसङ्ख्या 208, वामनशिवरामआप्टेकृत
6. सर्वलक्षणसङ्ग्रहः, पृष्ठ सं. 38
7. ऋग्वेदसंहिता 1/124/7
8. नाट्यशास्त्रम् अध्यायः 16/41
9. भामहकृत काव्यालङ्कारः 2/30
10. अलङ्कारसर्वस्वम् सूत्रम् 12
यजरथकृत 'विमर्शिनी' टीकोपेतम्
11. काव्यप्रकाशः 10/124 सूत्रं/कारिका 87
12. साहित्यमीमांसा 5/117-118-120
13. काव्यप्रकाशः 10/सूत्रं 136/कारिका 92
14. पाणिनेरष्टाध्यायी 2/3/72
15. प्रौढ़रचनानुवादकौमुदी-पृष्ठं 311-312-313-314,
(डॉ. कपिलदेव द्विवेदी द्वारा विलिखता-वाराणसी)
16. काव्यप्रकाशः, प्रथमोल्लासः, कारिका द्वितीया
17. रघुवंशमहाकाव्यम् 10/5
18. श्रीमद्भागवद्गीताशाङ्करभाष्यम् 10/26
19. ''--------''गीताशाङ्करभाष्यम् 15/1
20. ''--------''गीताशाङ्करभाष्यम् 15/1-2-3
21. श्रीविष्णुसहस्रनामस्तोत्रम्ः 72 पद्येशङ्करभाष्यम्
22. श्वेताश्वतरोपनिषद् 3/9 शाङ्करभाष्यम्
23. श्वेताश्वतरोपनिषद् 4/6 शाङ्करभाष्यम्
24. श्वेताश्वतरोपनिषद् 4/7 शाङ्करभाष्यम्
25. श्वेताश्वतरोपनिषद् 6/6 शाङ्करभाष्यम्

*26. रघुवंशमहाकाव्यम् 10/26*

*27. श्रीविष्णुसहस्रनाम्रस्तोत्रम्, 39 पद्यम्*

*28. श्रीविष्णुसहस्रनाम्रस्तोत्रम, शाङ्करभाष्यम्*

*29. श्रीपुष्पदन्तगन्धर्वराजप्रणीतम् शिवमहिम्न-स्तोत्रम्; पद्यम् 7*

*30. रघुवंशमहाकाव्यम् 10/64'सञ्जीविनीटीका'*

*31. श्रीविष्णुसह स्रनामस्तोत्रम्; पद्यम् 30*

*32. ''------''------'' शाङ्करभाष्यम्*

*33. कठोपनिषद् 2/2/3 शाङ्करभाष्यम्*

*34. छान्दोग्योपनिषद् 4/15/2 +3 शङ्करभाष्यम*

*35. छान्दोग्योपनिषद्दीपिकाटीकासायणाचार्यकृता*

●●●

# 13

# प्रेक्षणककारत्वेन श्रीवेङ्कटरमणराघवन्-वर्यस्य महत्त्वाविष्कारः

*भास्वती रायः[1], सौम्यजित् सेनः[2]*

विंशशतकस्य प्रथितयशस्कः कविर्विद्वान् श्रीवेङ्कटरमणराघवन्-वर्यः संस्कृतसाहितस्य प्रख्यातः कश्चन संस्कारको नितरामेव स्मरणीयश्च विश्वविश्रुतः संस्कृतविद्वान्। पण्डितेनानेन संस्कृतभाषया नैकानि प्रणीतानि काव्यानि दृश्यश्रव्यमयानि। तानि सर्वाणि संस्कृतसाहित्यस्य नवजागरणस्य मार्गदर्शकत्वेन सन्ति, येन संस्कृतसाहित्यं विश्वस्तरे समुन्नीतं जातमित्यत्र नास्ति संशीतिः। कवेः साहित्यप्रतिभा सर्वत्र विराजते। विशेषतया नाट्यसाहित्यनिर्मितौ तदीयं प्रातिभं पाटवं स्पष्टतया दृग्गोचरीभवति। वस्तुतः संस्कृतस्य प्रचाराय प्रसाराय च नाट्यकारेण द्वादश-रूपकाणि ग्रथितानि। तद्यथा- अवन्तिसुन्दरी, विजयांका, विकटनितम्बा, कामशुद्धिः, पुनरुन्मेषः, प्रतापरुद्रविजयः, महाश्वेता, रासलीला, विमुक्तिः, लक्ष्मीस्वयंवरः, आषाढस्य प्रथमदिवसे, अनार्कली चेति। रूपकेषु प्रेक्षणकस्यैव संख्याधिका। कामशुद्धिः, पुनरुन्मेषः प्रेक्षणकत्रयी चेत्यादीनि डॉ. वेङ्कटरमणराघवन् वर्येण विरचितानि प्रेक्षणकाख्यानि उपरूपकाणि। विजयांका, विकटनितम्बा अवन्तिसुन्दरी चेति प्रेक्षणकं त्रितयमेकत्र 'प्रेक्षणकत्रयी' रूपेण समाख्यातम्। 'आकाशवाणी' इत्यत्र तस्य सर्वाण्येव प्रेक्षणकानि सम्प्रचारितान्यभवन्। समाजस्य विविधाः सामाजिकादिसमस्या अत्र विषयत्वेन पदङ्कुर्वन्ति। पाश्चात्याङ्गिकप्रभावप्रभावितेन डॉ. वे. राघवन् -महोदयेन सर्वप्रथमं गीर्वाणवाण्यां यात्रामूलकानाम् ओपेरानाटकानां प्रचलनं कृतम्। तस्य रासलीला, प्रेक्षणकत्रयी, कामशुद्धिः, विमुक्तिः चेत्यादिषु रूपकेषु तादृशः प्रयोगो दृश्यते। यद्यपि पाश्चात्य पद्धतिमनुसरन्नपि स संस्कृतस्य प्राचीनवैभवं न कदापि विस्मरति। रासलीला-

प्रेक्षणके गीतिधर्मितापि संलक्ष्यते। एवं प्रेक्षणकेषु नाट्यकर्तुः नाट्यप्रतिभायाः निदर्शनमपार्थिवं द्रष्टुमलम्।

**कुञ्चिपदानि**

आधुनिकसंस्कृतसाहित्ये प्रथितयशस्कः प्रख्यातविद्वान् डॉ.वेङ्कटरमण राघवन्-पादो महान् कश्चन संस्कृतकविरस्ति। न केवलं कविरूपेण तस्य प्रसिद्धिरासीद्, अपि च विख्यातनट-नाट्यनिर्देशक-नाट्यतत्त्वविशारदरूपेणापि। संस्कृतोत्थाने सदा कर्मयोगी पण्डितोऽयं 1908 ईशवीयाब्दे अगस्तमासस्य 22 दिनाङ्के तिरुर्वाः-नगरे जनिं लेभे। सम्प्रति तिरुवारूः तामिलनाडुराज्यस्य कावेरीनद्या डेल्टाप्रान्ते स्थितः। सामवेदि-स्मार्त-ब्राह्मणवंशे जातः स त्रयाणां भ्रातृ णां मध्ये तृतीय आसीत्। तस्य पिता एस. वेङ्कटराम-अय्र्-(Venkatarama Iyer)- वर्यः, माता च मीनाक्षी देवी। तस्मिन् वेङ्कटे सहजा कारयित्री भावयित्री च प्रतिभा सदावर्तत। शक्त्याभ्यां तेन संस्कृत-आङ्गल-तामिलभाषासु साकल्येन प्रायः विंशत्यधिकैकशतकानि पुस्तकानि द्वादशशतकानि गवेषणापत्राणि च ग्रथितानि। तस्य प्रमुखग्रन्थद्वयं तावत् —सम्पादितः भोजदेवस् ; ''शृङ्गारप्रकाशः'' तथा "Some Concepts of Alaṅkāra Śāstra" चेति। डॉ. वे.राघवन~-वर्यः भोजदेवस्य ''शृङ्गारप्रकाशः'' इति सम्पादनकार्यस्य कृते बहुधा सभाजितः। तदतिरिच्य 'पद्मभूषण'-'जवाहरलाल-नेहेरुफेलो'–'वाचस्पती'त्यादयः पुरस्कारा अपि तेनावाप्ताः। साहित्य-अकादेमीपुरस्कारेणापि गौरवान्वितः स संस्कृतजगति कविकोकिलः सकलकलाकलापश्च चेत्यादिभिरुपाधिभिः प्रसिद्धः। कविगुरुणा रवीन्द्रनाथ-ठाकुरेण विरचितः 'वाल्मीकिप्रतिभा' इत्याख्यो ग्रन्थस्तेनैव प्राथम्येन संस्कृतभाषायामनूदितः, यत्र दस्युः रत्नाकरः पश्चात् वाल्मीकिः कविरभूत्। कवेः साहित्यप्रतिभा सर्वत्र विराजते। विशेषतया नाट्यसाहित्यनिर्मितौ तदीयं प्रातिभं पाटवं स्पष्टतया दृग्गोचरीभवति। संस्कृतस्य प्रचाराय प्रसाराय च नाट्यकारः नाट्यसाहित्यानि प्रणिनाय प्रधानतया। कुशलो नाट्यकारः छात्रजीवनादेव संस्कृतरूपकस्य प्रणयनं कर्तुमारेभे। अनार्कली इति श्रेष्ठं प्रकरणं विंशतिवर्षीयेण बालकेन वेङ्कटवर्येण प्रणीतमिति सुस्पष्टं प्रतीयते नाट्यनिर्मितौ तदीयमप्रतिमं प्रातिभं पाटवम्।

**डॉ.वेङ्कटरमणराघवन्-वर्यस्य नाट्यसाहित्यविच्छित्तिः**

कविवरवेङ्कटप्रणीतानि द्वादश रूपकाणि तावत् अवन्तिसुन्दरी,

विजयांका, विकटनितम्बा, कामशुद्धिः, पुनरुन्मेषः, प्रतापरुद्रविजयः, महाश्वेता, रासलीला, विमुक्तिः, लक्ष्मीस्वयंवरः, आषाढ़स्य प्रथमदिवसे , अनार्कली च।

रूपकेषु प्रेक्षणकस्यैव संख्याधिका। कामशुद्धिः, पुनरुन्मेषः प्रेक्षणकत्रयी चेत्यादीनि डॉ. वेङ्कटरमणराघवन्-वर्येण विरचितानि प्रेक्षणकाख्यानि उपरूपकाणि। विजयांका, विकटनितम्बा अवन्तिसुन्दरी चेति प्रेक्षणकं त्रितयमेकत्र 'प्रेक्षणकत्रयी' रूपेण समाख्यातम्।

**प्रेक्षणकानां कथासारो महत्त्वञ्च**

आदावेव प्रश्नो जागर्ति यत्किं नाम प्रेक्षणकमिति? तथाह्युच्यते विश्वनाथकविराजेन साहित्यदर्पणाख्ये साहित्यदर्पणे –

**''गर्भावमर्षरहितं प्रेङ्खणं हीननायकम्।**
**असूत्रधारमेकाङ्कमविष्कम्भप्रवेशकम्।।**
**नियुद्धसम्फेटयुतं सर्व्ववृत्तिसमाश्रितम्।**
**नेपथ्ये गीयते नान्दी तथा तत्र प्ररोचना''।।[3] इति।**

अत्र दर्पणकारेण प्रेक्षणकस्य 'प्रेङ्खणम्' इत्यभिधान्तरं प्रयुक्तम्। प्रेङ्ख्यते रसानुभवानन्देन हृदयमान्दोल्यतेऽनेनेति व्युत्पत्तेः प्रेङ्खणं नाम प्रेक्षणकम्। अतो गर्भविमर्षाभ्यां सन्धिभ्यां रहितम्, हीनो निदृष्टो नायको यत्र तत्, न विद्यते सूत्रधारो यत्र तत्, एक एवाङ्को यस्मिन् तत्, न विद्यते विष्कम्भकप्रवेशकौ यत्र तत्, नियुद्धेन बाहुयुद्धेन सम्फेटेन रोषभाषणेन च युतम्, तथा सर्वाभिः चतसृभिः कौशिक्यादिभिः वृत्तिभिः समाश्रितं समन्वितम् उपरूपकं हि प्रेक्षणकं स्यात्। असूत्रधारत्वादेवेह पूर्वरङ्गाङ्गभूता नान्दी तथा च भारत्या वृत्तेरङ्गविशेषा प्ररोचना नेपथ्ये केनचिन्नटेन पठ्यत इति ज्ञेयम्।

**3.1. प्रेक्षणकत्रयी**

प्रख्यातनाट्यकृता डॉ. वेङ्कटरमणराघवन्-वर्येण प्रणीते 'प्रेक्षणकत्रयी' इति प्रेक्षणके त्रीणि प्रेक्षणकानि पदङ्कुर्वन्ति। तानि क्रमेण यथा - विजयाङ्का, विकटनितम्बा, अवन्तिसुन्दरी चेति।

**3.1.1. विजयाङ्का**

प्रेक्षणकत्रय्यां प्रथमप्रेक्षणकं तावत् 'विजयाङ्का' इति। एकाङ्कयुतस्य प्रेक्षणकस्यास्य नायिका विजयाङ्का, सासीत् कर्णाटराजचन्द्रादित्यस्य महाराज्ञी

तथा च पुलकेशिद्वितीयस्य स्नुषा। विजयाङ्का विद्या विज्जिका वेति नाम्नापि ज्ञायते। वैदर्भीमार्गाश्रितकाव्यरचनायां विजयाङ्का महाकविं कालिदासमेवानुसरतीति कविराजराजशेखरेण बहुशः प्रशंसिता हि सा।

कर्णाटराजस्य चन्द्रादित्यस्य प्रासादैकदेशे सरस्वतीमन्दिरे प्रविशत्युपविष्टः कस्मिंश्चित्कोशे दत्तावधानः आस्थानकविराचार्यः। कतिपयनिमेषानन्तरं तत्र प्रविशति राजा चन्द्रादित्यः। कविमाचार्यं दृष्ट्वा कर्णाटसम्राट् तं 'साहित्यसम्राट्' इत्युक्त्वा वन्दते। ततः राजा कविमाचार्यमवदत् यत् काञ्चीमण्डलस्य पल्लवेश्वरस्य महाकवेः दण्डिनः काव्यलक्षणग्रन्थः 'काव्यादर्शः' अस्मदवलोकनाय प्रेषितः। अस्मिन्नेव समये विजयाङ्का तत्रोपस्थितासीत्। सा कारयित्रीप्रतिभायुता काचन प्रख्याता कवयित्री आसीत्। अतुलनीया हि तस्याः काव्यप्रतिभा। राजा राज्ञ्या विजयाङ्कया सह मिलित्वा तद्ग्रन्थं निपुणतया परीक्षितुमिच्छति। कविः दण्डिनः काव्यादर्शग्रन्थं समीक्ष्य ग्रन्थस्यास्य प्रशंसां कृतवान् 'काव्यालंकारशास्त्रमेतत् निर्मितवान् दण्डी सम्यगलंकरोति 'आचार्य'-दण्डीति विशेषणम्'[4]। इति। विजयाङ्का तु काव्यादर्शस्य मङ्गलश्लोके प्रत्यक्षविरोधदोषमपश्यदिति स्वस्याः कविप्रतिभया गर्विता विजयाङ्का आत्मानं श्रेष्ठेति मनुते स्म। सा केवलं ब्रह्मा व्यासः वाल्मीकिश्चेत्यादिकवीन् महाकवित्वेन स्वीकृत्यान्येषां कवीनां सर्वथा चकार त्वनादरम्। आचार्यः राजा च विजयाङ्कायाः नवीनं तथा सरसं काव्यमास्वादयितुमुत्सुकौ स्तः। प्रसादादिगुणसमृद्धं तस्याः काव्यं च श्रुत्वा तौ प्रसन्नावभवताम्। कवयित्र्याः सख्या तत्काव्यकवनगुणं प्रशंस्य निगदितम् –

**''सरस्वतीव कार्णाटी विजयाङ्का जयत्यसौ।**
**या वैदर्भगिरां वासः कालिदासादनन्तरम्।।''[5] इति।**

विदुष्याः विजयाङ्कायाः कतिपयं निर्वाचितं श्लोकमाश्रित्य कविना 'विजयाङ्का' इत्याख्यस्य प्रेक्षणकस्य संलापः संस्कृतभाषया रमणीयतया सज्जी—कृतः, येन तस्य काव्यलेखनकौशलं सुष्ठु सहृदयहृदयसकाशं प्रकाश्यते। तेन श्लोकं द्विधा विभज्य वचन-प्रतिवचनयोः सफलः प्रयोगः कृतः। यथा विजयाङ्कायाः सखी यदा काव्यादर्शस्य मङ्गलश्लोकमपठत्तदा तदीयं प्रतिवदनं श्रूयताम् -

**"नीलोत्पलदलश्यामां विज्जिकां मामजानता।**
**वृथैव दण्डिना प्रोक्ता सर्वशुक्ला सरस्वती।।"[6] इति।**

3.1.2. विकटनितम्बा

प्रेक्षणकत्रय्यां द्वितीयप्रेक्षणकस्य नायिका विकटनितम्बापि प्राचीन भारतस्य सुप्रसिद्धा काचन कवयित्री तथासीत् संस्कृतविदुषी। सम्प्रति अनया विरचितं समग्रकाव्यं नोपलभ्यते। केवलं तस्याः कतिपयाः श्लोकाः 'सूक्तिसंग्रहग्रन्थे' तथा च अलंकारशास्त्रेषु च दृश्यन्ते। तस्याः गुरोः नाम गोविन्दस्वामी, यः स्वस्य शिष्यायाः काव्यनैपुण्ये तु नितरां प्रसन्नोऽपि विवाहविषये चिन्तित आसीत्। तच्चिन्तायाः कारणमासीद् यद् ईदृशी विदुषी कन्या कथं योग्यं विद्वांसं पतिं लभेतेति? किन्तु दुर्भाग्येन कश्चन प्राकृतभाषाज्ञेन मूर्खजनेन साकं तस्या बभूव परिणयः। विकटनितम्बायाः मूर्खभर्तुरुपहासं कुर्वन्त्यासीत् सखीमण्डली। तासु काचन सखी मूर्खभर्तारं परिहसन्त्याह –

**"काले माषं सस्ये मासं वदति सकाशं यश्च शकासम्।**
**उष्ट्रे लुम्पति रं वा षं वा तस्मै दत्ता विकटनितम्बा"।।[7] इति।**

इत्थमेव प्रचलिता तत्सम्बन्धिनीं किंवदन्तीमाश्रित्य प्रणीते प्रेक्षणकेऽस्मिन् कुशलनाट्यकारेण श्रीवेङ्कटरमणराघवन्-वर्येण विदुष्याः विकटनितम्बायाः चरित्रं निपुणतया चित्रितम्, येन प्रेक्षकाः प्रेक्षणकस्यास्य—उदृष्टसाहित्यशैलीं तर्कयन्ति।

**3.1.3. अवन्तिसुन्दरी**

प्रेक्षणकत्रय्या अन्तिमप्रेक्षणकस्य नायिका अवन्तिसुन्दरी कविराजस्य राजशेखरस्य संस्कृतविदुषी पत्नी आसीत्। सा प्रख्यातेषु साहित्यसमीक्षकेष्वन्यतमा। एकाङ्कयुतेऽस्मिन् प्रेक्षणके अवन्तिसुन्दरी स्वगृहे 'कर्पूरमञ्जरी'ति सट्टकं पठन्त्यासीदित्यादौ दृश्यते। अस्मिन्नेव काले तद्गृहं प्रविश्य 'त्वं किं पठसी' ति पृष्टवान् राजशेखरः। प्रत्युत्तरेण रत्नाकरकवेः कृतिरियमिति ज्ञातम्। पुनः कः खल्वयं रत्नाकरः कविरिति जिज्ञासायां सोत्तरति –

**'बालकविः कविराजः निर्भयराजस्य तथा उपाध्यायः'।[8] इति।**

राजशेखरः स्वपत्न्याः साहित्यप्रतिभया नितरां प्रभावित आसीत्। स कथयति यत् प्राकृतभाषया 'कर्पूरमञ्जरी'ति सट्टकं तेन स्वपत्न्या आग्रहेणैव प्रणीतमिति। अवन्तीसुन्दरी सट्टकस्यास्य मञ्चनं दिदृक्षते। तदर्थं राजशेखरः भरताचार्याय सन्देशं प्रेषितवान् –

**"चाहमानकुलमौलिमालिका राजशेखरकवीन्द्रगेहेनी।**
**भर्तुः कृतिमवन्तिसुन्दरी सा प्रयोजयितुमेतदिच्छति।।"[9] इति।**

तदनन्तरमवन्तीसुन्दरी राजशेखरं पृष्टवती यदस्मिन् सट्टके किं लिखितमस्तीति। अत्र विविधानामालंकारिकाणां मतानां व्याख्यास्तीति कविराजेन राजशेखरेण प्रोक्तम्। ग्रन्थेऽस्मिन् स स्वपत्न्याः मतं सज्जीकर्तुमियेष। कविराजराजशेखरस्य पत्नी अवन्तीसुन्दरी तदीयाभिमतमुपस्थापयितुमाशङ्कते। पश्चात् राजशेखरस्य प्रोत्साहनेन सा स्वाभिमतं प्रकटितवती –

**"गुणालङ्काररीत्युक्तिशब्दार्थग्रथनक्रमः।**
**स्वदते सुधियां येन वाक्यपाकः स मां प्रति।।**
**सति वक्तरि सत्यर्थे शब्दे सति रसे सति**
**अस्ति तन्न विना येन परिस्रवति वाङ्मधु"।।[10]**

इत्येव तस्या मतमासीत् काव्यशास्त्रविषये। ततस्तया काव्योपयोगिताविषये स्वस्वामिना साकं चर्चापि कृता। एवमेव किंवदन्त्याश्रितेयं कृतिर्नितरामेव हृद्यानवद्या सहृदयहृदयह्लादिनी च सञ्जातेत्यत्र नास्ति संशयलवोऽपि।

यद्यपि प्रेक्षणकत्रय्यां स्थानमवाप्तेषु त्रिष्वेवोपरूपकेषु विश्वनाथोदीरितानां समेषां प्रेक्षणकलक्षणानां सङ्गतिर्नैव भवति हीननायकानवस्थितेः, तथापि तेषामेकाङ्कोपेतत्वात्, सूत्रधार—कृतानारम्भत्वात्, गर्भविमर्षसन्धिरहितत्वात्, विष्कम्भकप्रवेशकयोरभावात्, कौशिक्यादिर्वृत्तिभिर्विशिष्टत्वात्, नान्दीप्ररोचनाद्ययुतत्वाच्च प्रेक्षणकत्वं ध्रुवमेव सिद्धं भवतीत्यवधेयम्।

**3.2. रासलीला**

नाट्यकारः वेङ्कटरमणराघवन् - वर्यः व्यासकृत श्रीमद्भागवतपुराणतः श्रीकृष्णस्य गोपिभिः साकं रासलीलायाः पद्यान्याश्रित्य प्रेक्षणकमिदं रचयामास। शृङ्गाररसप्रधाने प्रेक्षणकेऽस्मिन् चत्वारि दृश्यानि सन्ति। अत्र नायको भगवान् श्रीकृष्णो नायिकाश्च गोप्यः। शरतच्चन्द्रिकायां श्रीकृष्णो वनविहारार्थं वेणुना कामवर्धनीरागमवादयत्। वेणुरावं चाकर्ण्य गोप्यो भगवतः समीपमादृष्टाः। योगेश्वरस्ततश्च गोपीभिः सह नदीतीरे विहारं कृतवान्। काचन गोपी श्रीकृष्णाय स्रजं प्रायच्छत्। अपरा च काचिद्गोपी तस्मै वनज्योत्स्नां तुलसीं च दत्तवती। कृष्णः सर्वासामुपहारं सानन्दं स्वीचकार। सर्वा गोप्यो भगवतः स्नेहपरवशादात्मानं श्रेष्ठा

इति  मन्यन्ते स्म। कृष्णोऽहङ्कारेणावृतानामेतासां गोपीनां संस्पर्शमत्यजत्। तदनु च प्रतिवनमन्विष्यमाणा गोप्यो यमुनातीरमागत्य रोदनं कृष्णगीतानि चारब्धवत्यः। यदा गोपीनामहङ्कारो भस्मीभूतोऽभवत्, अन्तःकरणं च शुद्धं जातं, तदैव भगवान् श्रीकृष्णस्तासां समीपं पुनः त्वरितमाविर्भूय सर्वाभिः सह रासनृत्यमकरोदित्यस्ति वस्तु प्रेक्षणकस्य।

'रासलीले'ति एकाङ्कि प्रेक्षणकमिदं स्त्रीचरित्रबहुलं तथा च पाश्चात्यस्य ओपेरया प्रभावापन्नमिति मन्यावहे। अस्य नायको भगवान् श्रीकृष्णः। स च नायको धीरललित इति धनञ्जयेन कथ्यते। अस्य नायिका राधा। सा च प्रगल्भा, गम्भीरा मानिनी च। प्रेक्षणकस्य सम्यक् परिशीलनात् ज्ञायते यदत्र शृङ्गाररसोऽङ्गिरसः। परन्तु कृष्णानुरागकारणादालङ्कारिकस्य रूपगोस्वामिपादस्य नये प्रेक्षणकमिदं भक्तिरसयुक्तमित्यपि वक्तुमलम्। प्रेक्षणकस्य वृत्तिविषये कविराजविश्वनाथराह प्रेक्षणकलक्षणप्रतिपादनावसरे यत् 'सर्व्ववृत्तिसमाश्रितम्'[11] इति। अत्र वृत्तिषु कौशिकीवृत्तिरस्ति। अपि च, विद्यन्तेऽत्र माया-मालव-पूर्णचन्द्रिकादयः पञ्चविंशति रागा। तेषां प्रयोगः प्रत्येकं श्लोके कविना निपुणतया क्रियते। गोपीनां मध्ये कृष्णं प्रति गमनार्थं या उत्सुकतास्ति, सा हि कामवर्धनीरागेण व्यज्यते। यथा –

**''निशम्य गीतं तद् अनङ्गवर्धनं व्रजस्त्रियः कृष्णगृहीतमानसा।**
**आजग्मुरन्योन्यमलक्षितोद्यमाः स यत्र कान्तो जवलोलकुण्डलः।।''[12] इति।**

अनेन ज्ञायते यत् श्रीवेङ्कटरमणराघवन्-वर्यः शास्त्रीयसङ्गीतस्य मर्मज्ञो विद्वानासीदिति। स्वकृतेरस्याः कवनकारणत्वेन वक्ति कविः यत् –

**''स्ववाक्यपत्राण्यायोज्य शुकश्लोकसुमैस्सह।**
**जुगुम्फ राघवो रासलीलां वन्यामिव स्रजम्।।''[13] इति।**

**3.3. लक्ष्मीस्वयंवरः**

देवदानवैः कृतस्य समुद्रमन्थनस्य पौराणिकलोककथामाश्रित्य रचितमिदं प्रेक्षणकम्। दानवैः पराभूताः देवाः विष्णुदेवस्य परामर्शेन दानवैः सह मित्रतां स्थापयित्वा समुद्रं ममन्थुः। समुद्रमन्थनाद् गरलं, चन्द्रः, ऐरावतः, कौस्तुभमणिः च उद्भूताः, शिवादिदेवैः साग्रहं येषां ग्रहणं कृतम्। पश्चात् समुद्भूता देवी लक्ष्मी, किञ्चित्कालान्तरं वारुणी च बहिर्निर्गता। राक्षसाः वारुणीं यदा नीतवन्तस्तदा लक्ष्मीं स्वयंवराय प्रेषयति। देवी लक्ष्मी विष्णुदेवतां चिनोति स्म। विष्णुदेवः

धन्वन्तरेरमृतघटं नीत्वा पलायमानं दानवमपश्यत्। ततो धृतमोहिनीरूपो विष्णुः दैत्यानवदत् यत्स तेषां कृते एव समागतः। दैत्यास्तदा अमृतकलशं मोहिन्यै ददुः। अन्ते च छद्मवेशी मोहिनीरूपधारी विष्णुरमृतं देवेभ्यः दत्त्वा तांश्चामरान् चकारेत्यस्य कथावस्तु।

सङ्गीतात्मकं प्रेक्षणकमिदं पाश्चात्य-ओपेरया सुतरामेव प्रभावितम्। अस्य नायिका लक्ष्मी, नायकश्च विष्णुः। नाट्यशास्त्रदिशा प्रेक्षणकमिदं गर्भावमर्षरहितं तथा देवदानवसमरवर्णोपेतम्। अपि च, नेपथ्ये नान्दीह कर्तव्येति नियमोऽपि न लङ्घितः प्रेक्षणकेऽस्मिन्, यतो नान्द्यन्त एव पात्रस्य पौराणिकाख्यस्य प्रवेशो जायते। तेन नान्द्यत्र नेपथ्यादेव विहितेति ज्ञायते। तथाहि नाट्यकारो नान्दीश्लोके देवीं लक्ष्मीमवन्दत शार्दूलविक्रीडितच्छन्दसा –

**''लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गधामेश्वरीं**
**दासीभूतसमस्तदेववनितां त्रैलोक्यदीपाङ्कुराम्।**
**श्रीमन्मन्दकटाक्षलब्धविभवब्रह्मेन्द्रगङ्गाधरां**
**त्वां त्रैलोक्यकुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम्''।।[14] इति।**

परन्त्वत्र उत्तमप्रकृतेः नायको विष्णुः वर्तत इति प्रेक्षणकलक्षणं नैव सङ्गच्छते। अर्थोपक्षेपकेषु विष्कम्भप्रवेशकयोरभावोऽत्र दृश्यते। अत्र सूत्रधारस्य स्थानं पौराणिकेन गृहीतमिति केषाञ्चिन्मतम्। परं स पौराणिकस्तु नान्दीपाठं न करोति। नान्द्याः समनन्तरमेव प्रस्तावनात्र प्रारभ्यते। तेन प्रेक्षणकस्येतिवृत्तवर्णना जायते। पुराणवृत्तान्ताश्रितं प्रेक्षणकमिदं वरलक्ष्मीव्रतसमये आकाशवाण्या मद्रकेन्द्रात् 9-8-1949 दिवसे प्रयुक्तमभवदित्यस्य प्रख्यातिविषयमपि स्पष्टीकरोति।

### 3.4. आषाढस्य प्रथमदिवसे

'आषाढस्य प्रथमदिवसे' इति एकाङ्कविशिष्टे प्रेक्षणकेऽस्मिन् वेङ्कटरमणराघवन्-वर्येण महाकवेः कालिदासकृतस्य खण्डकाव्यस्य मेघदूतस्य पद्यानि गद्याकारेणानूदितानि। कालिदासयक्षयोः संवादात्मकस्य रूपकस्यादौ दृश्यते यत् कस्मिंश्चित् पर्वते कालिदासः वासं कुर्वन् आसीत्। तत्र यक्षेण सह तस्य साक्षात्कारोऽभवत्। कालिदासः पर्वतस्यास्य नाम रामगिरिः इति तस्मादेव ज्ञातवान्। अतः स रामं स्मृत्वा तस्य पदचिह्नानि दृष्ट्वा आत्मशुद्धिं कर्तुमियेष। तौ परस्परं स्वप्रवासस्याख्यानं कथितवन्तौ। कालिदासः यक्षस्य दुःखं श्रुत्वा तं सान्त्वयितुं प्रयतते। प्रियाविरहेण व्यथितः यक्षः कालिदासं कथयति यत्

शापस्याधिकः कालो यद्यपि मया व्यतीतः रामगिरौ, किन्तु कथमहमवशिष्टं वर्षाकालमेनं यापयिष्यामीति। ततः कालिदासः यक्षमाषाढस्य प्रथमे दिवसे पर्वतशिखरे स्थितं मेघं दर्शयति। मेघं दृष्ट्वा उन्मत्तः स यक्षः मेघमेव सन्देशवाहकत्वेन चितवानिति कालिदासीयमेघदूतवृत्तमेव वर्णितमस्ति। विशेषस्तु कालिदासस्य पात्रतेति कालिदासस्य मेघदूतकाव्यं कालिदासस्यैव स्वजीवनवृत्तमिति मतमेव प्रकृतकवेः वेङ्कटवर्यस्यापि मतमित्यावां मन्यावहे। प्रेक्षणकेऽस्मिन् कालिदासस्य 'अये कोऽपि अहमिव एकाकी अत्र परिभ्रमती'ति[15] वाक्यं तस्य प्रमाणम्।

अत्र पात्रसंख्या अत्यल्पा। केवलं द्वे एव नाटकीयचरित्रे कालिदासः यक्षश्च। तयोः संस्कृतभाषया वार्तालाप एव प्रेक्षणकस्यास्योपजीव्यो विषयः। वार्तालापोऽयं नातिदीर्घः। तदर्थमस्य पठने च दर्शने च सहृदयस्यानासक्तिः कथमपि नानुगच्छति। आकाशवाण्या मद्रकेन्द्रात् प्रेक्षणकमिदं प्रदर्शितम्। नाट्यकारो वार्तालापमेनं दृश्येष्वङ्केषु वा नाभाजयत्। अस्योपरूपकस्य लेखनशैली मेघदूतमिव प्रसादगुणगुम्फिता वैदर्भीमार्गाश्रिता। अतो मेघदूतकाव्यवाचने य आनन्दो भवति, स एवात्रापि लभ्येतेत्यत्र नास्ति विप्रतिपत्तिः।

**3.5. महाश्वेता**

प्रेक्षणकमिदं नाट्यकारेण डॉ.वेङ्कटरमणराघवन्-वर्येण महाकवि-बाणभट्टविरचितां कादम्बरीकथामुपजीव्य विरचितम्। अत्राप्यस्त्येकोऽङ्कः। कादम्बर्यां समुपवर्णितं महाश्वेताचन्द्रापीडयोः कथाप्रसङ्गमत्र प्रस्तौत्यसौ कविः। रङ्गमञ्चे महाश्वेता शिवस्य स्तुतिमगायत्। तस्मिन्नेव समये तत्र प्राविशत् नायकः चन्द्रापीडः। स महाश्वेतायाः गीतमाकर्ण्य कुतूहलेन परितः अवलोक्य भगवतः दक्षिणमूर्तेः पुरतः ब्रह्मासने उपविष्टां गायन्तीं कन्यामेकामपश्यत्। तस्याः गीतं श्रुत्वा चन्द्रापीडः विस्मितः सञ्जातः। उत्सुकः स कन्यायाः परिचयं पप्रच्छ। महाश्वेतापि स्वस्य जन्मादिवृत्तान्तं कथयितुमारब्धा। नवयौवनदशायामच्छोदसरोवरे कर्णे कुसुममञ्जरीभिः शोभितः स्नानार्थमागतः मुनिकुमार एकस्तया दृष्टः। तस्मिन्नेव तस्या हृदयमाबद्धमभवदित्यादि कथावस्तु कविना प्राञ्जलया गिरात्र समुपवर्णितम्। एवमेव कविवरेण दृश्यकाव्येऽस्मिन् 'कादम्बरी'ति कथाकाव्यस्य शिवसिद्धायतनवर्णनायाः प्रारभ्य कामाकुल-महाश्वेता-दशावर्णनं यावत् वर्णितविषयाणां सुन्दरं चित्रणं चित्रितम्। अत्र नाट्यकारेण प्रसादगुणयुक्तानि

वाक्यानि प्रयुक्तानि। अस्यां रचनायां पाञ्चालीरीतेः प्रयोगो दृष्टिपथमायाति। प्रेक्षणकेऽस्मिन् केवलं द्वौ एव पात्रौ स्तः महाश्वेता चन्द्रापीडश्च। तदर्थमस्योपरूपकस्य नायक उत्तमः भवति। अत्र कवेः रचनाशैली क्वचित् दीर्घसमासमण्डिता, क्वचित् अल्पसमासपूरिता, क्वचित् च समासरहिता। क्वचित् मधुरपदविन्यासेन क्वचिद्वा बहुलसमासमेदुरतया विलक्षणमिदमुपरूपकम्। एवमेव कथाकाव्यान्तर्गतवृत्तमिह प्रकृतकवेः काव्यकवनकलाकौशलेन नाट्यरूपं दधत् सहृदयान्तःकरणमाह्लादयतीति निश्चप्रचम्।

**3.6. कामशुद्धिः**

'कामशुद्धिरि'ति महाकविकालिदासस्य कुमारसम्भवमिति महाकाव्यमवलम्व्य डॉ. वेङ्कटरमणराघवन्-वर्येण विरचितमेकाङ्कं लघुप्रेक्षणकम्। कुमारसम्भवे नायिका पार्वती, नायकश्च परमेश्वरः। किन्तु अत्र नायिका नायकश्च भिन्नौ। अस्य प्रेक्षणकस्य नायकः मदनः तथा कामदेवः, नायिका च रतिः। वस्तुतो वेङ्कटरमणराघवन्-महाभागः स्वप्रतिभामिह प्रदर्शयन् महाकाव्यीयं कथावस्तु किञ्चित्परिवर्त्य नाट्यरूपेण वर्णयति। मुनीनां तपस्यायां विघ्नकारिणं पापकर्मणि च प्रलिप्तं कामदेवं सात्त्विकधर्माचारिणी रतिः सन्मार्गम् आनयति। पत्न्याः रतेः यत्नेन कामदेवस्य शुद्धिः भवतीत्यस्य प्रेक्षणकस्य वर्णनीयो विषयः। कामदेवः नितरामेव पापाधमो जनः। तस्य पापाचरणात् क्रुद्धा रतिः स्वपतिं परित्यक्तुं कामयते। तथापि कामदेवोऽयं स्वस्य पापकर्माणि आनन्दजनकानि मन्यते। स रतिमाह यत् –

**''अयि! कथं नाम मामेवमुपालभसे, यत्प्रसादाज्जगयानन्दमनुभवन्ति।''[16] इति।**

रतिस्तु तमुपेक्षते। सा भर्तृतुः पापस्य प्रायश्चित्ताय आराधयति परमेश्वरम्। रतिमुपदिशति परमेश्वरः यदसत्कर्म भर्तृतृपरित्यागः च उभयमेव न शोभनकर्म, निपुणा भार्या भर्तृतुः चेतसि प्रविश्य सान्त्वनादिभिरुपायैः तस्याव्यवस्थितजीवनं निरोधयेदिति। यथा ''लोहान्तरैः धातुभिश्च दूषितामिति न हेम परित्यक्तव्यं, किन्तु पाकेन शोधयितव्यम्'' इति, तथैव दक्षपत्नी रतिः कामदेवस्य उच्छृङ्खलजीवनं परिष्कृत्य तं शुद्धमकरोत्।

कुशलनाट्यकारेणोपरूपकस्यास्य प्रारम्भे प्रयोगातिशयः नाम प्रस्तावना विहिता। अनया प्रस्तावनया प्रेक्षणकेतिवृत्तस्य तथा च कवेः रमणीयः परिचयः

प्राप्यते। प्रस्तावनाया अनन्तरं प्रेक्षणकस्य संलाप आरभ्यते। संलापः क्वचित् रोषभाषणेन संयुत इति प्रेक्षणकलक्षणमप्यत्र संगच्छते। अस्य लघुत्वात् दर्शकानां रुचिरस्मिन्नवश्यं स्यादित्यत्र नास्ति संशीतिः। दृश्यकाव्येऽस्मिन् सर्वाणि पात्राणि संस्कृतभाषया वदन्तीत्यत्र निकृष्टपात्राणि न सन्ति। अत्र नायकस्य कामदेवस्य रूपद्वयमस्ति। प्रेक्षणकस्यादौ कामदेवस्य दुष्टरूपं दृश्यते, अन्ते चालक्ष्यते तदीयमुदात्तरूपम्। अपि च, ग्रन्थकारेण स्वनवीनकल्पनया कामदेवस्य भार्यायाः रतेः सुन्दरं चरित्रं निर्मितमत्र। प्रेक्षणकेऽस्मिन् नाट्यदिशा नान्दी नास्ति। अन्तिमे भरतवाक्यमस्ति। परमेश्वरेण भरतवाक्यमिदमुक्तम् –

**''ज्ञानाग्निपरिपूतो यः सर्वक्षेमैककल्पकः।**
**स वः प्रकाशतां कामः मत्स्वरूपादनन्तरः।।''[17] इति।**

अत्रापि नाट्यशास्त्रस्य किञ्चित् लक्षणानि दृश्यन्ते। कालिदास इव ग्रन्थकारोऽपि मनुते यत् विच्छेदं विना प्रेमा कदापि पूर्णतां न प्राप्नोति। 'अनार्कली'ति प्रकरणे तेन विषयेऽस्मिन् निगदितम् 'वियोगविघ्नकष्टानि विना पुष्टी रसस्य का' इति। एष एव सन्देशः कविना कामशुद्धीत्युपरूपके प्रदत्तः। अत एव दुष्टकामदेवः विवेकाग्नौ तप्तो भूत्वा मोक्षमन्ते प्राप्नोति। तदतिरिक्तमुपरूपकेऽस्मिन् आदर्शपत्न्याः रतेः पतिविषयकं कर्त्तव्यमप्यस्माभिः विचारणीयमिति प्रेक्षणकस्यास्ति महत्त्वमसीमम्।

**3.7. पुनरुन्मेषः**

डॉ. वेङ्कटरमणराघवन्-महोदयेन एकाङ्किप्रेक्षणकेऽस्मिन् भारतीयक्षय-शीलासंस्कृतेः पुनरुत्थानाय प्रशंसनीयः प्रयासः कृतः। भारतीयसंस्कृतेरुपासकः कश्चित् विद्यावान् कलाकुतुकी आगन्तुकः भ्रमणार्थं विद्यारामो नाम ग्राममागच्छति। तत्र स ग्रामस्थद्विजमेकं दृष्टवान्, यः ग्रामस्यैक एव अवशिष्टोऽक्षरज्ञ अस्ति। बाल्ये साहित्ये शास्त्रान्तरे च तेन भूयान् परिश्रमः कृतः। किन्तु अधुना स तालपत्रलिखितानां ग्रन्थानां महत्सञ्चयं प्रवहन्त्यां नद्यां प्रक्षिप्य नाशयितुमिच्छति। ग्रामस्थो द्विजः मन्यते यत् सम्प्रति एतेषां तालपत्रलिखितानां पुस्तकानां कापि आवश्यकता नास्तीति। एतच्छ्रुत्वा आगन्तुकः विस्मितः जातः। अथ तान् ग्रन्थान् स्वयं यथोचितद्रव्येन क्रीत्वा ग्रामस्थविप्रं पुनः साहित्यरचनाय प्रेरयति। किञ्चित्कालानन्तरम् आगन्तुकः रायबयकार-तोडरमल्लेति नाम्नः सङ्गीतविशारदस्य गृहं प्रविशति। किन्तु अत्र तेन सङ्गीतविशारदस्याङ्गुल्यः

तन्तीः मुक्त्वा गणनलेखयोः व्यापृता दृश्यन्ते। सङ्गीतविशारदस्य कुले पितृचरणपर्यन्तं सर्वे राजसभायाः महावैणिका आसन्। किन्तु अद्य राजानः नष्टाः। तदर्थं सङ्गीतविशारदः रायबयकार-तोडरमल्लः वीणां परित्यज्य ग्रामस्य करणकार्ये व्यापृतो वर्तते। आगन्तुकः भणति "आर्य ! येन केनापि गणककार्यं कर्तुं शक्यते। गीतं तु अतिदुर्लभं कस्यापि भाग्यादायाति।"[18] इति। अतः सा विद्या न त्यक्तुमुचिता। अपि च, गीतं विना देशस्य पुरुषस्य वा संस्कृतिः कीदृशी भविष्यतीति कथयित्वा सङ्गीतविशारदं स पुनः वीणां सङ्गीतविद्यां च ग्रहीतुमुपदिदेश।

ततः स एकं देवालयं प्रति प्रयातः। देवालयस्य प्राकारभित्तिषु काश्चन शासनलिपयः उत्कीर्णाः सन्ति। आगन्तुकः यदा तद् वाचयितुं प्रयतते तदा कमपि चौरं पश्यति। स जीर्णदेवालयेभ्यो बिम्बानि चोरयित्वा शिल्पसङ्ग्रहकारिभ्यः वैदेशिकेभ्यश्च विक्रीय जीवनयात्रां करोति। आगन्तुकः धावित्वा तं निगृह्य सन्मार्गे गन्तुमुपदेशं प्रददाति। ततः देवालयस्यास्य परिसरे तेन विवदमानमिव स्त्रीयुगलं दृश्यते। एतयोः एका वृद्धा अपरा च बालिकासीत्। बालिकेयं कुलक्रमागतां भरतनाट्यविद्यां शिक्षितुं वाञ्छति। किन्तु वृद्धा तां धनमर्जयितुं नगरस्य चलच्चित्रक्षेत्रे कार्यं कर्तुमादिशति। अतः नाट्यकलायाः रक्षणार्थम् आगन्तुकः बालिकायाः कृते नाट्याचार्यमेकं नियोजयति। अन्ते सर्वे मिलित्वा ग्रामस्थद्विजेन रचितं भारतीयसंस्कृतेः गौरवपूर्णं गीतमगायन्।

श्रीवेङ्कटरमणराघवन्-महोदयेन प्रेक्षणकमिदं चतुर्षु दृश्येषु विभज्यते। परन्तु अस्य दृश्यानि आकृत्या क्षुद्राणि सन्ति। अतः तस्य पठने दर्शने च दर्शकानामनासक्तिः न कथमपि भवेत्। पात्राणां संख्यात्र अधिका नास्ति। प्रत्येकं दृश्ये नूतनानि पात्राणि प्रविशन्ति। अस्य प्रधानपात्रम् आगन्तुकः उत्तमप्रकृतेः नायक एवास्ति। तस्य चरित्रं नाट्यकारेण सम्यग्रूपेण चित्रितम्। आगन्तुकस्य चरित्रे कवेः स्वव्यक्तित्वं प्रकाशितमिति वक्तुं शक्यते। यस्मिन् भारतीयसंस्कृतिविषये दृढः प्रत्ययोऽस्ति। अत्रापि सर्वाणि पात्राणि संस्कृतभाषामेव व्यवहरन्ति। अतः प्रेक्षणकस्य सर्वे नियमा अत्रापि कविना नानुसृता इत्यपि मन्तुमलम्।

'आकाशवाणी' इत्यत्र सम्प्रचारत्वात् तस्य सर्वाणि प्रेक्षणकानि एव 'रेडिओनाटकमि'ति संज्ञां प्राप्नुवन्ति। वस्तुतः 'रेडिओनाटकम्' इत्युक्ते यद्धि वेतारयन्त्रेण प्रचारितं प्रसारितं चेति। समाजस्य विविधाः सामाजिकादिसमस्या अत्र विषयत्वेन स्थानं लभन्ते। अनया दृष्ट्या 'पुनरुन्मेषः' इति प्रेक्षणकस्य विशिष्टं

स्थानं वर्तते। पाश्चात्यरीत्या प्रभावितेन डॉ. वेङ्कटरमणराघवन्-महोदयेनारब्धं सर्वप्रथमं गीर्वाणवाण्यां यात्रामूलकानाम् ओपेरानाटकानां प्रचलनम्। तस्य 'रासलीला', 'प्रेक्षणकत्रयी', 'कामशुद्धिः', 'विमुक्तिश्चे'त्यादिषु रूपकेषु तादृशः प्रयोगो दृश्यते।[19] रासलीला प्रेक्षणके गीतिधर्मिता संलक्ष्यते। एवं रूपकेषु नाट्यकर्तुः कारयितृ-प्रतिभायाः निदर्शनमुपलभ्यते।

डॉ. वेङ्कटरमणराघवन्-वर्येण 1958-तमे वर्षे मद्रासनगरे संस्कृतरङ्गस्य स्थापना कृता, यत्र तस्य कतिपयानि दृश्यकाव्यानि प्रदर्शितानि। किञ्च, कतिपयानि दृश्यकाव्यानि पुनः उज्जयिनीनगरे कालिदाससमारोहावसरे संस्कृतसम्मेलनसत्रेषु च समागतानां विदुषां प्रीत्यर्थं प्रदर्शितानि। तदर्थं श्रेष्ठप्रेक्षणकस्य स्रष्टृत्वेन विद्वद्भिः सुतरां प्रशंसितः सः। अपि च, तस्य सर्वाणि रूपकाणि देशस्य विविधेषु स्थानेषु अभिनीतानीति जनप्रियाण्यप्यभवन्। तेषां रूपकाणामुपजीव्यकथावस्तुत्वेन तावत्तेन रूपक—कृताचिताः खलु महतां कवीनां प्रथिताः कृतयः। रामायणमहाभारतपुराणादीनां विषया अपि नाट्यवस्तुत्वेनोपस्थापिताः नूतनाङ्गिकेन कविना। यद्यपि नाट्यकृता पाश्चात्यपद्धतिमनुससार तथापि स न विसस्मार संस्कृतस्य प्राचीनवैभवम्। नाट्यशास्त्रदृष्ट्या भरतवाक्य-नान्दी-प्रस्तावना-प्ररोचना-सन्धि-सन्ध्यङ्गादयः तस्य रूपकेषु प्रयुक्ताः, किन्तु सर्वत्र तेषां प्रयोग आवश्यक इति नाट्यकारो न मेने। रूपकेषु रोचकतामानेतुं समयानुसारमङ्केष्वकार्षीद् दृश्यविभाजनं सङ्गीतस्य संयोजनञ्च। परन्तु भाषानियमः स्थाने एव लङ्घितो दृश्यते नाट्यकर्तुः रूपकेषु, तद्रचितेषु रूपकेषु समेषामेव पात्राणां संस्कृतभाषायाः प्रयोगत्वात्। तथाहि विश्वनाथोक्ता भाषाप्रयोगनियमास्तेन स्वकरूपकेषु सर्वत्र न परिपालिता इति त्वनुसन्धेयम्। भाषाविषयकं मतं हि दर्पणकारस्य- **''पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम्। शौरसेनी प्रयोक्तव्या तादृशीनाञ्च योषिताम्''।।[20] इति।**

अपि तु, ओजःसमासबहुलभाषां परित्यज्य सरला सुबोध्या सुखपाठ्या च भाषा तेन प्रयुक्ता संलापेषु। नाट्यसाहित्यस्यापरमेकं वैशिष्ट्यं यदसंस्कृतज्ञा अपि संलापानायासेन बोद्धुं शक्नुयुरिति। तस्मादेवार्वाचीनसाहित्यसमालोचिकाया ऋचाचट्टोपाध्यायवर्याया मतं ह्यवश्यं सावधानमनुसन्धेयम् –"So far the style is concerned, we find the style is extraordinarily simple. It combines simplicity with a fine poetic quality"[21]. इति कृतं पल्लवितेनेति दिक्।

**संदर्भ :**

1. *शोधच्छात्र (पी-एच.डी.), संस्कृतविभागस्य, कोचविहार- पञ्चानन- वर्मा - विश्वविद्यालयस्य, पश्चिमबङ्गस्य।*
2. *सहायकाध्यापकः, संस्कृतविभागस्य, कोचविहार-पञ्चानन-वर्मा-विश्वविद्यालयस्य, पश्चिमबङ्गस्य।*
3. *सा. द., पृष्ठम् - 342*
4. *प्रे. त्र., विजयाङ्का, पृष्ठम् - 03*
5. *तत्रैव, पृष्ठम् - 07*
6. *तत्रैव, पृष्ठम् - 04*
7. *प्रे. त्र., विकटनितम्बा, पृष्ठम् - 11*
8. *तत्रैव, अवन्तिसुन्दरी, पृष्ठम् - 03*
9. *तत्रैव, अवन्तिसुन्दरी, पृष्ठम् - 07*
10. *तत्रैव, पृष्ठम् - 09*
11. *सा. द., पृष्ठम् - 342*
12. *S-R-A-* I I I - ]*p - 72*
13. *S -R -A -* I I I *- p*] *- 71*
14. *S–R–A–* I – ] *p– 09*
15. *S -R -A -* I I - P]& *57*
16. *S -R -A -* I I I - *P*] & *81*
17. *S -R -A -* I I I *- p*] *- 86*
18. *S -R -A -* I I *- p*] - & *6*
19. *भा - आ - वि - प -* ]*प - 22*
20. *सा. द., पृ. 301*
21. *भा. आ. वि. प., पृ. 286*

●●●

# 14

# अर्वाचीनसंस्कृतगीतिकाव्यानामुपादेयता

*सुकदेवः वाजपेयी*

स्वातन्त्र्योत्तरगीतिकाव्यकारैः गीतिकाव्यपरम्परा अद्यापि अक्षुण्णास्ति। विशेषतः मध्यप्रदेशात् केचन गीतिकाव्यप्रणेतारः सन्ति यैः स्वकाव्यप्रतिभया मध्यप्रदेशः गौरवान्वितः अपि च आधुनिकसंस्कृतसाहित्याय एका नवीना दिक्प्रदर्शिता। तेषां नामावलिस्तावत्-कविः श्रीनिवासरथः, बच्चूलालअवस्थी, डॉ. राधावल्लभत्रिपाठी, भास्कराचार्य-त्रिपाठी, पुष्पादीक्षिता, विन्ध्येश्वरीप्रसादमिश्रः, रेवाप्रसादद्विवेदी, इत्यादयः महत्त्वपूर्णाः हस्ताक्षराः।

तत्र यानि गीतिकाव्यानि एतैः कविवरैः प्रणीतानि तेषु वयं राष्ट्रियभावनाम्, पारिवारिकविसंगतीनाम् निदानपोयचिन्तनम्, मानवतारक्षणम्, नारीवेदना, समाजवादीचिन्तनम्, भारतीयपरम्पराम् इत्यादिकं स्पष्टम् अवलोकयामः। प्रथमतः राष्ट्रिभावनायाः प्रवलज्वारः गीतिकाव्येषु दरीदृश्यते। स्वतन्त्रायाः प्राक् संस्कृतगीतेषु स्वतन्त्रतासंग्रामस्य राष्ट्रियनवजागरणस्य स्वरः गुंजितः तथा च गांधी, तिलकः, आदि राष्ट्रियविभूतीनां गुणगानमभूत् परं स्वतन्त्रायाः पश्चात् रचितेषु गीतेषु देशभक्तिः, राष्ट्रियैकता, शौर्यम्, उद्बोधनादीनां सजीवचित्रणं विद्यते। गीतेष्वेतेषु विश्वशान्तेः सन्देशः, राष्ट्रोन्नत्यै, त्यागः, भारतभूमेश्च रक्षासंकल्पकामना भारतजनन्याश्च सरसं गुणगानं विधीयते। तथा च द्रष्टव्यम् -**अभयदायिनी भारतजननी भवतु भूतले सदा विजयिनी** * **।**

राष्ट्रियैकतायां किल गीतं पश्यन्तु निर्झरिण्याम् -

**गृहे विरोधं विदधति केचित्, प्रतिवेशे युध्यन्ते केचित्।**
**भिन्दन्तो गृहगतां संहिताम्, कथमिव कुर्यू राष्ट्रियैकताम्।**
**जातिभुजगभीषणफूत्कारः, प्रसरति याति मृदुव्यवहारः।**
**एष फणी विलसति बहुजिह्वः कुटिलं चलति लक्ष्यते जिह्वः।।**[*1]

अत्र कविरुपदिशति यत् अद्य जनाः गृहे कलहायमानाः दृश्यन्ते प्रतिवेशे च कहलायमानाः दृश्यन्ते तत्सर्वं विहाय राष्ट्रियैकतां कृते सर्वे प्रयत्नं कुर्युः तदर्थं व्यष्टितः समष्टिं यावत् प्रयत्नस्यावश्यकतास्ति। समाजचेतनादृष्ट्या एवं समकालिकतादृष्ट्या च गीतिकाव्येषु विषयाणां वैविध्यं वैशिष्ट्यं च विद्यते। तत्र समकालिकसमाजे व्याप्ता विषमता, विडम्बना, यंत्रणा, कुरीतयः, शोषणम्, आतंकवादः, नैतिकमूल्यानां विघटनम्, नेतृणां स्वार्थान्धता, युवजनानां नैराश्यभावः, वृद्धिंगता वैदेशिकसभ्यता, सांस्कृतिकी राजनैतिकी च चेतना, आधुनिकं जीवनम्, विश्वे विद्यमाना आणविकी शक्तिः, सम्भावितविनाशस्याशंकादिविषयाणां सरसं एवं भावपूर्णं वर्णनं विद्यते। यच्च देशे विश्वे च सामाजिक-राजनीतिक-सांस्कृतिकविधासु परिष्ठितीनां साक्ष्यं प्रस्तौति।

श्रीनिवासरथस्य तदेव गगने सैव धरा गीतिसंग्रहे एकत्र अनपेक्षितपरिवर्तनस्य आलोचनास्ति तर्हि अपरत्र समकालीनजीवनस्य स्थितीनां कोमलकान्तपदावलीमाध्यमेन मार्मिकतया निरूपणं विद्यते -

**जीवनगतिरनुदिनमपरा तदेव गगनं सैव धरा।**
**पापपुण्यविधुरा धरणीयं कर्मफलं भवतादरध्णीयम्।**
**नैतद्-वचोऽधुना रमणीयं तथापि सदसद्-विवेचनीयम्।**
**मतिरतिविकला सीदति विफला सकला परम्परा।।**[*2]

कविः बच्चूलालअवस्थीमहोदयः 'प्रतानिनी' काव्यसंग्रहस्यान्योक्तिप्रतानं प्रतीकात्मकखण्डकाव्यरूपे प्रस्तूय संस्कृतसाहित्यक्षेत्रे नवीना विधा प्रस्तुता। शैल्यामस्यां तैः समकालीनसमाजस्य राजनीतेश्च विसंगतौ विडम्बनायां च कटाक्षं कुर्वन् 'एकदन्तवृत्तम्', शुकवृत्तम्, 'दस्युशुनकीयम्', 'कागति' इत्यादिकाव्यानि लिखितानि। येषु कारुणिकं चित्रणं वर्तते। तद्यथा -

**वीतंसे यो निपतति सकृत् तस्य काप्यायतिः स्याद्**
**व्याधो नेत्रे क्रथतु निभृतं पंजरे वा दधातु।**
**सूत्रैराबध्य नयतु वा मुंचतूत्कृत्य पक्षी।**
**शूलाकर्तुं पुटयतु न वा पक्षिणो को विशेषः।।**[*3]

भास्कराचार्यस्य निर्झरिणी गीतमालिका अद्यतनपरिवारस्य समाजस्य सम्बन्धान् प्रकाशयति -

**एष पालितः शुकोऽपि पन्नगायते, देहली नगायते विपन्नतादिने।**
**विरौति मौकुलिः खलः, कलावहं शिखावलः।**
**पिकाः शुकाः समे पतन्तु भातु मेऽतुलो दलः।**
**सन्ततं जयन्तविद्ययाविकार्यते, बन्धुतानिकार्यते विपन्नतादिने।।**[*4]

अर्थात् यदा विपन्नतायाः दिवसाः आयान्ति तर्हि पालितः पोषितोऽपि शुकः सर्प इव आचरति गृहस्य देहला अपि दुर्गमायते। एवमेव परिवारेऽपि बान्धवत्वं गच्छत्येव विपन्नतादिने। तत्र विचार्य संगच्छध्वं संवदध्वं सं वो मानंसि जानताम् इति मनसि निधाय आचरणीयमिति कवेर्भावः। नवीनयुगस्य राष्ट्रिय-अन्ताराष्ट्रियमहत्त्वस्य घटनां विषयीकृत्य लिखितानि काव्यगीतानि कवेः समकालीनविश्वं प्रति जागरूकतां अभिव्यक्तिसामर्थ्यं च सूचयति। अतः श्रीनिवासरथः रेवाप्रसाद-द्विवेदी आदिकवयःसमसामयिकघटनां नूतनकविसंवेदनाभिः सह प्रस्तुवन्ति। श्रीनिवासरथस्य कविता 'शान्तिवाचनम्' परमाणुयुद्धात् मानवतारक्षणस्य आकुलम् आह्वानमस्ति -

**मा कुरु भीति विकम्पितमनसा मलिनं नानम्।**
**भुवि दानवता यथा प्रकाशं कलयति मानवताकुलनाशम्।**
**विश्वजनीनसुखाय कल्पिता वैज्ञानिकता भवति दूषिता।**
**अपि परमाणौ यदुदासीनम्, जातं सपदि दानवाधीनम्।।**[*5]

संस्कृतस्य अनेकासु समकालीनकवितासु पौराणिकपात्राणि आधुनिकसन्दर्भे प्रस्तूयन्ते। यच्च नवाचारमेव स्यात्। राजनीतिकहिंसाविषये चिन्तयन् कविः भूतपूर्वं प्रधानमन्त्रि-इन्दिरागांधिमहोदयायाः नृशंसहत्यानन्तरं देशस्य विखण्डितमनःस्थितिं मार्मिकरूपेण प्रकटयति। देशाय शिवप्रतीकं नेतृणां च कृते पार्वतीप्रतीकं कृत्वा।

कवयित्री पुष्पादीक्षितरचितां 'अग्निशिखा' गीतसंग्रहे नारीहृदयस्य मर्मान्तकवेदनां तथा प्रेम्णः अनिर्वचनीयतन्मयतां सुकुमारभावेन, रसात्मकतया, लयात्मकतया च अभिव्यक्तिः अस्ति। या च गीतिकाव्यस्य महत्त्वपूर्णा विशेषास्ति -

**इयमग्निशिखा ज्वलिता, सहसैव कथं हृद्ये।**
**निशितैस्तव दृष्टिशिरैः सकलं शकलीक्रियते।**
**रमणीयगुणैर्ग्रथिते रमणे रभसाऽभिरते।**
**अवधीर्य समीरणरयमिदमद्य मनो व्यथते।।**[*6]

कविः राधावल्लाभत्रिपाठिवर्यः लहरीदशकम् इति काव्ये जनतालहर्यां

रोटिकालहर्यां च सामाजिकवैषम्यतायाः निरूपणं कृत्वा श्रमजीविनां महत्त्वं उपस्थापयति। अपि च काव्येऽस्मिन् कविः राष्ट्रियभावनां मानसे हृदि वा जागरणाय राजनेतृणां च साम्प्रतिकां दशां स्थितिं च वर्णयित्वा अथवा तेषां कृत्येन देशस्य पतनावस्थितिविषयकान् अनेकान् श्लोकान् लिखन्ति येषु कवेः जनतां प्रति राष्ट्रं प्रति मार्मिकसंवेदना सर्वथा दरीदृश्यते।

**आत्मानं तु निषेवते स जनतासेवाव्रतं धारय**
**न्नुच्चैः प्राप्य पदं च पश्यति जनं न्यक्कारगर्भं भृशम्।**
**शुभ्रः खद्दरवस्त्रमण्डिततनुस्तृष्णां तु नो मुंचति**
**काषायं न जहाति चेतसि धृतं काषायकन्थो यथा।।**[*7]

अर्थात् जनतायाः सेवाव्रतं प्रतिज्ञाय ते नेतारः केवलं मृषैव वदन्ति ते तु केवलं स्वार्थं साधयन्ति। अन्योऽयं क्षपयन्ति, राष्ट्रं जनं च निघ्नन्ति नैतावदेव सुन्दोपसुन्दन्यायेन परम्परमपि घ्नन्ति। को जानीते हृदयं को वैतस्याः कथां व्यथां वा श्रृणोति जनता करुणं विरौति। देशः भौतिकदृष्ट्या तु वर्द्धते परं नैर्धन्यं, वैषम्यं न तथा प्रयाति देशात्। अवस्थानेषु हट्टेषु पिपासापीडिता अन्नजलाभावात् भ्रामं भ्रामं दिवंगच्छन्ति जनाः। तत्र राजनेतारः ध्यानमाकर्षति कविः। सः कथयति निदाघलर्याम् -

**गोमाता म्रियते लोका बुसं देयं तृणादिकम्।।**
**म्रियन्तेऽत्र नराः क्षुद्भ्यः इति किं नैव पश्यति।।**
**संस्कारै रहिता प्रशासन मत्तास्तु ये पूरुषाः**
**आनर्थ्यमिमे सदा विदधते शब्दा यथाऽसंस्कृताः।**
**आशेव प्रहताऽपवादकलुषा कीर्तिः कृशा श्रीर्यथा**
**राष्ट्रे स्वे जनताऽवमानविधृताऽधीतिर्यथा सीदति।।**[*8]

इत्यादिषु स्थलेषु चिन्तातुरः कविः मनुष्येषु राष्ट्रियत्वं जागरयति। मनुष्यस्यायं धर्मः यत्सः आत्मनः प्रतिकूलानि परेषां मनुष्येतरप्राणिनामपि न समाचरेदिति भावनां हृदि निधाय व्यवहरेत्। 'वियोगी होगा पहला कवि आह से निकला होगा गान' इत्युक्तिं सार्थयन् कविः त्रिपाठिवर्यः मानवीयसंवेदनायाः अद्भुतः कविः अस्माकं मानसपटले आयाति। अत्रैव वयं स्मरामो कविशिवशरण-शर्माणम्, येन 'जागरणम्' इति गीतिसंग्रहः लिखितः यस्मिन्नपि नाम्नैव स्पष्टम्, मानवताजागरणाय प्रेरयति कविः - **लोके यो व्यथितानां प्रेमी**

**धन्यं प्रेम तदीयम्, मानव! दिव्यं प्रेम तदीयम्।**

**संसारः सुखिनं कामयते, विपद्गतं दूरत उपेक्षते।**
**संजातः प्रणयो व्यापारो, विडम्बना महीयताम्।।**[*9]

अर्थात् हे मानव! तव भारतीयपरम्परा सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः, सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् इतिरूपेण विद्यते तथैव त्वया सर्वदा वर्तितव्यम् सा परम्परा अक्षुण्णा भवेदिति कामयितव्यम् च। एवं च अर्वाचीनगीतिकाव्येषु भावबोध्यगम्यत्वं यदि वयं जानीमस्तर्हि ज्ञास्यामः यत् तानि काव्यानि वर्तमानकाले निश्चयेन उपयोगीनि सन्ति, प्रेरणादायकानि च सन्ति।

गीतिकाव्यं स्यात् महाकाव्यं च अथवा कथासाहित्यम्, यदि तल्लोकाय उपयोगि न विद्यते, वर्तमानपरिष्ठितीषु प्रासंगिकं नास्ति तर्हि तत् कवेः कर्म साफल्यं नैव अवाप्स्यति, अतः प्राचीनकालस्य महान्तः लेखकाः यदपि लिखितवन्तः तत्तु वर्तमासमये निश्चितमेव प्रासंगिकम्, अनेनैव कविकर्म श्रेष्ठत्वमायाति यतोहि यदा इह लोकः सफलस्तदैव परलोकस्यापि साफल्यम्। अतः कवि केवलं स्थितिं परिष्ठितिं दृष्ट्वा स्वकीयान् विचारान् न ग्रथ्नाति अपितु आगामिनि समये सम्भाव्यमानां स्थितिं मस्तिष्के परिकल्प्य सः भविष्यस्य वार्ता लिखितुं प्रयतते। एता एव च कृतयः तं कविं जीवन्तयति स च कविः अधुनातनविद्वद्भिः, सुधिजनैः पठ्यते हृदयांकितश्च क्रियते।

**सन्दर्भः -**


1. *तदेव गगनं सैव धरा, पृ. 9 (1994)*
2. *निर्झरिणी, पृ. 107*
3. *तदेव गगनं सैव धरा,*
4. *प्रतानिनी, पृ. 249*
5. *निर्झरिणी पृ. 61*
6. *तदेव गगनं सैव धरा, पृ. 67*
7. *अग्निशिखा, पृ. 3*
8. *जनतालहरी*
9. *जनतालहरी*
10. *जागरणम्, पृ. 53*


●●●

# 15

# आचार्यराधावल्लभकृत-लहरीदशके 'मनुर्भव' इत्युपदेशः

*किरण आर्या*

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः।।**[1]

एतदनु आचार्यराधावल्लभीयरचनासु मानवीयसंवेदना एव तदीयभावपक्षस्य प्रमुखं वैशिष्ट्यम। तदनया दृष्ट्या लहरीदशकमिति काव्यसंग्रहः अप्रतिमोऽभिनवश्च। तदत्र पुनः दरिद्रान्, शोषितान्, दलितान् च जनान् प्रति, राष्ट्रं च प्रति यः संवेदनायाः करुणायाश्च सरसप्रभावः सः कविवरं त्रिपाठिनं सर्वथा मानवीयधरातले शिखरयति। यतोहि सुकविः स्यात् कस्याश्चिदपि भाषायाः, कस्यचिच्च देशकालवर्षस्य किन्तु अभिष्ठानन्तु तस्य समाजे एव भवति। समाजे विधीयमानं यदपि कृत्यं अकृत्यं च सः पश्यति तदा सः तत्कालस्य परिष्ठितिं लेखनततौ निबद्ध्य मानवान् उपदिशति तस्यां दिशि विचारणाय, तथानुकूलं व्यवहरणाय च। यदि कश्चित्साहित्यिकः, जनतोद्‌बोधनाय किमपि न प्रयतते, उत जनताजनार्दनं नैवाभिजानाति तस्य यत्किमपि तत्सर्वं व्यर्थमेव। तत्तथा वक्ति जनतालहरी-

**शास्त्रास्याध्ययनं वृथाधिकतरं धर्मस्य चर्चा वृथा।**
**वैकल्यन्तु गता कथापि सकला पौराणिकी शाश्वती।**
**नो ध्याता जनता जनस्य हृदये नारायणः संस्थितो।**
**नो ज्ञाता यदि नो कृतोस्ति जनतोद्‌बोधनाय यत्नो वृथा।।**[2]

तत्तावदत्र आचार्य-त्रिपाठिवर्येणापि लहरीदशकाभिधेये स्वीये ग्रन्थे समाजे व्याप्तं दुराचरणं, भ्रष्टताम्, क्रूरताम्, अधर्मस्य वृद्धिंगतां परच्छायां

निदर्शनस्य कारुणिकः मर्मच्छेदी प्रयासः विहितस्तथा तन्निराकरणाय निदर्शनव्याजेन समुपदिष्टश्चापि यन्नेज्जिह्मायन्तो नरकं पतेत अतः सावधानं भवत इति मनुष्यं प्रति शिवभावनया यन्नेज्जिह्मायन्तो नरकं पतेत अतः सावधानं भवत इति मनुष्यं प्रति शिवभावनया कविः वेदस्य-मनुर्भव जनया दैव्यं जनम् उपदेशस्यास्य भावं स्वस्मिन् काव्यसंग्रहे पदे पदे निर्दिशति। मननान्मनुष्यः यास्कस्य व्युत्पत्या मननं चिन्तनं मानवस्य धर्मः अपि च मननपूर्वकं कर्तव्याकर्तव्यज्ञानपूर्वकं कर्मणि प्रवर्तनं मनुष्यस्य लक्षणम्। तत्र आत्मनः प्रतिकूलानि परेषां न समाचरेदिति मनुष्यत्वम्। अनेनैव भावेन कविः मनुष्यस्य कृते व्यष्टितः समष्टिं यावच्चिन्तयति। न केवलं आत्मोन्नतिः कर्तव्या, न केवलं स्वस्य सुखदुःखविषये शोचनीय अपितु वसुधैव कुटुम्बकमिति हृदि निधाय संसारे संसर्तव्यम्। यतोहि कविः कथयति-

**नो दानैर्न तपोभिरप्यतितरां नो चेज्यया विद्यया,**
**नो काषायपटैरखण्डविभवैः स्यात् संस्कृतो मानवः।**
**हित्वा स्वार्थपराणैकधिषणां धत्वा च सेवाव्रतम्,**
**लोकाराधननिष्ठयैव पुरुषः संस्कार्यते धार्यते।।**[3]

अतः लोकाराधनेन, स्वार्थं सर्वथा परित्यज्य परार्थघटकत्वेन गतिमान् मानवः एव संस्कृतः मानव उच्यते। ईश्वराधनात् लोकाराधनं वरमिति कवेरभिप्रायः यतोहि अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते। लोकाराधनमपि तदैव सम्भवम् यदा मानवस्य मानसः कारुणिको भवेत्, जीवपीडया व्यथियो भवेत्, तथा च जनतालहरी-

**वेदान्तेषु यमाहुरेकपुरुषं तत्प्राप्तिलाभेन किम्,**
**ब्रह्मानन्दरसेऽपि किं ह्यधिगते संसारविच्छेदजे।**
**वैषम्याहितभीतिसंकुलमिदं चालोक्य लोकं मनो,**
**नो कारुण्यसमाकुलं यदि न वा जातं व्यथान्दोलितम्।।**[4]

अनने अनुमातुं शक्नुमः यत्कवि परमकारुणिकः जगद्व्यथया व्यथितश्चास्ति तदैव शोकः श्लोकत्वमागतः लहरीकाव्ये इत्युक्तं पुरा। एतद्दृष्ट्या गोमातरं प्रति कवेश्चिन्ता द्रष्टव्या-

**गोमाता म्रियते लोका बुसं देयं तृणादिकम्।**
**इत्याह्वयति धर्मात्मा नेता चैवानुभाववान्।।**[5]

अथार्त् धरित्री माता गोमाता जनिनी माता तिस्रोऽस्माभिः पूजनीया आदरणीयाः, यथायोग्यं व्यवहरणीयाश्च। तत्र अद्यतने समाजे बुभुक्षितारः गोमातरः मरन्ति। स्वार्थिनैर्जनैः परित्यक्ताः पीतोदका दुग्धदोहाः जग्धतृणाः, निरिन्द्रियाश्च ये गावो इतस्ततः परिभ्रमन्ति बुभुक्षया कर्गद-अवस्करादिभक्षणं कुर्वन्ति तासां पीडामनुभवन् कविः कथयति यत् तासां बुभुक्षां निवारणेयेति मनुष्यत्वम्। पंचयज्ञकर्मसु बलिवैश्वदेवयज्ञस्यायमेवाशयः यत्सद्गृहस्थस्येदं प्रथमं कर्तव्यं यत् पाचनकर्मणि प्रथमो ग्रासः मनुष्येतरजीवेभ्यः प्रदेय इति मानवधर्मः। नैतावदेव-

**तृणानां प्रेषयन् राशीर्गौभ्यो यानेन सत्वरम्।**

**म्रियन्तेऽत्र नराः क्षुद्भ्यः इति किं नैव पश्यति?[6] निदाघलहरी**

**जना अन्नजलाभावाद् भ्रामं भ्रामं दिवंगताः।**

**इरणे क्षीणा भ्रम्यतः पशवो यथा।।[7] (निदाघ.)**

यदि च स्वार्थाय दुग्धप्राप्त्यर्थं गोभ्यः तृणादिकं दीयते परं तत्रैव ये निर्धनाः, क्षुद्भ्यः पीडिताः आत्महनः नराः सन्ति, अद्यापि निर्धनगृहे शिशवस्तथाऽऽर्त्ता अन्नस्य नैव कणिकां ते लभन्ते (अद्यापिलहरी) तेषां कृतेऽपि अस्माकं ध्यानं भवितव्यम् तेषां क्षुन्निवृत्त्या मनुष्यस्य पुण्यवृद्धिः क्षुधितस्य च दुःखनिवृत्तिरिति द्विगताः हेतवो भवन्ति।

अद्यत्वे पर्यावरणसमस्या गभीरा विद्यते तेन प्रभावितमस्माकं जीवनं ह्रासत्वमेति अकस्माच्च मृत्युमुखे गच्छच्च दरीदृश्यते तस्य कारणं न केवलं प्राकृतिकं पर्यावरणं कारणमपितु शारीरिकमानसिक-आध्यात्मिकपर्यावरणमपि तत्र निमित्तम्, यथा भक्ष्यते अन्नं तथैव भवति मनः, तथैव च तनुरिति उक्त्या स्पष्टं विद्यते यत् अन्नशुद्धिस्तावद् भवितव्या तदर्थं - यज्ञाद् भवति पर्जन्यः पर्जन्यादन्नसंभवः इति गीतावचः। यज्ञस्यार्थः देवपूजा प्रकृतिपूजा विद्यते। पूजेति यथायोग्यव्यवहारः। तत्तावत् प्रकृतिपूजायास्तात्पर्यं पर्यावरणसंरक्षणमेव भवति तदर्थं पादपादिरोपणं अपि च जलसंरक्षणं महदावश्यकं विद्यते यतोहि छिद्यमानवना नित्यं लुप्यमानतनुः धरित्री अतोऽत्र कविर्दृष्टिर्द्रष्टव्या-

**यथा तथैव सायासं रक्ष्यते गृहवाटिका।**

**गृहिण्यालाबूकूष्माण्ड्यौ फलिष्यत इतीप्सया।।**

**कुत्र कस्मिन् प्रदेयं स्याज्जलं स्वल्पं तु पादपे।**

**रक्षणीयं गृहे वा स्यात् स्नानाय क्षालनाय वा।**

**इति चिन्तातुरा म्लाना गृहिणी वाटिकास्थिता।**

**अवस्थानेषु हट्टेषु पिपासापीडिता नराः।**

**बम्भ्रमन्ति जलं पातुमन्विष्यतः प्रणालकम्।।**

**सेचनं कुरुते प्रातर्जलैश्चुलुकमात्रकैः।।**[8]

सर्वे चिन्तामग्नाः सन्ति यज्जलस्याल्पत्वेन कथं जीवननिर्वाहः स्यात् गृहिणी जलं परिवारस्य गृते संरक्षेदथवा पक्षिणे पशवे वृक्षाय वा दद्यादिति विकटा समस्या। पश्यामो वयं कतिपयेषु स्थलेषु जलाभावेन आकुलाः जनाः जलमन्विष्यन्तो भ्रमन्ति। अतः जलसंरक्षण कर्तव्यं व्यर्थमेव जलस्य व्ययः न विधातव्यः येन स्थितिरेषा भवेत् अत्र चिन्तनं मनुष्यत्वलक्षणम्।

जनतालहर्यां कविः वर्तमानं राष्ट्रं प्रति चिन्त्यमानः अस्ति यत् सः देशः केन प्रकारेणोन्नतिं प्राप्नुयाद्यत्र हतधिया जनता हता विदलिता, कष्टां प्रापितास्ति, अशुभैर्नृपशुभिः कौटिल्यनीत्या या आमूलं छलितास्ति, वसुधा आतंकितास्ति वसु धारयद्भिः खलैः कलहप्रसक्तैः, वैदेशिकीं कुटिलनीतिं श्रयद्भिः, राष्टं च लोलुपधिया बिभजद्भिः नेतृभिः, तस्मिन् देशे जनता करुणं विरौति, गच्छति पुरतो देशः पुनरिह पश्चात् प्रधृष्यते जनता। कोयं समाजवादः प्रगतिर्वा कीदृशी सेयम्।। स्वार्थी नेता यः न कालस्यैष गतिं वेत्ति न च सुसकृतां रीतिम्, सः केवलं आत्मोन्नतिमेव वेत्ति जनतायां तस्य ध्यानमेव नायाति, एतन्नास्ति मानवता-

**आत्मानं तु निषेवते स जनतासेवाव्रतं धारयन्,**

**नुच्चैः प्राप्य पदं च पश्यति जनं न्यक्कारगर्भं भृशम।**

**शुभ्रः खद्दश्वस्त्रमण्डिततनुस्तृष्णां तु नो मुंचति,**

**काषायं न जहाति चेतसि धृतं काषायकन्थो यथा।।**[9] **जनतालहरी**

अद्यापि पुराणः धर्मपथः संकुचति, सन्तास्तथैव कलहायमानाः सन्ति, पाखण्डदाम्भिकजनाः वृद्धिं यान्ति, एतदेव कारणं देवा अपि देवगृहतः प्रयाता एव, तेन किल भारतमातुश्चेतः चेखिद्यते, तदत्रास्माभिः मनुष्यसंज्ञकैर्जनैः ध्यानं दातव्यं मननं चिन्तनं कर्तव्यमिति कवेराशयः। कविरभिदधाति यद्यदि यस्मिन् मनुष्यत्वं नास्ति सः न कदापि केनापि, हेतुना च वन्द्यः-

**न गौरवान्मृषाऽऽदराद् दरान्न चैव सम्भ्रमात्।**

**न लाभकाम्यया तथा न चाटुकारितेच्छया।।**

**सदावलिप्तदुर्जनं पदप्रतिष्ठितं मया।**

**प्रधाव्यपादधूलिभिः प्रणम्य लाञ्छितं शिरः।।**[10]

एतान् अमनुष्यान् प्रणम्य स्वस्य शिरः कथं लांछनीयम्। यदि आत्मादरं वांछति कश्चन नरः तर्हि सः पदे प्रतिष्ठितस्स्यान्नवा, धनान्वितः स्यान्नवा, परं मनुष्यस्तु अवश्यमेव भवेत्। अथवा यः मनुष्यः अस्ति स एव पूज्यः, सत्कार्यः, उच्चपदमलंकार्य इति कवेर्भावः। अतः इह खलु असरणे जातस्य प्रत्येकनरस्य कर्तव्यं अस्ति यत्सः मनुर्भव इति वेदोपदेशं सम्मानयेत, अनुपालयेच्च। मनुष्यपदेन सर्वपदमाप्नोति नरः, इहलोकात् परलोकयात्रां यावत्सुखेन याति नरः। तदतिरिक्तिं न किंचन शिष्यते रिक्तो यथायं जनः आगतोऽत्र रिक्तेन गन्तव्यमितश्च तेन-

**न शिष्यतेऽत्र कामना न वासना न भावना,**
**न केलिकौतुकान्विता न मानिनीषु राधना।**
**न शिष्यते कथा वृथा मदस्मरस्मयान्तिता,**
**इयं परन्तु शिष्यते विशिष्यते मनुष्यता।।**[11]

**निष्कर्षः-** गुहयं ब्रह्म तदिदं ब्रवीमि नहि मानुषात श्रेष्ठतरं हि किंचित इति महाभारतवचनानुसारेण मानुषजन्म अमूल्यं श्रेष्ठतमं च विद्यते। अतः मनुष्यस्य कर्तव्योऽस्ति सः मनुष्यः भवेत्। मननचिन्तनपूर्वकं स्वकीयं जीवनं कुर्यात् आधुनिककविवरैः उच्यते- 'मनुष्य हो तो मनुष्य के लिये जियो' एष एव भावः संस्कृतकविवराणामपि विद्यते तेषु आचार्यराधावल्लभकृत-लहरीदशके वयं मनुष्यत्वधारणाय नैकान् सदुपदेशान् पश्यामः। यान् अनुपाल्य मानवः निजजीवनं श्रेष्ठयितुं शक्यते। तत्र प्रसंगे अर्वाचीनमिदं लहरीदशककाव्यं मनुर्भव इति वेदवाक्यं सरलव्याख्यया व्याख्याति। अतः वर्तमाने काले तस्योपादेयत्वं निश्चयेन वरीवर्ति।

**सन्दर्भः -**


1. *वा. रा.*
2. *जनतालहरी*
3. *जनतालहरी*
4. *जनतालहरी*
5. *निदाघलहरी*
6. *निदाघलहरी*
7. *निदाघलहरी*
8. *निदाघलहरी*
9. *जनतालहरी*
10. *मृत्तिकालहरी*
11. *मृत्तिकालहरी*


●●●

# 16

# शिवराजविजयस्य प्रथमनिःश्वासे सांस्कृतिक-तत्त्वानि

*माधवगोपालः*

काचनापि भाषा स्वसमाजस्य संस्कृतिं ज्ञातुं वातायनमिव भवति। यथा वातायनेन बाह्यजगत् सरलतया सौविध्येन च प्रकोष्ठे स्थित्वैव द्रष्टुं शक्यते तथैव कस्यचन समाजस्य भाषा द्वारा तत्समाजस्य संस्कृतिमपि प्रामाणिकतयावगन्तुं पार्यते। मानवो यत्करोति, यल्लिखति, यच्च चिन्तयति तस्य प्रतिबिम्बनं तस्य भाषायामवश्यमेव भवति। भाषाया अध्ययनेन संस्कृतेरध्ययनमपि सहजतया भवति, यदि अध्येता भाषाध्ययनं पूर्णावधानेन करोति। भारतीयसंस्कृतेर्मूलं संस्कृतग्रन्थेष्ववस्थितमस्ति। संस्कृतग्रन्थाध्ययनं विना संस्कृतसंस्कृतिं बोधितुं न शक्यते। श्रीमदम्बिकादत्तव्यासेन विरचिते ''शिवराजविजयः'' इत्याख्ये ग्रन्थेऽपि भारतीयसंस्कृतेः महत्त्वपूर्णानि तत्त्वानि निबद्धानि येषामध्ययनमस्ति शोधपत्रस्यास्य विषयः।

संस्कृतिस्तु मानवसमुदायविशेषस्य जीवनरीतिः। अस्मिन् विशालसंसारे नैके मानवसमुदायाः स्वभावतश्च सन्ति बह्व्यो जीवनरीतयः। जनानां जीवनयापनस्य रीतिरेव संस्कृतिः कथ्यते विद्वद्वरैः (मिश्र एवं त्रिपाठी, 2011, पृ.1)। आंग्लभाषायाः सुप्रथितः केम्ब्रिज इति शब्दकोशः संस्कृतेर्लक्षणमेवं प्रस्तौति–''संस्कृतिरेका जीवनशैली, विशेषतो जनानां समुदायविशेषस्य कालविशेषे सामान्याः प्रथाः, विश्वासाश्च'' ।("the way of life, especially the general customs and beliefs, of a particular group of people at a particular time-")। रामधारीसिंहदिनकरमहोदयस्यानुसारं संस्कृतेर्निर्माणं दिवसाभ्यन्तरे अथवा दिनद्वये न भवति, युगयुगान्तरेष्वेव भवति (यथोद्धृतं टण्डन, 2012 इत्यस्मिन्)। डॉ. सम्पूर्णानन्दस्य मतौ मानवस्य प्रत्येकं विचारः कृतिर्वा

संस्कृतिर्नास्ति, संस्कृतिस्तु सा आधारशिला यस्या आश्रये जातिदेशसमाजत्रिकस्य विशालभव्यप्रासादो निर्मीयते (यथोद्धृतं टण्डन, 2012 इत्यस्मिन्)।

**सांस्कृतिकतत्त्वानि**

शिवराजविजयस्य विवेच्यग्रन्थांशे कथाप्रसङ्गेषु यानि सांस्कृतिकप्रतिबिम्बानि दृश्यन्ते तानि आधारीकृत्य भारतीयसंस्कृतेः तत्त्वानां निरूपणं क्रियते। सांस्कृतिकतत्त्वानां बहुत्वात् प्रत्येकं विषयः सोद्धरणं पृथक्तया प्रस्तूयते।

**मांगलिकता**

भारतीयसंस्कृतौ मांगलिकताया महत्त्वं सर्वविदितमेव। प्रायः प्रत्येकं ग्रन्थस्य आदौ मङ्गलमेव विधीयते ग्रन्थकारैः। राष्ट्रियसङ्गोष्ठीष्वपि शोधपत्रवाचका आदौ मङ्गलमेव प्रस्तुवन्ति। वैवाहिकपत्रेष्वपि मङ्गलविधायकं पद्यमादौ विलिख्यते मङ्गलकामिभिः। व्यासमहाशयेनापि सा परम्परा श्रद्धया निर्व्यूढा परिपालिता च निश्चप्रचयेन। ग्रन्थस्य प्रारम्भे ग्रन्थकृत् भागवतपुराणात् माङ्गलिके उद्धरणे प्रस्तुवन् भगवतः सवितुः वर्णनं विदधाति, कौशलेन च मुख्यकथया सह तद्वर्णनं योजयति। इत्थं च वृद्धकुमारीवाक्यन्यायेन लेखकस्य उभयप्रयोजने सिद्धे भवतः - ''अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः।... प्रणम्य एष विश्वेषामिति''। न्यायादिशास्त्रेषु मङ्गलाचरणस्य दार्शनिकव्याख्या समुपलभ्यते। अत्र तु मुख्यप्रयोजनं ग्रन्थस्य निर्विघ्नतया समाप्तिरेव प्रतिभाति। अद्यापि सर्वत्र समाजे कामावाप्तिरूपं मङ्गलमेव इष्यते। अतः मङ्गलस्योपादेयत्वं स्वयमेव लोके सिद्धम्।

**गुरुभक्तिः**

भारतीयसंस्कृतौ गुरुः देववत् स्वीक्रियते, गुरोरनन्तरमेव मातुः पितुश्च स्थानं महनीयताक्रमे समायाति (अनुरिषा, 2019)। किं बहुना ''गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः। गुरुः साक्षात्परब्रह्म तस्मै श्रीगुरवे नमः।।'' इति श्लोकस्तु सुप्रसिद्धमेव लोके। ईदृशी एव भक्तिः दृश्यते अस्मिन् ग्रन्थे यत्र गौरबटुः श्यामबटुश्च स्वगुरुं सबहुमानं सेवेते। ''कश्चित् गुरुसेवनपटुविप्रबटुः''।, ''सन्ध्योपासनसमयोऽस्मद्गुरुचरणानाम्''...। ''गुरुचरणा अत्र तडागतटे सन्ध्यामुपासते, संस्थापिता मया निखिला सामग्री तेषां समीपे'' इति कथनानि सुतरां

गुरुभक्तिं प्रमाणयन्ति शिष्याणाम्। प्रसङ्गे गुरोः अनुपस्थितावपि शिष्यैः तं प्रति ''गुरुचरणाः'' इति सम्बोधनं तेषां भक्तिभावम् आविष्करोति। परिवर्तिते समकालीनसमाजे यः कोऽपि अस्मान् शिक्षयति तं प्रति श्रद्धाधारणेन अद्यापि अनेन गुणेन लाभः निश्चप्रचं भवति। शिक्षकं प्रति आदरभावः नूनमेव छात्रस्य हितं साधयति शिक्षकस्य प्रयासं विनाऽपि। आध्यात्मिकसाधनापथि तु गुरोः कृपा अद्भुतं चमत्कारं करोति यस्याः समासादनं गुरुभक्त्या एव क्रियते।

**परोपकारभावना**

भारतीयसंस्कृतौ परोपकारस्य महत्त्वं सुविदितमेव। ''भवन्ति नम्रास्तरवः फलोद्गमैर्नवाम्बुभिर्दूरविलम्बिनो घनाः। अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्।। इत्यादयः सूक्तयः तदेव बिन्दुं सुदृढयन्ति। ऋग्वेदेऽपि योग्यधनप्राप्तौ अभिमानं न कर्तुं तथा च निर्धनेभ्यः अन्नं जलं च प्रदातुं निर्दिष्टमस्ति ''सुयमात् रायः मा अव स्थाम्''[1] ''क्षुध्यद्भयो वय आसुतिं दाः''[2] शिवराजविजयस्य आदिमनिश्वासे वयं पश्यामः यत् यदा सन्ध्यावसाने आश्रमवासिभिः चीत्कारध्वनिः श्रुतः तदा झटिति एव तैः विपद्ग्रस्तजनस्य सहाय्यार्थं गुर्वादेशात् वनं प्रति गतं भयभीता कन्यकैका च आश्रमे समानीता। तस्याः रक्षा च समाचरिता। ''पुत्रि! त्वां मातुः समीपे प्रापयिष्यामः, भगवति! भुङ्क्ष्व किञ्चित्, पिब पयः''। परोपकारस्तु सार्वजनीनो गुणः। यस्मिन् समाजे परोपकारिणः जनाः न भवन्ति स तु दयनीय एव। तस्योत्थानं कठिनमेव स्यात्।

**सन्ध्यावन्दनम्**

भारतीयपारम्परिकजीवनरीतौ सन्ध्योपासनस्य बहुमहत्त्वं विद्यते। सन्ध्योपासनं प्रायः द्विवारं विधीयते भारतीयजनैः, प्रथमं यदा रजनी अवसिता भवति दिवसस्य च प्रारम्भं भवति तथा द्वितीयं यदा सम्पूर्णं दिनं व्यतीतं रात्रिश्च समागच्छति तदा दिनरात्र्योः सन्धिवेलायां सन्ध्योपासनकर्म अनुष्ठीयते भारतीयसंस्कृतिप्रेमिभिः। सन्ध्योपासनस्य समुल्लेखः ग्रन्थेऽस्मिन् अनेकशः दृश्यते। ''सन्ध्योपासनसमयोऽस्मद्गुरुचरणानाम्...। गुरुचरणा अत्र तडागतटे सन्ध्यामुपासते, संस्थापिता मया निखिला सामग्री तेषां समीपे।......अथ समापितसन्ध्यावन्दनादिक्रिये समायाते गुरौ''....। सन्ध्यावन्दनेन जनस्य सामान्यदिनचर्या सुकरतया प्रवर्तते। अतः अस्य अनुष्ठानमद्यापि प्रासङ्गिकमेव।

**ब्रह्मज्ञान् प्रति समादरभावः**

भारतभूमिः प्राचीनकालादेव ब्रह्मज्ञान् प्रति बद्धश्रद्धा दृश्यते। विश्वस्य अन्यदेशैः आत्मज्ञान् प्रति तादृशी श्रद्धा नैव आचरिता इति वक्तुं शक्यते यतो हि विदेशेषु बहुत्र तेभ्यो मृत्युदण्डं प्रदत्तमस्ति। भारतदेशे तु सामान्यजनाः अपि नैसर्गिकतया आत्मज्ञान् प्रति आदरभावभरिताः भवन्ति। यदा योगिराजः पर्वतशिखरात् आश्रमं समागतः तदा घटनामिमां कर्णपरम्परया श्रुत्वा बहवो जनाः तत्र तस्य ब्रह्मज्ञानिमहात्मनः दर्शनार्थं समायान्ति। अन्यच्च, समाधिदशायामपि ते एव जनाः तं योगिनं स्वकीयं सत्कारमर्पयन्ति स्म। ''ग्रामणी-ग्रामीण-ग्रामाः समागत्य मध्ये मध्ये तं पूजयन्ति प्रणमन्ति स्तुवन्ति च'',... ''तस्मिन् पूज्यमाने ''योगिराडुत्थित'' इति ''आयात'' इति च आकर्ण्य कर्णपरम्परया बहवो जनाः परितः स्थिताः''.. इत्यनेन सुतरां सिद्ध्यति। इत्थं व्यासमहाभागस्य ब्रह्मज्ञान् प्रति आदरभावोऽपि प्रकाश्यते। ब्रह्मज्ञानिन एव जनं परमपदं मोक्षं प्रति नयन्ति अत एव ते अद्यापि समादरणीयाः सर्वेषाम्।

**संवेदनशीलता**

साहित्यसर्जनस्य महत्त्वपूर्णप्रयोजनं पाठकस्य हृदये संवेदनशीलतायाः बीजस्य आरोपणमपि स्वीक्रियते। संवेदनशीलवान् जन एव समाजे ऐक्यं सामाञ्जस्यं सौहार्दं समरसताञ्च स्थापयितुं प्रभवति। अनेन गुणेनैव कोपि समाजः उन्नतिं प्राप्नोति तस्य सभ्यता च उत्तरोत्तरं वर्धापिता भवति, सा एव संस्कृतिः अन्यैः राष्ट्रैः अनुकरणीया भवति। अस्य गुणस्य प्रतिबिम्बनं प्रथमनिश्वासे प्रचुरतया समवलोक्यते ''श्लथत्कण्ठम्, घर्घरितस्वनम्, चीत्कारमात्रम्, दीनतामयम्, अत्यवधानश्रव्यत्वादनुमितदविष्ठतं क्रन्दनमश्रौषम्। तत्क्षणमेव च ''कुत इदम्? किमिदमिति दृश्यतां ज्ञायताम्'' इत्यादिश्य छात्रेषु विसृष्टेषु''... अपि च ''तां च चन्द्रकलयेव निर्मिताम्, नवनीतेनेव रचिताम्, मृणाल-गौरीम्, कुन्दकोरकाग्रदतीं सक्षोभं रुदतीमवलोक्याऽस्माभिरपि न पारितं निरोद्धुं नयनबाष्पाणि''... इति तदेव पुष्णाति। ईदृशी संवेदनशीलता रामायणकालादेव भारतभूमौ दरीदृश्यते -

**मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।**[3]

**धर्मरक्षा**

धर्मरक्षा भारतीयसंस्कृतेः प्रधानविशेषता प्रथितैव। कृष्णेनापि गीतायामुक्तमस्ति : ''परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय सम्भवामि युगे युगे''।।[4] प्रथमनिश्वासस्य प्रतिपाद्याद् विदितं भवति यद् आश्रमवासिनः वास्तविकसंन्यासिनो न सन्ति। ते मुनिवेषेण शिववीरस्य गुप्तचरास्सन्ति, स्वधर्मरक्षापराश्च सन्ति। इदं तथ्यं विज्ञाय योगिराजोऽपि तेषामनुमोदनं करोति–"... योगिराजो मुनिराजं तत्सहचरांश्च निपुणं निरीक्ष्य, तेषामपि शिववीरान्तरङ्गतामङ्गीकृत्य, मुनिवेषव्याजेन स्वधर्मरक्षा-व्रतिनश्चोररीकृत्य ''विजयतां शिववीरः, सिद्धयन्तु भवतां मनोरथाः'' इति मन्दं व्याहार्षीत्। इत्थं सर्वेऽपि आश्रमवासिनः ''धर्मो रक्षति रक्षितः'' इत्यनेन चलायमानाः सन्ति। अद्यापि यत्किमपि अस्माकं धर्मः तत्सर्वथा परिपालनीयः।

**समयस्य महत्त्वम्**

भारतीयसंस्कृत्यां समयस्य सदुपयोगाय अनेकशः परामर्शः प्रदत्तोऽस्ति (भारद्वाज, 2020)। अत्र समयः कालशब्देनापि अभिधीयते। कालशब्दश्च यमराजस्य कृतेऽपि प्रयुज्यते। अतः समयः सर्वथा आकर्तव्यः। तस्यैव अभिव्यक्तिः ग्रन्थकारेण विहितास्ति - ''अहो ! चिररात्राय सुप्तोऽहम्, स्वप्नजालपरतन्त्रेणैव महान् पुण्यमयः समयोऽतिवाहितः''। श्रीमच्छंकराचार्यविरचिते चर्पटपंजरिका-स्तोत्रेऽपि समयगतिं प्रति अस्माकं ध्यानमाकृष्टमस्ति। अनेन हि समयः सर्वथा रक्षणीयः आदरणीयश्च। भगवत्पादैः लिख्यते स्वस्य स्तोत्रे -

**''दिनमपि रजनी सायं प्रातः शिशिरवसन्तौ पुनरायातः।**
**कालः क्रीडति गच्छत्यायुस्तदपि न मुञ्चत्याशा वायुः''।।**

**सामाजिकसंरचना**

साहित्यिककृतिषु सामाजिकसंरचनायाः प्रभावः दरीदृश्यते। अस्य ग्रन्थस्य प्रथमनिश्वासेऽपि बहुषु स्थलेषु भारतीयवर्णव्यवस्थायाः उल्लेखनं प्राप्यते येन भारतीयसामाजिकसंरचनायाः ज्ञानं प्राप्तुं शक्यते। ब्रह्मचारिगुरुः कथयति 'वत्स गौरसिंह! अहमत्यन्तं तुष्यामि त्वयि यत् त्वमेकाकी अफजलखानस्य त्रीनश्वान् तेन दासीकृतान् पञ्च ब्राह्मणतनयांश्च मोचयित्वा आनीतवानसीति। कथं न भवेदीदृशः? कुलमेवेदृशं राजपुत्रदेशीयक्षत्रियाणाम्'। अत्र क्षत्रियकुलं प्रशंसितमस्ति ब्रह्मचारिगुरुणा तस्य प्रजारक्षकत्वात्। महाभारतेऽपि कथितमस्ति सर्वभूतपरित्राणं क्षात्रधर्म इहोच्यते[5]

**आराध्यदेवः**

भारतीयसमाजे जनाः सामान्यतया पारलौकिकशक्तिं प्रति श्रद्धान्विताः भवन्ति। विवेच्यग्रन्थांशेऽपि नैकस्थलेषु भगवतः शिवस्य स्मरणं कृतमस्ति। यदा यवनयुवको गौरसिंहं तर्जयति तदा गौरसिंहेन सक्रोधं कथ्यते ''वयमपि तु स्वाङ्कागतसत्त्ववृत्तयः शिवस्य गणा अत्रैव निवसामः''। अनेन सूच्यते यद् गौरसिंहः शिवस्य भक्तोऽस्ति। एतदतिरिच्य अन्यत्रापि ग्रन्थकारेण वर्णितमस्ति ''करकम्पितकृपाकृपणकृपाणो महादेवमारिराधयिषुस्तपस्विवेषोऽर्जुन इव शान्तवीररसद्वयस्नातः सपदि समागतवान् तन्निकटे''। गौरसिंहव्याजेन कदाचिद् व्यासवर्यस्य शिवं प्रति भक्तिरपि प्रकाशिता भवति।

**सांस्कृतिकेतरवर्णनानि**

ग्रन्थस्य अस्य कथाप्रकृतित्वाद् अस्मिन् सांस्कृतिकेतरवर्णनानि अपि समधिकतया दृश्यन्ते। प्राकृतिकसुषमा नैकशः वर्णनविषयत्वेन चिताऽस्ति व्यासमहोदयेन- ''कदलीदलकुञ्जायितस्य एतत्कुटीरस्य समन्तात् पुष्पवाटिका, पूर्वतः परमपवित्रपानीयम्.....'' इत्यादिरूपेण बहुत्र समुपलभ्यन्ते। संस्कृतिः साहित्यरचनासु अनायासेनैव प्रकटीभवति, तस्य मानवबुद्धिस्थितत्त्वात्। यदि लेखकः संस्कृतिनिरूपणं कर्तुं न अभिलषते तदपि येन केन प्रकारेण संस्कृतेराविष्करणं भविष्यति एव। प्रथमनिश्वासे बहूनि वर्णनानि सन्ति यानि वर्णनसामान्यानीति वक्तुं शक्यन्ते। तत्र नास्ति सांस्कृतिकतत्त्वप्रतिपादनं सहजप्रकाशनं वा संस्कृतेः। काव्येषु बहुधा काव्यकारः सर्वजनीनात्मकानि वर्णनान्यपि करोति येषां स्वीकार्यता सार्वत्रिकी भवति। कदाचित्, तत्समाजस्य संस्कृतिविरोधितत्त्वान्यपि विशदतया अभिहितानि भवन्ति किन्तु तत्सर्वं निश्चितप्रयोजनेन नकरात्मकप्रकाशेन च दर्शयन्ते काव्यकोविदैः।

श्रीमदम्बिकादत्तव्यासेन विरचितस्य ''शिवराजविजयः'' इत्याख्यस्य गद्यकाव्यस्य प्रथमनिश्वासे यानि सांस्कृतिकतत्त्वानि समधिगतानि तानि वर्णितानि इह। भारतीयसंस्कृतौ मांगलिकतायाः किं महत्त्वम्? गुरुभक्तिः कथम् आचर्यते? परोपकारभावना कीदृशी भवति? सन्ध्यावन्दनस्य किं माहात्म्यम्? ब्रह्मज्ञानयुतां को महिमा? संवेदनशीलतायाः किं स्थानं समाजे? धर्मरक्षा किमर्थम् आवश्यकी? समयस्य किं महत्त्वम्? सामाजिकसंरचना कीदृशी अस्ति? आराध्यदेवः को भवति?

इत्यादिप्रश्नानामुत्तराणि प्राप्यन्ते निश्वासेऽस्मिन्। कस्यचिदपि राष्ट्रस्य संस्कृतिः तद्राष्ट्रस्य भाषाद्वारैव प्राकाश्यतामाप्नोति। साहित्यञ्च भाषाया मूर्तिमानरूपम्। आलोच्यग्रन्थस्य सांस्कृतिकाध्ययनेन उपर्युक्तानि सांस्कृतिकतत्त्वानि गवेषितानि येषां जीवने क्रियान्वयनेन भद्रतरं राष्ट्रं निर्मातुं शक्यते, मानवजीवनदशा च भद्रतरा कर्तुं शक्यते। एतत् सर्वं यदि मानवस्य चिन्तने समागच्छेत् तर्हि जनः स्वयमेव उदात्तगुणसमन्वितो भवितुं प्रभवति। श्रीमदम्बिकादत्तव्यासप्रणीते प्रकृतग्रन्थे यानि सांस्कृतिकमूल्यानि संकलितानि तानि नूनमेव प्रासंगिकानि अद्यापि उपादेयानि च। पद्येनानेन उपसंहरामः -

**मूलभूतानि मूल्यानि भारतीयाश्रितानि च।**
**अनुस्यूतानि राष्ट्रस्य प्राचीन-ज्ञान-पद्धतौ।।**
**सन्त्यद्य तानि सर्वाणि प्रासंगिकानि सर्वथा।**
**पुनस्संरचनायां च राष्ट्रस्य नास्ति संशीतिः।।**

(बनमालीविस्वालवर्यस्य)

**सन्दर्भः**


1. *ऋग्वेदः 2/28/1*
2. *ऋग्वेदः 1/104/7*
3. *वाल्मीकीयरामायणम् 1/2/15*
4. *गीता 4/8*
5. *महाभारतम् 12/359/6*


●●●

# 17

# डॉ. रमाकान्तशुक्लस्य काव्यत्वम्

*हेमलता रानी*

आधुनिक-संस्कृत-साहित्यक्षेत्रे कविरमाकान्त-शुक्ल-महोदयस्य महत् अवदानमस्ति। बहुविधप्रतिभा-सम्पन्नाय, आधुनिक-कवि मूर्धन्याय, संस्कृत-सृष्टि लोचन-भूताय, सरस्वत्या वरद-पुत्राय, सुस्वभावाय, व्यक्तित्व-कृतित्व-पूर्णाय, देवावाण्याः अनेक-विषय-वितानाय, महापुरुष-चरित-समाय, एकत्वेऽप्यनेक-संस्थानाय, निस्वार्थ-निरभिमानाय, संस्कृत-गवाक्षाय, विविध-कृति-कर्तृत्व-पुरस्कृताय, स्वस्य कृति-राशि-निमग्नाय, अन्येषां सत्कृतिवितति-विलुप्ताय, वय सोमध्यमाय, काव्य-रञ्जन-प्रभाञ्जनाय,गीत-गायन-गुञ्जनाय, सुरभारतीमणि माणिक्याय, देहलीनगर-दीप-न्यायेन अन्तर्बाह्य- प्रकाशिताय, काव्य-पाठ्याय, कनिष्ठिकाधिष्ठिताय, विद्वत्त-लजाय , सज्जनाय, आदरणीय- पूजनीय-रमाकान्त शुक्लाय चरण-वंदनाय नमः। आचार्य-शुक्लस्य अवदान- अविस्मरणीयम् अस्ति स महाकाव्य-खण्डमुक्तकानां संरचना, कथोपन्यासनां रचना, गद्यगीतानुवादानां प्रणयनम्, हास्यव्यंग्यविनोदानामालेखन-प्रकाशनम्, अनेक-समस्या-सम्पूर्तिकरणम्, नाट्यकलाभिनेयानाम् आमञ्चनम् , स्तोत्राणां स्तवनम्, शताब्द्या अस्याः संस्कृत-परिचयदानम्, अनेक-नूतन-शोधप्रबन्ध-प्रयोग-योगदानम्, काले –काले अभिहार-प्रकार-प्रसारणम्, कुशलपत्रकारकार्य-सम्पादनम्, आकाशवाणीदूरदर्शनकार्यसाधनम् साहित्यरचनायामेवाऽऽह्लादनम्। किं किं नास्त्यस्यप्रसंग-संगमे? कविधुरीणस्यास्य रचनाकाव्यसम्पत्तिश्चतुर्मुखी, चम्पू-मुक्तकगीतनाट्यप्रबन्धादिषु सर्वत्र लब्धप्रसार-नवीनप्रयोग-प्रवणा, दूरदर्शनाकाशवाणीप्रभृतिसर्वकारसञ्चालित-माध्यमेष्वपि प्रतिष्ठिता लोकप्रिया चेति सर्वेऽपि विदन्त्येव कालधुरीणाः, सहृदय धुरीणाः पाठकाः दर्शकाः श्रोतारश्च , संस्कृतोपेक्षा- कषायितेऽस्तिृता वर्त्तमानेऽनेहसि महत्साफल्यं

वैशिष्ट्यं चास्य प्रतिभावतः सुरभारती समुपासकस्येति न संशीतिलेशः। 'भाति मे भारतम्' इत्यष्टोत्तर- शतस्त्रग्विणी वृत्तबन्धैर्निर्व्यूढं काव्यं राष्ट्रकविमैथिलीशरणगुप्तस्य 'भारतभारती'– काव्यवन्नितरां प्रसिद्धिं समवाप्य शोभतेतराम् राष्ट्रभाषांग्लभाषानुवादद्वय-परिवृढं नःसमक्षं, तदनु''जय भारतभूमे'', ''अहं स्वतन्त्रता भणामि'', भारतजनताऽहम्", ''इत्यादीनि बहूनि काव्यानिअधुनापि राष्ट्रस्य सामयिकान्विषयान् दिग्दर्शयन्ति, तान् सम्यक् समालोचयन्ति, समुत्थितानां समस्यानां समाधानमपि निर्दिशान्ति अस्त्यपरमपिवैशिष्ट्यमस्य रमाकान्तकविवरेण्यस्य यदसावन्यानपिदीर्घा- ज्येष्ठ-कनिष्ठकविसाधुजनान् यथायोग्यमभिनन्दति प्रोत्साहयतिआनन्दमुक्तकण्ठेन तेभ्यो वितरत्यादरमात्मीयं सौहार्दञ्च किञ्च तेषां काव्यांशानां मुखकण्ठस्थीकरणं विधायविदग्धगोष्ठीषु तदनुरूपस्वरसौष्ठवेन कवि-गायनमपि करोति जाह्नवीजलधारावत्कलकलनिनादोल्लसितंहास्यलास्यविलसितंयथास्य व्यक्तिमत्वं सर्वानाह्लादयत्यावर्जयति तथैवास्य कविभारत्यपीति–दृढं संकल्पप्रतीमः। समासतः शक्यते वक्तुमेतदेव

**''सद्भावदुग्धाम्बुधिधवलकणै रागरम्यामनोज्ञा**
**ज्ञप्तिप्रज्ञप्तिपूर्णादिनकरकिरणोद्दीप्तभाषा, सुहासा।**
**सद्वृत्तैर्गीयमाना विविधरसकलाकेलिमाधुर्यधुर्या**
**स्फीतंतद्व्यक्तिमत्वं स्फुटमनुहरति श्रीरमाकान्तवाणी।।''**

कविः शुक्लो रमाकान्तः संस्कृतोन्नतये रतः -
मनसि चिन्तय सखे ! किं जीवनं ते ! रहसि शीलय सखे! किं जीवनं ते !
न वा स्वार्थः परार्थो नापि बन्धो! त्वया चेत्साध्यते, किं जीवनं ते ! अर्थात् जनानां जीवनं सद्वृत्तिं त्यक्त्वा असद्वृत्तिपूर्णं जातं स अतएव चिन्तनीयम् अस्ति स
न साहित्यं, न संगीतं, कला वा
न रासिक्यं च ते, किं जीवनं ते!

न दाक्षिण्यं न सौशील्यं, न कीर्तिः न सेवा, नो दया, किं जीवनं ते ! अर्थात् एतद् गुणं विना जीवनं जीवनं नास्ति, अतो हे मानवाः चिन्तयन्तु।
विपदि धैर्यंमथाभ्युदये क्षमा नो न वा युधि विक्रमः, किं जीवनं ते !
गुरोः पित्रोर्न चरणा वन्दिताश्चेत् अहंकारात्त्वया, किं जीवनं ते !
न कश्चित्प्रेमबन्धे वृथाजीविन् सखे ! किं जीवनं ते !

त्वामबध्नात्
त्वया यदि शासनासन्दीमवाप्य
न लोको रंजितः,
किं जीवनं ते !
मतयाचना अहो दैनन्दिनी ते वनीपक नेतृवर ! किं जीवनं ते !
न निःश्वसितं न रुदितं, मूर्च्छितं नो
प्रियाविरहे त्वया, किं जीवनं ते!
वियोगे ते जनो नो कोऽपि खिन्नः न योगे प्रीतिमान्, किं जीवनं ते! मनोभावो न निर्द्वन्द्वं प्रकटितः कपटचारिंस्त्वया, किं जीवनं ते ! विषामृतयोर्विवेकं नैव कर्तुम्
त्वमीशश्चेत्तदा किं जीवनं ते! न दुष्टास्तर्जिताः स्वीयेन महसा
न सन्तो मानिताः, किं जीवनं ते!
करालः काल इव नाभासि चेत्त्वम्
कुकृत्यानां —ते, किं जीवनं ते! त्वया स्वान्तः सुखार्थं देववाणी
न पठिता, न श्रुता, किं जीवनं ते!
प्रभुः कर्ता च भर्ता चैव हर्ता चेदाराधितः, किं जीवनं ते ! न निपीतं नैव मधु प्रेम्णः
कदाचित् विरस मृल्लोष्ठ रे! किं जीवनं ते!
न रसिता रसवशात्त्वत्पार्श्वमाप्ता
रहसि काचित्त्वया, किं जीवनं ते!
वृथा चन्द्रो वृथा मधुयामिनीयम्
न पार्श्वे ते प्रिया, किं जीवनं ते!
स्वदेशः सेवितो
न प्राणपणतः
विकत्थन धूर्त रे, किं जीवनं ते !
मुखे मधु ते मनसि ते कालकूटः तृणावृत कूप रे! किं जीवनं ते!
कृतघ्नत्वं
कदाचारः पिशुनता
इमे त्वब्दान्धवाः, किं जीवनं ते !
स्वयं नष्टः परान्नाशयसि नित्यम्

व्यसनशतशालिनः किं जीवनं ते !
क्षणे रुष्टः क्षणे तुष्टः सखे ! त्वम् अहो चलचित्त रे! किं जीवनं ते!
मुखे ते मक्षिकाः कुर्वन्ति भिन्-भिन् न चोड्डाययसि रे ! किं जीवनं ते!
सुरक्षितमस्ति नो पदमपि पलार्थम् अहो मन्त्रिप्रवर! किं जीवनं ते!
प्रदर्शन गालिका कार्यावरोधैः अहो प्राचार्यवर! किं जीवनं ते!
प्रकृत्यंके न ते क्रीडा बभूव सदा हर्म्यस्थ रे! किं जीवनं ते!
न दुग्धं ( पयो गव्यं न चेद् व्यायामिनस्ते)
माहिषं व्यायामिनस्ते
सुलभमास्तेऽन्वहं ! किं जीवनं ते!
न चेत् पार्श्वे सखे ते स्वास्थ्यवित्तम्
धनैरेतैरलं, किं जीवनं ते !
उपायैस्तैश्च तैर्धृतमपि मनस्ते प्रियां नोपैति चेत् किं जीवनं ते ! .... ।।
अयं श्लोकः कविरमाकान्त-महोदयेन प्रत्युपस्थापितः यथा-
जना ये भारतं पुष्णन्ति, नित्यं वन्दनीयास्ते।
अथो तत्पांसुलं कुर्वन्ति ये, किं वन्दनीयास्ते?।।
जना एकत्वसूत्रे यैर्निबद्धा वन्दनीयास्ते।
जनान् ये योधयन्ति प्रत्यहं किं वन्दनीयास्ते।।
अभिघ्नन्तो रिपून् युद्धे चलन्तो वीरगत्याग्रे।
दिवं ये देशरक्षार्थं प्रयाता वन्दनीयास्ते।।
प्रियं सत्यं हितं सारं वचो या वक्ति सा वाणी ।
न ते वन्द्या, परं विपरीतवक्त्री वन्दनीयास्ते?।।
'भजे भारतम्, -
सदाज्ञानविध्वंसकारी मनोज्ञः
समालोक्यते यत्र वाणी-विहारः।
विधत्ते स्वमित्रं च यः प्राणिमात्रं
भजेऽहं मुदा भारतं तं स्वदेशम्।।

उपर्युक्तेन विवरणे स्पष्टं भवति यद्–आधुनिककालस्य अनेकाः साहित्यपद्धतयउपर्युक्तकाव्याङ्गीकृताः। प्रायः सर्वाणि प्रधानविषयाणि अत्र

समाविष्टानि। वस्तुतः प्रस्तुतकाव्यम् आधुनिक-साहित्य-परम्परायाम् एका विशिष्टा- सम्पूर्णज्ञानविज्ञानंविकसितपरिणतोपबृंहितरूपेण मिथः सङ्ग्रथ्नाति। अत एव रमाकान्तस्य काव्यं भारतीयजीवनस्य आधुनिककोषरूपेण विराजते आधुनिक विश्वस्मिन्नित्यपि नास्ति सन्देहः।

**संदर्भ :**


*1. देववाणी–सुवासः (डॉ. रमाकान्तशुक्लाभिनन्दनग्रन्थः), प्रथमः खण्डः, 'अभिराज' डॉ. राजेन्द्र मिश्रः, प्रकाशकः- डॉ. रमाकान्तशुक्लाभिनन्दग्रन्थसमिति'-कृते, देववाणी-प्रकाशनम् , नयीदिल्ली, संस्करणम् प्रथमम् , 1993 ई., पृ. 2085*


●●●

# 18

# संस्कृतसाहित्ये मुक्तककाव्यपरम्परा

*सौरभमिश्रः*

संस्कृतसाहित्यस्य प्राचीनतमो ग्रन्थः वेदोऽस्ति। पुराकाले ऋषयः स्वतपसा परिपुष्टदृष्ट्या यस्य ज्ञानस्य येषां मन्त्राणां-वा साक्षात्कारं कृतवन्तः, सा ज्ञानराशिः वेदः इति कथ्यते। आगमप्रमाणे शब्दप्रमाणे वा वेदाः सर्वश्रेष्ठाः इति मन्यन्ते। मीमांसकाः वदन्ति यत्कस्यापि समस्यायाः समाधानं यदि प्रत्यक्षप्रमाणेन आगमप्रमाणेन वा न ज्ञातुं शक्यते तर्हि तस्याः समस्यायाःसमाधानं वेदेषु सहजतया प्राप्तुं शक्यते। तद्यथा-

**''प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।**
**एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता''।।**[1]

ज्ञानस्य सर्वासु परियोजनासु वेदाध्ययनं सर्वोत्तमा परियोजना वर्तते। यज्ज्ञानं अन्येन उपायेन न लभ्यते तज्ज्ञानं वेदेभ्यः सुलभतया प्राप्तुं शक्यते। वेदाः भारतीयसंस्कृतेः श्रेष्ठतमं मूलमिति कथने न कश्चिदपि संशयः। वेदनिर्दिष्टमार्गस्य अनुसरणं कृत्वा भारतं धर्म-दर्शन-अध्यात्म-कला-साहित्य-विज्ञानानां च क्षेत्रे ''विश्वगुरुः'' इत्यसाधारणोप्लब्धिं लब्धवत्।

वेदाध्ययनेन-वेद्यतेयत् वेदेष्वेव ज्ञानविज्ञानस्यविपुलभण्डारः वर्तते, भारतस्यसुसम्पन्नासंस्कृतेः मूलाश्रयाः वेदाः एव, जीवने-किं कर्तव्यं-किं न कर्तव्यमेतज्ज्ञानम्वेदेष्वेव प्राप्यते। सर्वेऽपि जानन्त्येव यत् पुराकालात् अद्यावधि पर्यन्तं वैदिक वाङ्मयं सम्पूर्णं विश्वं प्रति विविधान् उपदेशान् ददाति। वेदः सर्वेषाम् ज्ञानानामक्षयकोषो वर्त्तते। महाराजमनुः मनुस्मृत्यां वर्णनमपि कृतवान्। तद्यथा-**''सर्वज्ञानमयो हि सः''।**[2] सर्वेपि विद्वत्तल्लजाः, भारतस्य दार्शनिकाः, स्मृतिकाराः, वैयाकरणाः, शास्त्रकाराः वेदानां महत्त्वं एक स्वरेण प्रतिपादयन्ति। वेदः

इति शब्दः ऋग्वेदादि (ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेद) चतसृणां संहितानां तथा एताषां चतसृणां संहितानां ब्राह्मणग्रन्थानाञ्च बोधकोऽस्ति।

''मन्त्रब्राह्मणयोर्वेदनामधेयम्''।[3]

वर्षसहस्राणि पर्यन्तं गुरुशिष्यपरम्परया वाचिकपरम्परया च वेदानां रक्षणं ऋषयः कृतवन्तः। दशसहस्राधिकाः मन्त्रः वर्षाणि यावत् मौखिकरूपेण कण्ठस्थं कृत्वा अक्षुण्णाः रक्षिताः।

कालान्तरेण वैदिकसाहित्यस्य वृद्धिः अभवत्। वैदिकसाहित्ये ब्राह्मणारण्यकोपनिषदादिग्रन्थाः विकसिता। वेदेषु काव्यतत्त्वमपि प्रचुरमात्रायां प्राप्यते। संस्कृतसाहित्यपरम्परायां यः रचनां करोति सः कविः इति उच्यते। तस्य कृतिः काव्यमिति कथ्यते। तद्यथा-**''कवयतीति कविः तस्य कर्म काव्यम्''।**[4]

काव्यस्य द्विधा विभाजनं भवति। श्रव्यकाव्यम् , दृश्यकाव्यम् ।तद्यथा-

**''दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधामतम्''।**[5]

**दृश्यकाव्यम्-** यस्मिन् नटानाम् अभिनयं कथनोपकथनञ्च दृष्ट्वा सहृदयजनाः आनन्दं प्राप्नुवन्ति तत् काव्यं दृश्यकाव्यमिति कथ्यते। दृश्यकाव्ये अभिनयतत्त्वं प्रधानं भवति। दृश्यकाव्यमपि द्विधा विभज्यतेरूपकाणि उपरूपकाणि च रूपकाणां दश प्रकाराः साहित्यग्रन्थेषु प्राप्यन्ते। तद्यथा-

**''नाटकं सप्रकरणं भाणः प्रहसनं डिमः।**
**व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति''।।**[6]

उपरूपकाणामपि अष्टादश भेदाः प्राप्यन्ते। तद्यथा—

**''अष्टादशप्राहुरुपरूपकाणि मनीषिणः''।**[7]

श्रव्यकाव्यम् श्रवणेन्द्रियेणश्रुत्वा पठित्वा वा सहृदयाः जनाः आनन्दं प्राप्नुवन्ति तत् काव्यं श्रव्यकाव्यमिति उच्यते।

श्रव्यकाव्यमपि द्विधा विभज्यते-प्रबन्धकाव्यंमुक्तककाव्यञ्च

**प्रबन्धकाव्यम् -**–प्रबन्धकाव्यस्यान्तर्गतं महाकाव्यं, खण्डकाव्यञ्चेत्यादीनि गण्यन्ते।

**''सर्गबन्धोमहाकाव्यं तत्रैकोनायकःसुरः''।**[8]

महाकाव्यं सर्गेषु निबद्धं भवति तत्र नायकः देवता महापुरुषो वा भवति। महाकाव्यं श्रव्यकाव्यस्य सर्वासु विधासु सर्वश्रेष्ठं वर्तते। संस्कृतसाहित्यस्य बृहद्वाङ्मये रघुवंशम्, किरातार्जुनीयम्, कुमारसंभवम्, नैषधीयचरितम् चेत्यादीनि बहूनि महाकाव्यानि प्राप्यन्ते। संस्कृतसाहित्ये द्वे आर्ष काव्येऽपि प्राप्येते। रामायणं महाभारतञ्च

**''आदिकाव्यमिदं चार्षं पुरावाल्मीकिना—तम्'' ।**[9]

खण्डकाव्यं महाकाव्यस्य कथानकस्य एकस्य खण्डस्याश्रिता रचना वर्त्तते । तद्यथा - **''खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि च'' ।**[10]

खण्डकाव्यं शास्त्रीय दृष्ट्या लघुकाव्यं वर्तते। खण्डकाव्यस्य विषयवस्तु वर्णनात्मकं भवति परञ्च गीतिकाव्यं तु आत्माभिव्यक्तिप्रधानं काव्यं वर्तते। गीतिकाव्ये कवयः स्वस्याः रागात्मकभावनायाः कल्पनायाः च माध्यमेन काव्यस्य वर्ण्यविषयं निरूपयन्ति ।

**मुक्तककाव्यम्-** यस्मिन् प्रत्येकं पद्यं पूर्णतः स्वतन्त्रं भवति तथा स्वयमेव सम्पूर्णं विषयं प्रसङ्गञ्च व्यञ्जयितुं समर्थमस्ति तत् काव्यं मुक्तककाव्यमिति कथ्यते। मुक्तककाव्यं विश्वसाहित्यस्य प्राचीनतमा विधा वर्तते। ऋग्वेदादिषु-केचनमन्त्राः स्वविषयं स्वतन्त्ररूपेण प्रतिपादयन्ति, अतः ऋग्वेदः विश्वस्य प्रथमः मुक्तकसंग्रहः इति वक्तु ंशक्यते ।

संस्कृतसाहित्यं द्विधा विभज्यते-वैदिकसाहित्यं लौकिकसाहित्यञ्च। वैदिकसाहित्यस्य प्रथमा—हिः ऋग्वेदः । तस्य विविधाः मंत्राः मुक्तकानामुदाहरणानि सन्ति ।

लौकिकसंस्कृतसाहित्यस्य रचनायाः प्रारम्भः आदिकवि- वाल्मीकिमुखात् स्वतः निरूसृतेन मुक्तकेन जातः । तद्यथा-

**''मा निषाद प्रतिष्ठां त्वमगमः शाश्वती समाः ।**
**यत्क्रौचमिथुनादेकमवधीः काममोहितम्'' ।।**[11]

महाभारतेऽपि लिखितमस्ति यत् तस्मिन् कालेऽपि विविधप्रकारेण राज्यसभायां जनसभायां वा जनाः मुक्तककाव्यं श्रावयन्ति स्म । तद्यथा-

**''सामानि स्तुतिगीतानि गाथाश्चविविधास्तथा'' ।**[12]

आनन्दवर्धनः अभिनवगुप्तश्च मुक्तककाव्यं स्वकाव्यचिन्तने श्रेष्ठं मन्येते। आनन्दवर्धनः स्वीकरोति यत् मुक्तककाव्येष्वपि प्रबन्धकाव्यमिव रसपरिपक्वता सम्भवति । तद्यथा –

**''मुक्तकेषुप्रबन्धेष्विवरसबन्धाभिनिवेशिनः कवयोदृश्यन्ते'' ।**[13]

अभिनवगुप्तमतानुसारे मुक्तककाव्यं निराश्रितं स्वयमेव पूर्णं रसप्रस्तोतुं समर्थमस्ति । तद्यथा –

**"पूर्वापरनिरपेक्षेणापिनरसचर्वणा क्रियते तन्मुक्तकम्"।**[14]

पद्यसंख्याधारीकृत्य मुक्तककाव्यं पञ्चधा विभज्यते। तद्यथा –

**"छंदोबद्धपदंपद्यं तेन मुक्तक मुक्तकम्।**
**द्वाभ्यां तु युग्मकं संदानितकं त्रिभिरिष्यते।**
**कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम्"।।**[15]

- **मुक्तकम्-** यस्मिन् एकमेव पद्यं स्वविषयकथने अन्यपदाश्रितं भवति, तत् पद्यं मुक्तकमिति कथ्यते।
- **युग्मकम्-** वर्ण्य विषयस्य प्रस्तुत्यर्थं पद्यद्वयस्य आवश्यकता भवति, तत् युग्मकमिति कथ्यते।
- **सन्दानितकम्-** वर्ण्यविषयस्य प्रस्तुत्यर्थं त्रीणि पद्यानि अपेक्ष्यन्ते, तत् काव्यं सन्दानितकमिति कथ्यते।
- **कलापकम्-** यत्रचत्वारिपद्यानिवर्ण्य विषयस्य उपस्थित्यर्थं अपेक्ष्यन्ते, तत्कलापकमिति कथ्यते।
- **कुलकम् -** यत्र पञ्च पद्यानि इतोऽपि अधिकानि वा अपेक्ष्यन्ते, तत् कुलकमिति कथ्यते।

  मुक्तककाव्यस्य प्रगतिशीलापरम्परायां कवीनां योगदानं प्रशंसनीयं वर्तते। एतेषां कवीनां प्रयासेन विविधानि मुकतककाव्यानि रच्यन्ते स्म, तेषु काव्येषु प्रमुखानि मुक्तककाव्यानि निम्नलिखितानि सन्ति।

- **शतकत्रयम्-** मुक्तककाव्यस्य अन्तर्गतं शतपद्यात्मकं काव्यं शतकमिति कथ्यते। अस्यां परम्परायां प्रथमतया भर्तृहरिणा कृतानि त्रीणि शतककाव्यानि प्राप्यन्ते। तानिचसन्ति-

नीतिशतकम्, श्रृंगारशतकम्, वैराग्यशतकम्। त्रीण्यपि शतककाव्यानि अतीव लोकप्रियानि सन्ति।

- **सूर्यशतकम्-** अस्य शतकाव्यस्य रचनाकारः मयूरकविरस्ति। कन्यायाः शापवशात् मयूर कविः कुष्ठरोगेण रुग्णः जातः। तदा सूर्यशतकेन सूर्य स्तुतिं कृत्वा कुष्ठरोगात् मुक्तिं प्राप्तवान्।
- **चण्डीशतकम्-** अस्याः रचनायाः रचनाकारः महाकविः बाणोऽस्ति। अस्यां 102 पद्यानि तथा मुख्यतया स्रग्धरा छन्दः वर्तते। अस्मिन्काव्ये प्रमुखतया भगवत्याः स्तुतिः वर्तते।

- **अमरुकशतकम्-** अस्य काव्यस्य रचनाकारः अमरूकः वर्तते। रचनाकालः नवमशताब्दी इति मन्यते। अयं शृङ्गाररसेनपरिप्लावितग्रन्थो वर्तते।
- **देवीशतकम्-** आचार्यानन्दवर्धनकृतं देवीशतकम् 100 पद्यात्मकं देवी स्तुति परकं ग्रन्थो वर्तते।
- **भाति मे भारतम् -** डॉ. रमाकान्तशुक्लकृतं ''भाति मे भारतम्'' 108 पद्यात्मकं राष्ट्रस्तुतिपरकम् आधुनिकमुक्तककाव्यं वर्तते। अस्मिन् काव्ये स्रग्विणीछन्दः प्राप्यते।
- **भारताभिज्ञानशतकम् -** डॉ. बालकृष्णशर्मकृतं ''भारताभिज्ञानशतकम्'' 103 पद्यात्मकं राष्ट्रार्चनापरकं काव्यंवर्त्तते। अस्मिन् काव्येस्रग्विणी छन्दः प्राप्यते।
- **कोरोनाकोपशतकम् -** डॉ. बालकृष्णशर्म कृतं ''कोरोनाकोपशतकम्'' 102 पद्यात्मकं कोरोनारोगस्य कोपवर्णनपरकग्रन्थो वर्त्तते। अस्मिन् काव्ये शार्दूलविक्रीडितं छन्दो वर्त्तते।

**निष्कर्षः -** वेदः एव ज्ञानानां विज्ञानानां च श्रेष्ठतमो प्राचीनतमो वा मूलस्रोतो वर्त्तते।तद्यथा-

**''सर्वज्ञानमयो हि सः''।**[16]

वेदानामेषा ज्ञानराशिः ऋषिभिः स्वतपसा अक्षुण्णं स्थापितः। तस्यामेव प्रगतिशीलायां परम्परायामेव महर्षिवाल्मीकिमुखात् मुक्तकरूपेण आदिकाव्यस्य बीजरूपश्लोकः स्वतः प्रकटितः। तच्चायम्-

**''मा निषाद प्रतिष्ठां त्वमगमः शाश्वती समाः।**
**यत्क्रौञ्च मिथुनादेकमवधीःकाममोहितम्''।।**[17]

आदिकाव्यरामायणात्परम् एतस्यां काव्यपरम्परायां बहूनि-महाकाव्यानि, खण्डकाव्यानि इत्यादीनि रचितानि आसन्। सर्वाणि काव्यानि पठन-पाठने, मार्गदर्शने च भवन्ति परञ्च मुख्यतया लोकव्यवहारे जनानां मुखे केवलं तेषां काव्यानां काश्चन प्रमुखपङ्क्तयः एव आयान्ति। यथा- महाभारतं विशालतमो ग्रन्थो वर्त्तते। तत्र एकलक्ष श्लोकाः वर्तन्ते। परञ्च जनाः मुख्यपङ्क्तीः एव वदन्ति। ''कर्मण्येवाधिकारस्ते मा फलेषु कदाचन''। ''यदा यदा हि धर्मस्य ग्लानिर्भवति भारत''। इत्यादयः। एवं प्रकारेणैव मुक्तककाव्यपरम्परा बहुप्रचलिता। एतस्यां परम्परायां बहूनि मुक्तककाव्यानि रचितानि। तां परम्परां अक्षुण्णां स्थापयितुं

आधुनिकसंस्कृतसाहित्येऽपि कवयः मुक्तककाव्यानि लिखन्ति। तेषु मुक्तककाव्येषु प्रमुखानि मुक्तककाव्यानि निम्नलिखितानि सन्ति। नीतिशतकम्, शृङ्गारशतकम्, वैराग्यशतकम्, सूर्यशतकम्, चण्डीशतकम्, अमरूकशतकम्, देवीशतकम्, भाति मे भारतम्, भारताभिज्ञानशतकम्, कोरोना कोपशतकम् चेत्यादीनि।
मुक्तककाव्यानाम् एषा परम्परा संस्कृतस्य सातत्यं प्रमाणीकरोति।

**सन्दर्भः-**


1. *संस्कृत साहित्य का समग्र इतिहास, पृ.3*
2. *मनुस्मृतिः,2/7*
3. *संस्कृत साहित्य का इतिहास, उमाशंकर ऋषि, पृ. 30*
4. *साहित्यदर्पणम्, 6/1*
5. *दशरूपकम्, 1/8*
6. *साहित्यदर्पणम्, 6/6*
7. *तदेव, 6/315*
8. *संस्कृत साहित्य का समग्र इतिहास, पृ.107*
9. *साहित्यदर्पणम्, 6/329*
10. *संस्कृत साहित्य का समग्र इतिहास, पृ.110*
11. *रामायणम्, 1/2/15*
12. *महाभारतम्, सभापर्वम्, 11/35*
13. *ध्वन्यालोकः, 3/7*
14. *संस्कृत साहित्य का समग्र इतिहास, पृ. 111*
15. *साहित्यदर्पणम्, 6/314, 315*
16. *मनुस्मृतिः, 2/7*
17. *रामायणम्, 1/2/15*
18. *श्रीमद्भगवद्गीता, 2/47*
19. *तदेव,4/7*


●●●

# 19

# सन्तचरिताधारितदलितोदयमहाकाव्यस्य दार्शनिकमीमांसा

*गुलशनकुमारः*

संस्कृतवाङ्मयस्य विस्तीर्णपरम्परायाः महाकाव्यविधा सर्वथा कविभिः, काव्यशास्त्रिभिः तथा सुहृद्भिः समादृता वर्तते। रामायणं तथा महाभारतम् एताभ्याम् आर्षमहाकाव्याभ्यां प्रारम्भा इयं परम्परा आधुनिककालेपि पुष्पिता पल्लविता च भवति रसिकान् सिञ्चति च। सहस्राणां वर्षाणां सृजनक्रमे महाकाव्येषु विविधाः विषयाः समागताः। काले-काले काव्यशास्त्रिभिः महाकाव्यविधायाः लक्षणमपि कृतम्। इयं काव्यशास्त्रपरम्परा काव्यालंकारतः अभिराजयशोभूषणं पर्यन्तम् आगतवती, अग्रेऽपि प्रवहमानगस्ति। समयपरिवेशानुसारेण काव्यशास्त्रोपि महाकाव्यस्य लक्षणं कृतवन्तः। आधुनिक- संस्कृत-महाकाव्यविषये यदि वयं वार्ता कुर्मः तर्हि कुत्रचित् परम्परागतं काव्यशास्त्रीय नियामानां पालनं भवति तथा कुत्रचित् किञ्चित् परिवर्तनं-प्राप्यते। आधुनिक संस्कृत महाकाव्येषु संस्कृतेतर भाषाणां रचनाधर्मितायाः प्रभावः दृश्यते। अस्मिन् सन्दर्भे त्रिवेणीकविः प्रो.अभिराजराजेन्द्रमिश्रवर्याणां महाकाव्यस्य लक्षणं विशेषरूपेण उल्लेखनीयं वर्तते।

**सर्गबन्धो महाकाव्यं लोकवन्द्य जनाश्रयम्।**
**ख्यापयद्विश्वबन्धुत्त्वं स्थापयद्विश्वमंगलम्।।**
**नायकस्तत्र देवः स्यात्प्रजाबन्धुरथो नृपः।**
**चारुचर्योऽथवा कोऽपि सज्जनचरितोज्ज्वलः।।**[1]

इत्युक्ते सर्गेषु निबद्धं महाकाव्यं लोकवन्द्यनायकाश्रितं, विश्वबन्धुत्वीयं विश्वमाङ्गलिकं च भवेत्। महाकाव्यस्य नायकः कोपि देवः वा प्रजावत्सलः नृपः स्यात् अथवा समुज्ज्वलचरितः वा चारुचर्यः सज्जनः भवेत्। प्रभुदत्त-स्वामी,

डॉ.हरिनारायण-दीक्षितः, डॉ. सत्यव्रत-शास्त्री, सुबोध-चन्द्र-पन्तः, बलदेव-सिंह-मेहरा, प्रभृतयः कवयः स्वीयानि महाकाव्यानि लोकप्रसिद्धानां नायकानामोपरि लिखितवन्तः। अस्य प्रकारस्य आधुनिक महाकाव्यपरम्परायामेव 'दलितोदयः' महाकाव्यमपि आगच्छति। विषयवस्तु वा स्वरूपाधारेण महाकाव्यानां विविधाः प्रकाराः सन्ति। प्रो. राधावल्लभत्रिपाठिनूवर्यैः महाकाव्यस्य पञ्चकोटयः निर्धार्यन्ते। 1. आर्ष-महाकाव्यम् 2. अलंकृत-महाकाव्यम् या विदग्धमहाकाव्यम्, 3. पौराणिक-महाकाव्यम् , 4. ऐतिहासिकं-वा चरित-प्रधान-महाकाव्यम् , 5. शास्त्रकाव्यम्।

यतोहि महाकाव्यस्य स्वरूपं बृहद् भवति। अतः एकस्मिन्नेव महाकाव्ये वयं अनेकान् विषयान् वा शास्त्राणि पश्यामः। प्रत्येकस्य महाकाव्यस्य स्वस्य लोकशास्त्रं, समाजशास्त्रं, दृष्टिकोणं दर्शनञ्च भवति। किमपि महाकाव्यं किमपि एकं शास्त्रं प्रधानेन नीत्वा चलति तथा किमपि अनेकानि शास्त्राणि निधाय चलति। 'दलितोदयः' महाकाव्ये आचारशास्त्रस्य, समाजशास्त्रस्य एवं दर्शनशास्त्रस्य विषयवस्तूनि मुख्यतया दृश्यंते। इदं महाकाव्यं डॉ. हीरालालशुक्लमहाभागेन लिखितम्। प्रकाशनमस्य 1996 तमे वर्षे अभवत्। अस्मिन् विंशतिः सर्गेषु गुरुघासीदासानां जीवनचरितस्य प्रस्तुतिकरणमस्ति। महाकाव्यस्य नायकः दलितपरिवारसम्बद्धः गुरुघासीदासः वर्तते। घासीदासः दलितः अस्ति एवं एतेन कारणेन तस्यप्रवेशः मन्दिरे तथाकथितः श्रेष्ठसमाजः न स्वीकरोति स्म। तं आंग्लजनैः खीष्टधर्माङ्गीकरणस्य प्रलोभनमपि दीयन्ते स्म परञ्च तेनखीष्टधर्माङ्गीकरणं न कृतम्। तस्य सतनाम प्रति अगाधश्रद्धा आसीत्। अतः तेन सतनामजापमेव कृतम्। गुरूघासीदासः संयमी तथा योगाभ्यासी आसीत्। जनान् दुर्व्यसनैरपाकृत्य तान् संस्काराणि अयच्छत्। हिन्दूजनेभ्यः संघे शक्तिः इत्यस्य उपदेशोपि दत्तवान्। घासीदासेन-छत्तीसगढस्य विभिन्नेषु क्षेत्रेषु भ्रमणं कृत्वा समाजास्य धूर्तानां वा शठानां वास्तविकतायाः प्रकाशनं कृत्वा तेषामस्तित्वमेव नष्टंकृतम्। तेन भक्तिमार्गस्यश्रेष्ठता कथयित्वा सतनामस्येव भक्तिः करणीयम् इत्युपदेशः दत्तः। एषामुपदेशः जातिगतभेदभावान् प्रति, अस्पृश्यतां प्रति, अन्धविश्वासान् प्रति आसीत्। महाकाव्ये सत्कर्मं कुर्वन्पुरुषार्थचतुष्टस्य प्राप्तये गुरुघासीदासस्य सन्देशमपि वर्णितमस्ति। तेन मानवधर्ममेव श्रेष्ठं-मत्वा मानवसेवा परमो कर्त्तव्यः इत्यस्योपदेशमपि दत्तम्। संस्कृतकविः प्रायः वेद- उपनिषद्- पुराण-गीता-दर्शनम् इत्यादीनां अध्येता भवति तथा एते ग्रन्थाः दर्शनशास्त्रीयतत्त्वेन

परिपूर्णाः भवन्ति। अत्र महाकाव्यस्य लेखनेकविः वेद-उपनिषद्-पुराण-गीता-दर्शनम् इत्यादीनां ज्ञानं महाकाव्येपि धारयति । 'दलितोदयः'महाकाव्यस्य कविः आधुनिकयुगस्य कविरस्ति । भारतीयदर्शनानां वा पाश्चात्यदर्शनानां ये नवीनाः विचाराः सन्ति, तस्य पार्श्र्वे तेषामपि ज्ञानमस्ति। अतः कविभिः एतेषां सर्वेषां दार्शनिकविचाराणां समन्वयनं कृत्वा महाकाव्यंविरचितम्। भारतीय-परम्परायां कथितं यत् 'दृश्यते अनेन इति दर्शनम्' अर्थात् येन माध्यमेन तत्वदृष्टेः प्राप्तिः भवति सैव भवति दर्शनम्। पाश्चात्यपरम्परायां वेबरः कथयति यत् "Philosophy is the search for a comprehensive view of nature, an attempt at auniversal explanation of things-" इत्युक्तेदर्शनं तु विश्वं वा जीवनं समग्रतायां ज्ञातुं प्रयासः अस्ति। संसारस्य वा जीवनस्य तत्वज्ञानक्रमे अस्माकं जीव-जगत्-ब्रह्म-माया, सगुणः वा निर्गुणः ईश्वरः, प्रत्ययः, जड-चेतनः, द्वैत-अद्वैतः, तटस्थ-निरपेक्षः, एकत्ववादः-अनेकत्ववादः इत्यादिनां शब्दानामपि ज्ञानं भवति। एतेषां दार्शनिकव्याख्या तत् तत् दार्शनिकसम्प्रदायाः कुर्वन्ति। अस्मिन् क्रमे 'दलितोदयः' महाकाव्यं निर्गुणब्रह्मणः तथा सतनामदर्शनस्य पोषकः वर्तते। महाकाव्यनायकः गुरुघासीदासः अस्मान् सतनामदर्शनं ददाति। किन्तु दर्शनमिदं किमपि सर्वथा नवीनं नास्ति। महाकाव्येस्मिन् वेद-उपनिषद्-पुराण-गीतादिनांशंकर-बुद्ध-कबीरादिनां दर्शनानां व्यावहारिकसमवायः वर्तते। प्रायः तु महाकाव्ये अनेकानि दार्शनिकतथ्यानि वर्णितानि सन्ति। तेषु विविधदार्शनिक-तथ्यानां विवेचनम् अग्रलिखितमस्ति।

दलितोदयमहाकाव्ये अस्मान् योग-वेदान्त-बौद्धादीनां दार्शनिकसिद्धान्ताः मुख्यरुपेण दृष्टिपथे आयान्ति।

**योगदर्शनम् -**

योगदर्शनस्य प्रणेता महर्षिः पतञ्जलिः मन्यते। महर्षिपतञ्जलेः योगसूत्रे कथनमस्ति –'योगश्चित्तवृत्तिनिरोधः'[2] ,'तदाद्रष्टुः स्वरूपैवस्थानम्'[3] इत्युक्ते योगः तु चित्तवृत्तेः निरोधःवर्तते। यदा चित्तवृत्तेः निरोधः भवति तदा जीवः केवलं चिन्मात्रे एव तिष्ठति। महाकाव्यनायकः गुरुघासीदासः प्रायः योगदर्शनस्य सिद्धान्ते चलति-सः भक्तये वा ईश्वरप्राप्तये चित्तस्य एकाग्रता तथा इन्द्रियनिग्रहस्योपरि बलं ददाति ।यथा -

**सुदृढ़ं चञ्चलं चित्तं वशीकर्तुं –दृढव्रताः।**
**परमात्मनमाश्रित्य सन्ति सन्तः क्षमा भुवि।।**[4]

इत्युक्ते जनानां चित्तः तु चञ्चलः भवति, परमात्मनि आश्रृत्य अनेकाः क्षमाशीलाः दृढवृत्तिजनाः सन्ताः अस्यां धरायां सन्ति ये तं-चञ्चलं चित्तं बलपूर्वकंस्वकीयवशे कुर्वन्ति। यः तं चित्तवृत्तेः निरोधः न करोति गुरुघासीदासः तं नराधमः उद्घ घोषयति । यथा -

**चित्तवृत्तिनिरोधे येऽसमर्थाश्च नराधमाः।**
**मोहान्धकारे संविग्नाः ते यथाऽम्बुनि वै मलाः।।**[5]

इत्युक्ते यमनुष्याः चित्तवृत्तेः निरोधः न कर्तुं शक्नुवन्ति ते अधमाः एव भवन्ति। मोहान्धकारे स्थित्वा ते जले मलवत् भवन्ति ।

**वेदान्तदर्शनम्**

वेदान्तदर्शने जीवस्य तथा ब्रह्मणः वार्ता आगच्छति। जीवः ब्रह्मं विज्ञाय ब्रह्मवत् भवति वेदान्तदर्शनस्य लक्ष्यम् एवमेव वर्तते। मुण्डकोपनिषदि वाक्यमस्ति ब्रह्मविद् ब्रह्मैव भवति। उपनिषद्महावाक्यैः प्रज्ञानं ब्रह्म[6], तत्त्वमसि[7], अयमात्मा ब्रह्म[8], अहंब्रह्मास्मि[9] इत्यादिभिः ब्रह्मज्ञानविषये कथनं वर्तते। एतावतः तथ्यान् मत्वा कविः हीरालालशुक्लः महाकाव्ये कथयति यत् सर्वोत्कृष्टः सत्यसंकल्पितः परब्रह्म-परमात्मा सर्वेषां हृदये भवति। यथा -

**परमात्मा परं ब्रह्म सर्वेषां हृदये स्थितः**
**स्वानन्दः सत्यसंकल्पः सर्वोत्कृष्टतमो विभुः।।**[10]

इत्युक्ते परब्रह्मपरमात्मा सर्वेषां हृदये तिष्ठति, सः परमात्मा आनन्दरूपः, सत्यसंकल्पितः, सर्वोत्कृष्टः विभुश्च भवति। तस्यैव परमात्मानः सतनाममार्गेण भजयित्वा तद् परमात्मरूप भवतीति एवं गुरुघासीदासः उद्घोषयतियथा -

**परमात्मा परब्रह्म सतनामेन बोधितः।**
**अवतार्यवताराणां परमेश्वर एव सः।।**[11]

इत्युक्ते परब्रह्मपरमात्मा सतनाम नाम्ना सम्बोधितः, सर्वेषामवताराणां देवः सैव परमात्मा एव।

**बौद्धदर्शनम् -**

महात्मा-बुद्धेन मध्यममार्गः इति दार्शनिकसिद्धान्तःदत्तः। कथनमस्ति 'अत्त दीपो भव' स्वस्य ज्योतिः स्वयमेव भव इति। अयं संसारः तु दुःखमयः, वयं

सर्वे सर्वथा सुखी भवितुं वाञ्छामः। तर्हि दुःखेभ्यः निवृत्यर्थं बुद्धैः अष्टाङ्गिकमार्गः इति सिद्धान्तःदत्तः। 1. सम्यग्दृष्टिः 2. सम्यग्सङ्कल्पः 3. सम्यग्वाक् 4. सम्यग्कर्मः 5. सम्यगाजीविका 6. सम्यग्प्रयत्नः 7. सम्यग्स्मृतिः 8. सम्यग्समाधिः। अयम् अष्टाङ्गिकमार्गः व्यवहारिकोस्ति। महाकाव्येस्मिन् गुरुघासीदासस्य दर्शनमपि व्यावहारिकमस्ति। घासीदासः अष्टाङ्गिकमार्गस्य पालनं करोति। घासीदासः महाकाव्ये स्वपरिश्रमेणैव स्वीयस्यव्यक्तित्वस्य निर्माणं-कुरोति। तस्यनिम्वर्गीय-दलितपरिवारे जन्मः अभवत्। किन्तुतस्य तपमनुभूत्वा लोकः तं 'सन्त' इत्युपाधिनासमादृतः। यथा -

**घासीदासाः क्षमाभ्यासं कुर्वन् तेपे महत्तपः।**
**दुःखं नौगणयत्तत्र क्व दुःखेन विना सुखम् ॥**
**तपसा महता तेन लोभं त्यक्तं स्वकर्मणा।**
**शिष्टान्नमप्युपनतं व्यावर्तयदनादरात्।।**[12]

इत्युक्ते घासीदासः क्षमावान्, परिश्रमी, सुखदुःखसमकर्ता, शीलवान्, अपरिग्रही आसीत्। एते सर्वे गुणाः अष्टाङ्गिकमार्गजाः।

**ईश्वरः-**

महाकाव्यैस्मिन् ईश्वरः सर्वव्यापी वर्तते। ईश्वरः सर्वदाता, सर्वनियन्ता अस्ति। ईशप्राप्तिः जात्यबन्धनेन सर्वान् भवितुं शक्नोति। ईश्वरः अत्र परब्रह्मरुपे अस्ति तथा अस्य प्राप्तिर्हेतुः सतनामजपस्य मार्गःकथ्यते। ईश्वरः परमशुभः अस्ति सः सर्वेभ्यः जीवेभ्यः कल्याणकारी वर्तते। कथनमस्ति यत्

**परमात्मा परं ब्रह्म सर्वेषां हृदये स्थितः।**
**स्वानन्दः सत्यसंकल्पः सर्वोत्कृष्टतमो विभुः।।**[13]

परमात्मा परब्रह्मरूपी वर्तते तथा सः सर्वेषां हृदये विराजमानो भवति, परमात्मा परमानन्दः, सत्येन संकल्पितः, सर्वोकृष्टः तथा विभुःअस्ति। 'पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते'।।[14] इति उपनिषत्प्रमाणम्। महाकाव्ये ईश्वरस्य स्वरूपः निराकारः वर्तते। तस्य उपासना निर्गुणरूपे अस्ति। कथनमस्ति यत् ईश्वरः तु ध्यानेन प्राप्यते, ईश्वरः अस्माकंहृदये विराजमानः वर्तते। यथा - **हृदि विराजितदेवसमर्चनं सपदि चेश्वरतां परिरक्षति।**[15]

इत्युक्ते हृदिविराजितदेवस्य साधनया साधकोपि देवस्वरूपः भवति। पुनः कथनमस्ति-

**हृदि विधाय प्रभुं विरजं सदा यदि करोति जनः परिचिन्तनम्।**
**तदिह बोधमुदेति न पूजनात् मम मतिः जगदीशविबोधने।।**[16]

इत्युक्ते ईश्वरं हृदि निधाय यदि व्यक्तिः चिन्तनं करोति तर्हि तं ज्ञानं भवति यत् मम लक्ष्यं ईश्वरस्य न केवलं पूजनं अपितु ध्यानेन तस्य प्राप्तिः। पुनः -

**चेतनश्चिद्रूपस्य सर्वभूतगतः शुचिः।**
**परमात्मा ध्यानगम्योऽस्ति ध्यानं तस्य प्रभं मतम्।।**[17]

इत्युक्ते सः ईश्वरः सर्वेषु प्राणिषु विशुद्धचौतन्यरूपेण वर्तते। सः ध्यानेन सुलभौस्ति तथा तस्य ध्यानंएव प्रधानम्।

**जीवः-**

अस्मिन् महाकाव्ये कविना जीवः ईश्वरस्यांशरेव स्वीक्रीयते। अज्ञानेन जीवः मायया बन्धने भूत्वा विशुद्धात्मरूपं विस्मरति। महाकाव्ये कथनमस्ति यत् जीवः महद्सोभाग्येन मनुष्यदेहं प्राप्नोति। नृरूपमिदं नरकाया मुक्तेः साधनमस्ति, अतः इमं व्यर्थं न कुर्यात्। अनया कायया ईश्वरस्य भजनं कृत्वा ईशमयं भवितव्यम्। यथा -

**अविद्या श्रमतो जन्तु- भ्रमन् बह्वीषु योनिषु।**
**भवाब्धेस्तरणं नौकां मत्कृपा-पवनेरिताम्।।**[18]

इत्युक्ते अज्ञानेन जीवः परिश्रमं कुर्वन् अनेकेषु योनिषु भ्रमति किन्तु भवसागरं तरणाय यन्नौका वर्तते सा तु मत्कृपया (ईश्वरेण/घासीदासेन) एव चलति।

**ततो दुःसङ्गमुत्सृज्य सत्सु सज्जेत बुद्धिमान्।**
**छिन्दन्ति सन्त एतस्य मनोव्यासङ्गमुक्तिभिः।।**[19]

इत्युक्ते मेधाशीलमनुष्यः एवं स्याद्यत् सः कुसङ्गतिं त्यक्त्वा सदगुणं प्रति आसक्तं भवेत्। सन्तजनाः तु लोकानां मनौसक्तिं स्वप्रवचनेन भिद्यन्ते एव। अतः जीवाः आसक्तिं त्यक्त्वा मुक्तिं प्रति गच्छेयुः।

**सतनामदर्शनम् -**

महाकाव्ये सतनामस्य सुमहिमा गीयते। सहैव अत्र सतनाम पन्थरूपेणापि स्थापितम्। गुरुघासीदासस्य दर्शनमेव सतनामदर्शनमस्ति। सत् वा सत्यं एव भगवतः वा परब्रह्मणः नाम कथ्यते। यथा -

**'परमात्मा परब्रह्म सतनामेति बोधितः'**[20]

इत्युक्ते सतं सर्वेषु धर्मेषु श्रेष्ठं-मत्वा सत्पदस्य प्राप्तेः सन्देशः दीयतैत्र। पुनः -

**अहिंसा सत्यमस्तेयं ब्रह्मचर्यं विधाय च**
**परब्रह्मणि विज्ञाय तत्पदं प्राप्नुयान्निजम्।।**[21]

इत्युक्ते अहिंसा, सत्यम्, अस्तेयं तथा ब्रह्मचर्यं विधाय परब्रह्मणि जिज्ञासु भूत्वा तं ज्ञात्वा एव तस्य पदं प्राप्नुयात्। यथा -

**सन्नाम-स्मरणं पुण्यं कीर्तनं पापनाशनम्**
**पूर्वजन्मकृतं पापं मार्गेणानेन नश्यति।।**[22]

इत्युक्ते सन्नामस्य स्मरणेन पुण्यलाभः भवति, कीर्तनेन पापनाशं भवति, पूर्वजन्मस्य यद् पापं भवति सन्नामस्मरणेन भजनेन छिद्यन्ते। सतनामसिद्धान्तः सदाचारी भवितुं, सत्कर्मः कर्तुं तथा ऐन्द्रजालिककर्मपाखण्डः अपाकर्तुं शिक्षां ददाति। सतनामानुयायिनः 'सतनामी' इति कथ्यन्ते। घासीदासावतारः नामके प्रथमे सर्गे हीरालालशुक्लः कथयतियत् -

**यस्य पन्थानमाश्रित्य 'सतनामी' ति मार्गजाः।**
**सत्यं शीलं सदाचारं पालयन्ति वसन्ति च।।**[23]

इत्युक्ते यस्य (गुरुघासीदासस्य) मार्गानुयायिनः सतनामीति कथ्यन्ते तथा एते जनाः सत्यस्य शीलस्य सदाचारस्य च पालनं कुर्वन् वसन्ति।

**कबीरदर्शनम् -**

महात्माकबीरः अपि  व्यावहारिकः दार्शनिकः वर्तते। तस्य मतमस्ति यत् वयं चारित्रिकोन्नतिं कुर्मः तदैव ईश्वरं प्राप्तुं शक्नुमः। महाकाव्यैपि कथमस्ति यद्यपि वयं भजनं कुर्मः, अस्माकं तु उन्नतिः भवत्यैव परञ्च तत्र यदि चारित्रिकी समृद्धिः भवति तर्हि उत्तमं फलं मिलति। यथा - **भजनेन च रामस्य भक्तोन्नतिरहैतुकी। चारित्र्येण समृद्धिः स्याद् तद्भक्तिफलमश्नुते**[24]

सन्तकबीरःतु निराकारब्रह्मणोपासकः वर्तते। अतः तस्य सिद्धान्तं स्वीकृत्य गुरुघासीदासौपि निराकारब्रह्मं सतनामेन भजति। उक्तमपि महाकाव्ये -

**चेतनश्चिद्रूपस्य सर्व-भूतगतः शुचिः। परमात्मा ध्यानगम्योस्ति ध्यानंतस्य प्रभं मतम्**[25]

इत्युक्ते परमात्मायाः स्वरूपः सूक्ष्मचिद्रूपः, सः सर्वेषु भूतेषु तिष्ठति, तस्य नामध्यानेन प्राप्तिर्भवति ।

**निष्कर्षः -**

अस्माकं भारतीयसमाजे अनेकाः दार्शनिकसिद्धान्ताः सन्ति। येन माध्यमेन मानवः अस्मिन् दुःखमये संसारे शान्तेरपेक्षां करोति। किन्तु कतिपयेन तथाकथितवर्गद्वारा धर्मस्य एवं जञ्जालं निर्मितः येन समाजस्य तपस्वीवर्गः अस्पृश्यो अभूत्। अयं वर्गः प्रायः 'दलित' इति नाम्नेव बोधितः। अध्यात्मतः दूरीकृत्य एषः वर्गः हीनताग्रस्तः कृतः। हीनभावनया ग्रस्तः मनुजः पादौ भूत्वापि पङ्गुवदनुभवति। एतेषां हीनभावनां विहाय श्रेष्ठतायाः भावं स्वीकरणस्य श्रेयः दलितोदयमहाकाव्यस्य नायकं परमसन्तं गुरुघासीदासं प्रति गच्छति। महाकाव्यं तु निर्गुणः एवं एकतत्वपवादीरस्ति। महाकाव्यस्य दर्शनं अस्माकं भारतीयज्ञान-परम्परायाः सरली—तरूपमस्ति। येन दर्शनमिदं सर्वसुलभं भवेत्। अत्र दर्शनं समतावादी दर्शनमस्ति। यः कस्यापि दार्शनिकशाखायाः विरोधं न करोति अपितु दलितेभ्यः शोषितेभ्यः आधात्मिकमार्गं प्रशस्यते। येनएनं वर्गमपि आत्मिकशान्तिः प्राप्नुयात्। यतोहि आत्मिकशान्तेरभावे सामाजिकदुर्गुणानां प्रकोपः वर्धते। वस्तुतः महाकाव्यस्य दर्शनं समाजस्य सर्वेभ्यः वर्गेभ्यः उपयोगी वर्तते। अन्ते मम कथनमस्ति यत् गुरुघासीदासानाम्-अस्य दर्शनस्य का आवश्यकता तर्हि चिन्तनीयं अयं-शांतिमन्त्रः -**सर्वेभवन्तु सुखिनः। सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु। मा कश्चित् दुःख भाग्भवेत्।।**[26] डॉ. हीरालालशुक्लमहाभाग : महाकाव्ये लिखति -

**येन वर्णाः सवर्णाः सदा पोषिताः**
**स्वश्रमेणेतरेषां विकासः कृतः।**
**तेन शूद्रेण हीनाः जनाः भारते**
**नैव वर्धिष्णवो नापि लोकोन्नतिः।।**[27]

तर्हि किं करणीयमित्यस्य उत्तरमपि अस्तितैत्तरियोपनिषदि **'यानि अस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि'**[28] इत्यस्य विचारस्य पोषकः वर्तते 'दलितोदयः' महाकाव्यम् ।

**संदर्भ :**


1. *अभिराजयशोभूषणम् , निर्मितितत्त्वोन्मेषः 66, 67*
2. *महर्षिः पतंजलिः ,योगसूत्रम्, सूत्रसंख्या 1*
3. *महर्षिः पतंजलिः ,योगसूत्रम्, सूत्रसंख्या 3*

4. *दलितोदयः , सर्गः- 15.74*

5. *दलितोदयः , सर्गः- 15.79*

6. *ऐतरेय-उपनिषद् - 3.3, ऋग्वेदः*

7. *छान्दोग्य-उपनिषद् - 6.8.7, सामवेदः*

8. *मांडूक्य-उपनिषद् - 1.2, अथर्ववेदः*

9. *बृहदारणयक-उपनिषद् - 1.4.10, यजुर्वेदः*

10. *दलितोदयः, सर्गः- 15.146*

11. *दलितोदयः, सर्गः- 15.147*

12. *दलितोदयः, सर्गः- 7.50*

13. *दलितोदयः, सर्गः- 11.50*

14. *ईशावास्योपनिषद् - शांतिपाठः*

15. *दलितोदयः, सर्गः- 6.9*

16. *दलितोदयः, सर्गः- 6.11*

17. *दलितोदयः, सर्गः- 10.22*

18. *दलितोदयः, सर्गः- 15.94*

19. *दलितोदयः, सर्गः- 15.97*

20. *दलितोदयः, सर्गः- 15.146*

21. *दलितोदयः, सर्गः- 10.33*

22. *दलितोदयः, सर्गः- 15.22*

23. *दलितोदयः, सर्गः- 2.5*

24. *दलितोदयः, सर्गः- 10.21*

25. *दलितोदयः, सर्गः-10.22*

26. *भविष्यपुराणम् ,3.2.35.14, बृहदारण्यकोनिषद् (शान्तिमन्त्रः )*

27. *दलितोदयः, सर्गः- 4.14*

28. *शिक्षावल्ली अनुवाक 11*

●●●

# 20

# भीमायनंमहाकाव्ये छन्दः स्वरूपम्

*मिन्टुमण्डलः*

**छन्दसः स्वरूपम्**

संस्कृतं छन्दःकाव्यस्य प्रमुखं तत्त्वं भवति। एतत् पद्यरचनायाः एकं नियमबद्ध- विधानं वर्तते यः लयबद्धतया तथा मात्रागणनया काव्ये सौन्दर्यं निर्वहति। छन्दः सामान्यतः अक्षरसंख्यायाः, मात्राणां, गुरु-लघुक्रमस्य, यति-विधानस्य च आधारेण परिभाष्यते। छन्दोविचितिः इति एतस्य प्राचीनं नामासीत्। शास्त्रभेदस्य हेतोः एतस्य अनेके नामानि उपलभ्यन्ते, यथा - छन्दोऽनुशासनं , छन्दोविवृत्तिः, छन्दोमानादिः। अतः प्रश्नोऽस्ति, किं छन्दम्? किं तस्य स्वरूपम्? पाणिनीयशिक्षायां आचार्यपाणिनिना उक्तं यत् - **छन्दः पादौ तु वेदस्य।**[1] अर्थात् येनकारणेन पुरुषः गतिशीलः अस्ति, पादाभ्यां विना पुरुषः गतिहीनः तथा पङ्गुः अस्ति, अतः वेदस्य स्थितिः एवमेव। केवलंवेदः न काव्यमपि एवमेव। अनेन कारणेन वेदस्य नाम अपि 'छन्दस्' इति। छन्दः द्विविधः भवति— वैदिकच्छन्दः तथा लौकिकच्छन्दः। एषः वेदेषु प्रयुक्तः यात्रा विशेषः लयः अस्ति, किन्तु निश्चितमात्रा गणना न दृश्यते। वैदिकानां छन्दानां मूलतःसप्तभेदाःसन्ति, यथा -

'गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तिस्त्रिष्टुब्जगत्याख्याः सप्तैव छन्दो जातयो भवन्तीति।'[2] वैदिकः छन्दः केवलं अक्षराधारिताः सन्ति, कात्यायनेन सर्वानुक्रमणीमध्ये छन्दसः स्वरूपम् उक्तं यत् - 'यदक्षरपरिमाणंतच्छन्दः'[3] इति। एतम् लक्षणं अथर्ववेदस्य बृहत्सर्वानुक्रमणी-मध्येऽपिउक्तं - 'छन्दोऽक्षरसंख्यावच्छेदकमुच्यते।' छन्दसः लक्षण विषये निरुक्तस्य दैवतकाण्डे तथा सप्तमाध्यायस्य तृतीयपादे निरुक्तकारःयास्कःलिखति- 'छन्दांसि छादनात्'[4] अर्थात्

आच्छादन हेतुः छन्दः। निरुक्त-भाष्यकारः दुर्गाचार्यः अपिउक्तवान् - नाच्छन्दसिवागुच्चरतीति।[5] अर्थात् छन्दं विनावाक्यम् उच्चारयितुं न शक्यते। छान्दोग्य-उपनिषदि (1/4/2) - ''देवावैमृत्योर्बिभ्यतः त्रयीं विद्यां प्राविशंस्ते छन्दोभिराच्छादयन्। यदेभिराच्छादयन्तच्छन्दसांछन्दस्त्वम्''। पिङ्गलाचार्यस्य 'छन्दः सूत्रम्' इति छन्दशास्त्रे वृत्तिकारहलायुधः वक्ति छन्दसः स्वरूपं - छन्दःशब्देनाक्षरसंख्यावच्छेदोऽत्राभिधीयते।[6] अर्थात् अस्यांवृत्त्यामपि अक्षरसंख्या द्वारा छन्दाः स्वीकृताः सन्ति। आचार्य भरतः (ई.पू.4र्थः शतकम्) संस्कृतस्य प्राचीनः काव्यशास्त्रीति। छन्दःस्वरूपविषये आचार्यभरतः ग्रन्थे अष्टादशतमेऽध्याये उक्तं-

**निबद्धाक्षरसंयुक्तं यतिच्छेदसमन्वितम्। निवद्धं तु पदं ज्ञेयं प्रमाणनियतात्मकम्।।**
**एवंनानार्थसंयुक्तैः पदैर्वर्णविभूषितैः। चतुर्भिस्तु भवेद्युक्तं छन्दोवृत्ताभिधानवत्।।**[7]

अर्थात् यस्यपादः अक्षरक्रमेण निश्चितः भवति, यतिसमन्वितः भवति, संख्यायाः प्रमाणं भवति, वर्णसंयुक्तेन पदरचना भवति तथा चतुस्पादेन विभक्ताः सन्ति, यस्य पादे अनेके अर्थाः संयुक्तरूपेण पदं विभुषितं कृतवन्तः, तत्भरतानुसारेण छन्दसः वृत्तं नाम। आचार्यभरतेन नियताक्षारबन्धां (नियतानिनिश्चितानिअक्षराणियस्मिन्सःबन्धनियताक्षरबन्धः) छन्दःमन्यते।

लौकिकच्छन्दः कालिदासादीनां कवीनां महाकाव्येषु, शतककाव्येषु, नाटकेषु च प्रयुक्तम्ः। तत्र लयबद्धः, मात्रा वृत्तानुसारी च अस्ति। लौकिकच्छन्दः पुनः द्विधा-अक्षरवृत्तम् तथा मात्रावृत्तम्। अक्षरवृत्तम्-यस्य प्रत्येकपादे निश्चितमक्षरसंख्याअस्ति। यथा—अनुष्टुप्, उपजातिः, वंशस्थम्, शार्दूलविक्रीडितम्, स्रग्धराइत्यादयः। मात्रावृत्तम्यस्मिन्मात्रागणना मुख्यं तत्त्वं भवति। यथा कृतोटक, आर्या, गीति, पिङ्गलछन्दः इत्यादयः। छन्दः केवलं पद्यस्य स्वरूपं न, अपितु भावानां उचितं संप्रेषणमपि करोति। रसवृद्धये, काव्यसौन्दर्याय छन्दः अनिवार्यम्।

**छन्दसःव्युत्पत्तिमूलकमर्थः**

'छन्दः' शब्दस्य व्युत्पत्तिःधातुपाठे ''छन्द्'' धातोः इच्छायाम्, आच्छादने च अर्थे प्राप्यते। अस्मात्धातोः ''छन्दः'' इतिशब्दः निष्पन्नः, यस्य मूलं कवित्वस्य नियमनं तथा लयबद्धता अस्ति। छन्दः इति पदं वेदेषु प्राचीनकालात् प्रचलितं, यथा ऋग्वेदस्य पुरुषसूक्ते (10.90) 'छन्दस्' इति शब्दः प्रथमं–दृश्यते - **छन्दांसिजज्ञिरे तस्मात्।**[8] सायणाचार्यस्यभाष्येउक्तं -

**पुरुषस्य पापसम्बन्धं वरयितुमाच्छादकत्वात्छन्द इत्युच्यते।**[9] अर्थात् 'छन्दस्' इतिनाम पापस्य आच्छादनहेतुकं भवति। तच्चारण्यकाण्डे समाम्नायते - 'छादयन्ति हि वा एवं पापात्कर्मणः'इति।(ऐ.आ. २.५)

अथवाचीयमानाग्निसंतापस्याच्छादकत्वाच्छन्दः। तच्चतैत्रिरीय- संहितायां -'प्रजापतिरग्निमचिनुतसक्षुरपविर्भत्वातिष्ठत्तंदेवाबिभ्यतोनोपायन्ते छन्दोभिरात्मानं छादयित्वो पायन्तच्छन्दसां छन्दस्त्वम् 'इति। (तैत्तिरीयसंहिता 5.6.61) यद्वा अपमृत्युं वारयितुमाच्छादयतीति छन्दः। तदपि छान्दोग्योपनिषद्याम्नातं - 'देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशँस्ते छन्दोभिरच्छादयन्यदेभिरच्छादयँस्तच्छन्दसां छन्दस्त्वम्।'(छान्दोग्योपनिषद् 1. 4. 2) 'चन्देरादेश्चछः' (उणादिकोषः 4.220) सूत्रेणचन्द्धातोअसुन्प्रत्ययो भवति, धातोश्चआदेः छकाराऽऽदेशः स्यात्। चन्दति हृष्यति येन दीप्यते वातत्छ्न्दः। छन्द शब्दस्यभिन्नार्थाः अमरकोशेन (3.2.20) प्रदत्ताः - 'विधुरंतुप्रविश्लेषः अभिप्रायश्छन्द आशयः।'

संस्कृत-काव्येछन्दः अतीवमहत्वपूर्णः। छन्दः केवलं पद्याना मात्राणां गणना मात्रं न, अपितु कवित्वस्य सौन्दर्यं, गेयत्वं च अस्मिन्निहितमस्ति। वैदिक छन्दसःगायत्री, त्रिष्टुप्, जगती, अनुष्टुप् इत्यादयः प्रसिद्धाः। कालान्तरात् लौकिककाव्ये अनुष्टुप्, उपजाति, वंशस्थ, शार्दूलविक्रीडित, स्रग्धरा इत्यादीनि विविधानि वृत्तानि विकसितानि। महाकाव्य-नाटक-खण्डकाव्य-शतककाव्यादिषु विभिन्नेषु छन्दसांप्रयोगः दृश्यते। छन्दोऽनुसारेणरसवृद्धिः, भावगौरवं, सङ्गीतात्मकता च प्राप्तं भवति। अतः छन्दः न केवलं काव्यस्य स्वरूपं नियच्छति, अपितु पाठकानां, श्रोतृणांचहृदयंस्पृशति।

**भीमायनमहाकाव्ये छन्दप्रयोगः-**

महाकविःप्रो. प्रभाकर-शंकर-जोशी भीमायनमहाकाव्ये मूलरूपेण उपजाति- अनुष्टुप्- इन्द्रवज्रा- भुजङ्गप्रयात- उपेन्द्रवज्रा- सुन्दरी- आर्यादि छन्दांसां प्रयोगं—कृतवान्। अत्रकवेः प्रियवृत्ति-रूपेण उपजातिवृत्तिं द्रष्टुं शक्नुमः। महाकाव्ये अधिकतया उपजाति- छन्दः प्रयोगं इति दृश्यते। अतः कवेः प्रियवृत्तिरूपेण उपजाति- छन्दःवक्तुं शक्यते। अस्मिन् महाकाव्ये उपजाति- अनुष्टुप्- इन्द्रवज्रा- भुजङ्गप्रयात- उपेन्द्रवज्रा-सुन्दरी-आदि साकेन अन्योऽपि छन्दांसि प्रयुक्तनि सन्ति। यथा-

**उपजाति-छन्दः**

श्रीपिङ्गलाचार्य-विरचितं 'छन्दःशास्त्रम्' इतिग्रन्थे उपजाति-छन्दः विषये उक्तम्- आद्यन्तावुपजातयः।[10] उपजाति- छन्दः विषये केदार-भट्टेन स्वस्य वृत्त रत्नाकरे ग्रन्थेऽपि उक्तम्- अनन्तोरदीरितलक्ष्मभाजौ।। पादौय-दीयावुपजातयस्ताः।।[11] छन्दोमञ्जरीग्रन्थेऽपिगङ्गादासेन उपजाति- छन्दस्य विषये-उक्तम् यदीयौपादौ अनन्तरोदीरितलक्ष्मभाजौताः उपजातयः। इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदेमव नाम।।[12] अर्थात्समवृत्त- श्लोकस्य एकादशाक्षर विशिष्टपादद्वयं वा पूर्वोक्तं इन्द्रवज्रोपेन्द्रवज्रा- लक्षणा श्लोकौ उपजातिः इति उच्यते। उदाहरणम्-

**श्रीपार्वती-शङ्कर-पाद-पद्म-निलीन-चित्तःप्रणमाम्युभौतौ।**
**दयार्द्र-चित्तौ करुणा-घनौ च दीनार्ति-दूरीकरणे प्रसक्तौ।।**[13]
**विनायकंविघ्नहरं गणेशं विद्याधरं सर्व-कला-निदानम्।**
**प्रणम्यदेवंरचयामि काव्यं, भीमायनं दुर्घटमद्भुतंच।।**[14]
**क्रान्त्या श्रयोयोरशिया-प्रजातोमार्क्सानुगानां स च साम्यवादः।**
**हिंसात्मकोद्वेष-रुजादि-मूलो न बन्धु-भावं जनयेत्कदापि।।**[15]

**अनुष्टुप्-छन्दः**

श्रीपिङ्गलाचार्य-विरचिते छन्द शास्त्रम् इति नामक ग्रन्थे अनुष्टुप्-छन्दः विषये लक्षणं उक्तम्- अनुष्टुप्गायत्रैः।[16] अर्थात् 'चतुष्पाद्' इत्यनुवर्तते। गायत्रैरष्टाक्षरैः पादैश्चतुष्पाच्छन्दः 'अनुष्टुप्' संज्ञंभवति। इयं लक्षणं श्रीमन्महाकवि कालिदासप्रणीतःश्रुतवोधे - श्लोके षष्ठंगुरु ज्ञेयं सर्वत्र लघु पञ्चमम्। द्विचतुः पादयोर्ह्स्वं सप्तमं दीर्घमन्ययोः।।[17] पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः। षष्ठं गुरु विजानीयादेतत्पद्यस्य लक्षणम्।।[18] अर्थात् वृत्ते सर्वेषु चरणेषु पञ्चममक्षरं लघु भवति, षष्ठमक्षरं गुरु भवति, द्वितीय-चरणयोः सप्तममक्षरं लघु भवति, प्रथम-तृतीय चरणयोश्च सप्तममक्षरं गुरु भवति, शेषेषु वर्णेषु लघुत्वगुरुत्वयोर्नियमो-नास्ति, इदमेव अष्टाक्षरात्मकं पद्यं श्लोकश्चेति कथ्यते। उदाहरणम्-

**रूढि-शृङ्खलयाबद्धं समाजं वर्ण-भेदतः।**
**परावर्तयितुं नासन्समर्थारूढि-भञ्जकाः।।**[19]
**प्रबोधकोऽन्त्यजातीनां स्वत्वं तेषु विनिर्ममौ।**
**सोऽभूद्वर्तुल-पीठस्यसदस्योऽन्त्यज-भद्र-कृत्।।**[20]

**इन्द्रवज्रा-छन्दः**

श्रीपिङ्गलाचार्य-विरचितं छन्दःशास्त्रम् इति ग्रन्थे इन्द्रवज्रा-छन्दः विषये उक्तम्- इन्द्रवज्रा तौ जगौगः।[21] अर्थात् यस्यपादेतकारौजकारगकारौश्च, तदुक्तं इन्द्रवज्राणाम्। एतत् लक्षणं वृत्त-रत्नाकर-छन्दोमञ्जरी-ग्रन्थे उक्तं यथा- स्यादिन्द्र वज्रा यदि तौ जगौ गः।[22] अर्थात् यस्य पादे त-गण,कृत-गण, ज-गण, गुरुद्वयं भवन्ति सा इन्द्रवज्रा। उदाहरणम्-

**कोलम्बिया-नामक-विश्वविद्या-पीठेवसँश्छात्र-गृहे च भीमः।**
**तत्रत्य-वातावरणेन सोऽभूद्विस्मापितोबन्ध-विमोचितश्च।।**[23]

**भुजङ्गप्रयातं-छन्दः**

श्रीपिङ्गलाचार्य- विरचितं छन्दःशास्त्रम् इति ग्रन्थे भुजङ्गप्रयात-छन्दः विषये उक्तम्- भुजङ्गप्रयातंयः।[24] अर्थात् यस्यपादेचत्वारोयगणा भवन्ति तद् 'भुजङ्गप्रयातं' नाम। एतत् लक्षणं वृत्त-रत्नाकरे उक्तं - भुजङ्गप्रयातं- भवेद्यैश्चतुर्भिः।[25] छन्दोमञ्जरी ग्रन्थेऽपि उक्तं यथा- भुजङ्गप्रयातं चतुर्भिर्यकारैः।[26] अर्थात् यमातायमातायमातायमातागण क्रमेणचलतिच्छन्दोऽयम्। उदाहरणम् -

**तदाऽऽदायवित्तंवडोद्रा-नरेशाद्व्यवस्थांच—कृत्वाकुटुम्बव्ययस्य।**
**कुटुम्बस्यभारंसविन्यस्य पत्न्यां विदेशं प्रयातुं प्रतस्थे सखेदम्।।**[27]
**रुवंध्येय-पूर्तिर्भवेदित्यमंस्तसमोदस्यकाष्ठामसीमां जगाम।**
**तदाखेद-मोद-द्वयस्यापिसोऽभूद्अपूर्वसमं भाजनंचैककाले।।**[28]

**यदाबाल-भीमःप्रसूंस्वामपृच्छत्**
**''किमर्थवयं पीडिताः स्मः सवर्णैः**
**—तं किं नु पापम्?'' तदासाऽवदत्तम्**
**''फलंसंचितस्यास्मदीयस्य नूनम्।।''**[29]

**उपेन्द्रवज्रा-छन्दः**

श्रीपिङ्गलाचार्य-विरचितं छन्दःशास्त्रम इति ग्रन्थे उपेन्द्रवज्रा- छन्दःविषये उक्तम् -उपेन्द्रवज्राजतौजगौगः।[30] अर्थात् यस्यपादेजकारतकारजकारगकारौ च, तदुक्तम् 'उपेन्द्रवज्रा' नाम। एतत् लक्षणं वृत्त-रत्नाकरे उक्तं -उपेन्द्र वज्राजतजास्ततोगौ।[31] छन्दोमञ्जरीग्रन्थेऽपि उक्तं यथा-उपेन्द्रवज्रा प्रथमे लघौ सा।[32] उदाहरणम्

**महात्मगान्धीप्रमुखाः सदस्याः प्रतस्थिरेलण्डनतः स्वदेशम्।**
**द्वितीय-सत्रंसफलंनभूतम् अतः सदस्यानसमाहितास्ते।।[33]**
**रमाहिभैमाअसवोबहिस्थाः कुटुम्बभारं वहति स्म नित्यम्।**
**चिकित्सितासाप्रथितैर्भिषग्भिस्तथापि नैव प्रकृतिं जगाम।।[34]**

**वसन्ततिलका-छन्दः**

श्रीपिङ्गलाचार्य-विरचितं छन्दःशास्त्रम् इति ग्रन्थे वसन्ततिलका-छन्दः विषयेउक्तम्-वसन्ततिलकातभौजौगौ।[35] अर्थात् यस्य पादे तगणभगणौ जगणौगकारौ च तदुक्तं 'वसन्ततिलका' नाम। एतत् लक्षणं वृत्त-रत्नाकरे उक्तं -

उक्तावसन्ततिलका तभजाजगौगः।[36] छन्दोमञ्जरी ग्रन्थेऽपि उक्तं यथा- ज्ञेयं वसन्ततिलकं तभजाजगौगः।[37] अर्थात् प्रायः अनुरूपं संज्ञासर्वैः उक्तम्। उदाहरणम्-

**नूनंविभक्त-मतदातृ-गणैश्चिताः स्युः**
**प्रत्याशिनोऽन्त्यज-समाज-गताधुरीणाः।**
**इत्थं विचिन्त्यमुदितः खलु भीमरायस्-**
**तांयोजनामभिनवाम् अपिसोऽन्वमंस्त।।[38]**

**सुन्दरी-छन्दः**

छन्दोमञ्जरी इति ग्रन्थे सुन्दरी-छन्दः विषये उक्तं यथा - अयुजोर्यदिसौ जगौयुजोः सभरालगौयदिसुन्दरीतदा।[39] अर्थात् यस्य प्रथम- तृतीय पादौसगणौ जगणगकारः भवन्ति, द्वितीय-चतुर्थपादयोसगणभगणरगण लकारगकारः भवन्ति तत्सुन्दरीनाम। उदाहरणम्

**गृहिणीपर-दुःख-नाशिनीपति-निष्ठासह-धर्मचारिणी।**
**गृह-कर्म-परायणारमाविदधौस्वीय-कुटुम्ब-पोषणम्।।[40]**
**अथकार्य-वशाद्रमा-पतिःपर-देशंपुनरप्यगाद्यदा।**
**श्वशुरेचदिवंगतेरमाविसहायाऽपिपुपोषबालकान्।।[41]**

**आर्या-छन्दः**

आर्यायाःप्रथमं लक्षणप्रयोजनमुक्तं वृत्तमणिकोशो- घटिकासहस्त्रयुग्भिः शिवोजगौपञ्चभिर्मुखैरार्याम्। त्र्यब्दान्द्वादशदिवसान्षोडश घटिकाश्चनिर्निद्रः।। आर्याद्बोधः कठिनो ज्ञातुं व्यक्ता निवर्ण-वृत्तानि। आदौ सलक्षणममूंतानिचपरतः

तल्लक्षणं ब्रूमः ।।[42] श्रीपिङ्गलाचार्य- विरचितं छन्दः शास्त्रम् इति ग्रन्थे आर्या-छन्दः विषयेलक्षणे उक्तम्-स्वराअर्धंचार्यार्धम् ।[43] एतत् लक्षणं श्रुतबोधे उक्तं यथा-

**यस्याःपादे प्रथमे द्वादशमात्रास्तथातृतीयेऽपि ।**
**अष्टादशद्वितीये चतुर्थके पञ्चदशासाऽऽर्या ।।**[44]

यस्याः प्रथमे पादे द्वादशमात्राः स्युः । तृतीये तथा द्वादशमात्रा भवन्ति । द्वितीयेऽष्टादशमात्रा भवन्ति । चतुर्थके पञ्चदशमात्रा भवन्ति । साआर्या । छन्दो मञ्जरी इतिग्रन्थे आर्या-छन्दः विषये उक्तं यथा- लक्ष्मैतत्सप्तगणागोपेता भवति नेहविषमेजः । षष्ठो यश्च न लघु वा प्रथमेऽर्द्धेनियतमार्यायाः ।। षष्ठे द्वितीयलात्परकेन्लेमुखलाञ्चसयतिपदनियमः । चरमेऽर्ध्वे पञ्चमके तस्मादिह भवति षष्ठोलः ।।[45] उदाहरणम्-

**सायंपरेद्युरेवाऽऽगन्तामित्रैः सहैवतत्राऽहम् ।**
**वितरामिधन्यवादान् निवेदितास्तेनविश्वस्ताः ।।**[46]
**पण्डित - नेहरुणाऽऽदौघटनायाहेतवश्चसाध्यानि ।**
**प्रस्तावितानिसम्यक्सुबोधयाहृद्ययावाचा ।।**[47]

**प्रथमः सर्गः** 1-44 उपजातिः, 45-47 अनुष्टुप् , 48 उपजातिः ।

**द्वितीयःसर्गः** 1-66 अनुष्टुप्, 67 उपजातिः, 68 वंशस्थम्, 69-70 उपजातिः, 71 वंशस्थ, उपेन्द्रवज्रा, 72-91 उपजातिः, 82 भुजङ्गप्रयातः ।

**तृतीयः सर्गः** 1-43 उपजातिः, 44-46अनुष्टुप्, 47 भुजङ्गप्रयातः ।

**चतुर्थः सर्गः** 1-78 उपजातिः, 79-81 अनुष्टुप्, 82 मालिनी ।

**पञ्चमः सर्गः** 1-69 उपजातिः, 70-71 भुजङ्गप्रयात, 72 वसन्ततिलकम् ।

**षष्ठः सर्गः** 1-68 इन्द्रवज्रा, 69 अनुष्टुप्, 70 मालिनी ।

**सप्तमः सर्गः** 1-69 अनुष्टुप्, 70 उपेन्द्रवज्रा, 71 उपजातिः, 72-73 भुजङ्गप्रयातः, 74 वसन्ततिलकम् ।

**अष्टमः सर्गः** 1-60 अनुष्टुप्, 61-62 उपजातिः, 63 स्त्रग्धरा ।

**नवमः सर्गः** 1-38 उपजातिः, 39 आर्या, 40-65 उपजातिः, 66-69 अनुष्टुप्, 70 भुजङ्गप्रयातः, 71 वसन्ततिलकम् ।

**दशमः सर्गः** 1-62 उपजातिः, 63-64 आर्या, 65 वसन्ततिलकम् ।

**एकादशः सर्गः** 1-60 उपजातिः, 61-62अनुष्टुप्, 63 भुजङ्गप्रयात, 64 वसन्ततिलकम् ।

**द्वादशः सर्गः** 1-21 आर्या, 22-23 उद्गाथा/गीतिः, 24-71 आर्या, 72 अनुष्टुप्, 73 उपजातिः, 74 भुजङ्गप्रयातः।

**त्रयोदशःसर्गः** 1-9 इन्द्रवज्रा, 10 उपजातिः, 11-33 इन्द्रवज्रा, 34 उपजातिः, 35-36 इन्द्रवज्रा, 37-38 उपजातिः, 39-40 इन्द्रवज्रा, 41 उपजातिः, 43-44 उपजातिः, 45-48 इन्द्रवज्रा, 49उपजातिः, 50 इन्द्रवज्रा, 51 उपजातिः, 52-53 इन्द्रवज्रा, 54 उपजातिः, 55-64 इन्द्रवज्रा, 65उपजातिः, 66-78 इन्द्रवज्रा, 79-80 उपजातिः, 81-85 इन्द्रवज्रा, 86-88 उपजातिः, 89-90 इन्द्रवज्रा, 91-93 उपजातिः, 94 इन्द्रवज्रा, 95 भुजङ्गप्रयातः, 96 उपेन्द्रवज्रा, 97 उपजातिः, 98-99 इन्द्रवज्रा, 100-102 अनुष्टुप्, 103 उपजातिः 104-105 भुजङ्गप्रयात।

**चतुर्दशः सर्गः** 1-52 इन्द्रवज्रा, 53 उपजातिः, 54-56 इन्द्रवज्रा, 57 भुजङ्गप्रयातः, 58-59 वसन्ततिलकम्, 60-61 उपजातिः।

**पञ्चदशःसर्गः** 1-49 सुन्दरी, 50-51 उपेन्द्रवज्रा, 52-53 उपजातिः, 54 भुजङ्गप्रयातः, 55 वसन्ततिलकम्, 56 उपजातिः।

**षोडशःसर्गः** 1-70 अनुष्टुप्, 71-72 उपजातिः, 73 भुजङ्गप्रयातः, 74 वसन्ततिलकम्।

**सप्तदशःसर्गः** 1-85 भुजङ्गप्रयातः, 86-87 अनुष्टुप्, 88 उपजातिः, 89 मालिनी।

**अष्टादशःसर्गः** 1-122 आर्या, 123 उपजातिः, 124 भुजङ्गप्रयातः।

**एकोनविंशःसर्गः** 1-73 उपेन्द्रवज्रा, 74-76 अनुष्टुप्, 77 भुजङ्गप्रयातः।

**विंशःसर्गः** 1-63 भुजङ्गप्रयातः, 64-67 अनुष्टुप्, 68-70 उपजातिः।

**एकविंशःसर्गः** 1-94 उपजातिः, 95-104 अनुष्टुप्, 105 आर्या, 106 भुजङ्गप्रयातः, 107 वसन्ततिलकम्, 108 स्त्रग्धरा, 109 उपजाति।

प्रकथित-काव्यपरम्परानुसारं महाकविः प्रभाशङ्कर जोशी भीमायन महाकाव्ये-प्रतिसर्गं न केवलं एकावृत्त्या प्रयुक्तवान्, अपितु सर्गान्ते वृत्त-परिवर्तनमपि कृतवान्। अत्र कवेः प्रियवृत्तरूपेण उपजातिवृत्तं द्रष्टुं शक्नुमः, यतोहि अस्मिन् महाकाव्ये उपजातिवृत्तं सर्वाधिकं प्रयुक्तम्। महाकाव्यस्य प्रत्येकसर्गे कतिपय स्थलेषु वृत्तिपरिवर्तनं कृतमस्ति। अतः ज्ञायते यत् कविः वृत्तयोजनायां निपुणः। छन्दः शास्त्रस्य नियमानुसारं कविना सम्यक्पालनं कृतम्। महाकाव्यस्य प्रत्येकं पद्यं छन्दः

संवेष्टितं सौन्दर्ययुक्तं जातम्। कवेः वृत्तयोजना महाकाव्य-परम्परानुसारं रसानुकूलं विषयसंगतं च दृश्यते। महाकाव्यस्य प्रत्येकः सर्गः छन्दोबद्धत्वात् कवेः काव्यशक्तिरेकस्मिन् प्रकाशते। यत् संस्कृत महाकाव्यं अधिकं माधुर्ययुक्तं करोति। अत्र प्रयुक्तानि सर्वाणि वृत्तानि महाकाव्यस्य सहायकानि सिद्धानि।

**सन्दर्भः -**


1. *पाणिनीयशिक्षा - श्रीअशोककुमारवन्द्योपाध्याय, श्लोक-41, पृ. 15*
2. *छन्दः शास्त्रम्, पृ. 1*
3. *कात्यायनः, ऋक्सर्वानुक्रमणी 2/7*
4. *निरुक्तम् - मुकुन्दझाशर्मणा, सप्तमाध्याय, तृतीयपाद, पृ. 364*
5. *निरुक्तम् - मुकुन्दझाशर्मणा, सप्तमाध्याय, तृतीयपाद, पृ. 364*
6. *छन्दः शास्त्रम्, पृ. 7*
7. *नाट्यशास्त्रम् , 18/53-54, पृ. 291-292*
8. *ऋग्वेदस्यपुरुषसूक्त , मन्त्र - 9*
9. *सायनभाष्य, ऋग्वेद 1.1.1 , प्रस्तावना, पृ. 32*
10. *छन्दःशास्त्रम् 6/17, पृ. 119*
11. *वृत्तरत्नाकरः 3/30, पृ. 77*
12. *छन्दोमञ्जरी -डॉ. अनिलचन्द्रबसु 2/43 , पृ. 59*
13. *भीमायनम् 1/1, उपजाति, पृ. 1*
14. *भीमायनम् 1/2, उपजाति, पृ. 1*
15. *भीमायनम् 21/5, उपजाति, पृ. 152*
16. *छन्दःशास्त्रम् 3/23, पृ. 18*
17. *श्रुतवोधश्लोक- 10, पृ. 7*
18. *श्रुतवोधश्लोक- 11, पृ. 7*
19. *भीमायनम् 1/45, अनुष्टुप् , पृ. 6*
20. *भीमायनम् 21/104, अनुष्टुप, पृ. 160*
21. *छन्दः शास्त्रम् 6/15, पृ. 116*
22. *वृत्तरत्नाकरः 3/28, पृ. 76य छन्दोमञ्जरी -डॉ. अनिलचन्द्रबसु 2/41, पृ. 56*

*23. भीमायनम् 6/1, इन्द्रवज्रा, पृ. 33*
*24. छन्दः शास्त्रम् 6/37, पृ. 141*
*25. वृत्तरत्नाकरः 3/55, पृ. 93*
*26. छन्दोमञ्जरी -डॉ. अनिलचन्द्रबस 2/69, पृ. 79*
*27. भीमायनम् 5/70, भुजङ्गप्रयात्, पृ. 32*
*28. भीमायनम् 5/71, भुजङ्गप्रयात्, पृ. 32*
*29. भीमायनम् 20/3, भुजङ्गङ्कयात, पृ. 142*
*30. छन्दःशास्त्रम् 3/16, पृ. 118*
*31. वृत्तरत्नाकरः 3/29 पृ. 77*
*32. छन्दोमञ्जरी -डॉ. अनिलचन्द्रबसु 2/42, पृ. 58*
*33. भीमायनम् 13/96, उपेन्द्रवज्रा, पृ. 88*
*34. भीमायनम् 19/1, उपेन्द्रवज्रा, पृ. 135*
*35. छन्दःशास्त्रम् 7/8, पृ. 150*
*36. वृत्तरत्नाकरः 3/79, पृ. 103*
*37. छन्दोमञ्जरी -डॉ. अनिलचन्द्रबस 2/112, पृ. 105*
*38. भीमायनम् 14/58, वसन्ततिलक, पृ.*
*39. छन्दोमञ्जरी -डॉ. अनिलचन्द्रबसु 3/6, पृ. 188*
*40. भीमायनम् 15/1, सुन्दरी, पृ. 97*
*41. भीमायनम् 15/2, सुन्दरी, पृ. 97*
*42. वृत्तमणिकोशवि. 3, श्लोक 1-2*
*43. छन्दःशास्त्रम् 4/14, पृ. 47*
*44. श्रुतवोधश्लोक-4, पृ. 3*
*45. छन्दोमञ्जरी -डॉ. अनिलचन्द्रबसु 6/1-2, पृ. 212*
*46. भीमायनम् 12/4, आर्या, पृ. 72*
*47. भीमायनम् 18/3, आर्या, पृ. 124*

●●●

# 21

## प्राचीनस्य तालविज्ञानस्य विश्लेषणम्

*आकाशः जैनः*

यथाभारतीयसंगीतशास्त्रस्य इतिहासः अतीव प्राचीनः अस्ति, तथैव भारतीयतालशास्त्रस्यापि इतिहासः अतीव प्राचीनः अस्ति। येषाम् उल्लेखान् वयम् वैदिकसाहित्ये अपि प्राप्नुयामः। वैदिकसाहित्यात् अतिरिक्तं लौकिकसाहित्ये, रामायणादिषु अपि तालशास्त्रस्य सन्दर्भाः दृश्यन्ते। संगीतविषयकाणां सर्वेषां ग्रन्थानां प्रायः सर्वेषु तालविषयक एकः अध्यायः लभ्यते, तेन प्रमाणं लभ्यते यत् भारतवर्षे तालस्य च तालशास्त्रस्य च अध्ययनं प्राचीनकालात् एव व्यापकस्तरेण जातम्। तालशास्त्रस्य अध्ययनं संगीतशास्त्रस्य शाखारूपेण सदा जातम्। किन्तु तालशास्त्रं स्वयमेव अत्यन्तं विस्तीर्णं गभीरं च शास्त्रम् अस्ति, येन तस्य स्वतंत्ररूपेण अध्ययनम् अपेक्षितम्। अस्मिन् इह भारतीयतालशास्त्रस्य ऐतिहासिकत्वं प्रकाश्यते।

तालशास्त्रस्य अवधारणा परिकल्पना च समग्रं विश्वं प्रति भारतस्य एव योगदानं वर्तते। यद्यपि एतन्नास्ति यत् पाश्चात्यदेशेषु अन्येषु  देशेषु च तालाः न सन्ति, तत्र पर्याप्तमात्राषु तालाः सन्ति, तथापि भारतीयतालशास्त्रवत् तेषां तालानां साहित्यं न विद्यते। भारतीयतालशास्त्रस्य इतिहासः संगीतशास्त्रवत् अतीव प्राचीनः अस्ति। मानवजीवनस्य इतिहासे प्रथमे चरणे यः पाषाणकालः सभ्यता च यत्र उत्पन्नाः, तस्मिन् काले विविधानाम् चर्माच्छादितवाद्यानांः निर्माणमभूत्, परंतु तस्मिन् समये भाषायाः विकासः न जातः। अवनद्यवाद्यस्य घनवाद्यस्य च आधारे वयं अनुमानं कर्तुं शक्नुमः यत् मानवमात्रेण तालज्ञानं सृष्टेः प्रथमे चरण एव लब्धम्, परंतु तस्य प्रमाणं सन्दर्भः वा अस्माकं पुरतः न विद्यते।

अत्र 'ताल' इत्यस्य शब्दस्य विचारः समीचीनः स्यात्। अत्र निदर्शनीयम् यत् प्राचीनमध्ययुगीनसंगीतग्रन्थेषु 'तालशास्त्र' इत्यस्य शब्दस्य प्रयोगः न दृष्टः। 'ताल' इत्यस्य शब्दस्य निरुक्तिः संस्कृतव्याकरणे 'तल' धातोः विवक्षितः। 'तल' धातौ 'घञ्' प्रत्ययस्य योगेन 'ताल' इति शब्दः सञ्जायते। 'तल' धातुं प्रति 'घञ्' प्रत्ययस्य योगात् सर्वेषु ग्रन्थेषु सामान्यतः 'ताल' इति शब्दस्यैव निरुक्तिः स्वीक्रिय। वयं अत्र 'ताल' इत्यस्य शाब्दिकनिरुक्त्याः त्रीन्ः सन्दर्भानुदाहरणरूपेण प्रस्तुमः। यथाः-

**''तालस्तलप्रतिष्ठायामिति धातोर्धञ्ि स्मृतः।**
**गीतं वाद्यं तथा नृत्तं यतस्ताले प्रतिष्ठितम्''**[1]
**''ताल शब्दस्य निष्पत्तिः प्रतिष्ठार्थेन धातुना।**
**स तालः कालमानं यत् क्रियया परिकल्पितम्''**[2]
**''तालशब्दस्य निष्पत्तिः प्रतिष्ठार्थेन धातुना।**
**गीतं वाद्यं च नृत्यं च भाति ताले प्रतिष्ठिम्''**[3]

उपर्युक्तसन्दर्भेभ्यः सिद्धं भवति यत् 'ताल' शब्दे 'तल' धातोः 'घञ्' प्रत्ययः अस्ति। 'तल' धातुः प्रतिष्ठायाम् अस्ति। 'तल' शब्दस्य सामान्यार्थः आधारदाने इत्यस्ति। यथा आञ्जनेयेन हनुमता गिरिराजद्रोणं हस्तेनोत्क्षिप्य आधारः दत्तः, हस्ते पर्वतः प्रतिष्ठापितः। अतः तं 'हस्ततल' इति कथ्यते। हस्ततलम् इत्युच्यते यतः सः हस्तः स्वयम् भारं वहन् पर्वतं प्रतिष्ठापयति।

पादयोः अङ्गुल्यः यत्र सः 'तलवा' इत्युच्यते, एवं च 'पदतल' इत्यपि कथ्यते। 'तलवा' च 'पदतल' च इत्युक्ते कारणं यत् एते सर्वे शरीरभारस्य धारकाः भवन्ति, शरीरस्य आधाररूपेण प्रतिष्ठां कुर्वन्ति। भूमये अपि 'भूतल' इति संज्ञा प्रयुज्यते, यतः सा सर्वेषां चराचराणां जीवानां भारं स्वयम् धृत्वा तेषां प्रतिष्ठां करोति, आधारं ददाति। एवं 'तल' इति शब्दः प्रतिष्ठायाम्। प्रतिष्ठा आधारः च।

यथा 'पदतल' शरीरस्य प्रतिष्ठां करोति, 'भूतल' चराचराणां प्रतिष्ठां करोति, तथैव 'ताल' शब्दे 'तल' धातोः अभिप्रायः अस्ति यत् 'तालः' संगीते गायने, वादने, नृत्ये च आधाररूपेण प्रतिष्ठां करोति। तालः गायनवाद्यनृत्यानाम् आधारः, भारधारकःश्च। तालः संगीतस्य आत्मा इति। तालं विना संगीतं शून्यं, अरण्यसंगीतम् शब्द इव भवति। तालस्य विभिन्नेषु ग्रन्थेषु विविधा परिभाषाः दत्ताः सन्ति।

नाट्यशास्त्रप्रणेता आचार्यभरतेन प्रथमं काललक्षणं यथाऽनुपदिष्टम्

**''तालो (वाद्यन्तु यद्) घनं इति प्रोक्तं ,(प्रोक्ता)**

**कला-पात लयन्वितं**

**कलास्तस्य प्रमाणं वै (हि) विज्ञेयं**

**तालयोक्तृभिः (तालयोगतः)''[4]**

अर्थात् कला (सशब्दादि क्रियाः लघ्वादिमात्राः), पातः (सशब्दक्रिया) च लयेन सहितं यत् घनवाद्यम् उच्यते, तस्य प्रमाणं काल एव। अथवा स एव कालः, यत्र तालेन सह योगः अस्ति। अथवा कला-पात-लयसहितं यत् घनवाद्यम्, तस्य प्रमाणरूपेण कालः अस्ति, तत् 'ताल' इत्युच्यते।

उक्तलक्षणेन स्पष्टं यत् भरतकाले घनवाद्येनैव तालस्य निर्वहनं क्रियते स्म।

**दत्तिलस्य मतानुसारं -**

**''तालात् साभ्यं भवेत् साम्यादिह सिद्धीः परत्र च।**

**तत्र ज्ञेयाःकलाः पाताः पादभागास्तथैव च ''[5]**

दत्तिलग्रन्थस्य अनन्तरं मतङ्गमुनिना बृहत्देशी-नामकग्रन्थस्य प्रणयनं कृतम्। दुर्भाग्यवशात् अस्य ग्रन्थस्य तालशास्त्रम् अद्यपर्यन्तं अप्राप्तम् अस्ति। संगीत मकरन्दकारेण तु तालस्य लक्षणं न प्रदत्तम् किन्तु एकाधिकं शतम् एकम् काललक्षणानां वर्णनं निश्चितं कृतम्। पंचमार्गतालान् शिवस्य श्रीमुखात् उत्पन्नाः इत्यपि उक्तम्। विशेषतः तालस्य दश-प्राणानां निरूपणम् अपि प्रथमं अस्मिन्नेव ग्रन्थे कृतम्।

**''सदाशिवमुखोदृभूतास्तालाः पंचविधा स्मृताः''[6]**

महाराजसोमेश्वरः मानसोल्लासनामकं ग्रन्थे काललक्षणं वा परिभाषां न प्रतिपादयति, तथापि सः ग्रन्थः तालविषये विलक्षणः अस्ति। महाराजस्य सोमेश्वरस्य एतत्कथनम् अस्ति-

**''तालमानप्रगल्भेश्च श्रेष्ठस्तालधरः स्मृतः।**

**न तालेन बिना गीतं न वाद्यं तालवर्जितम्''[7]**

संगीतचूड़ामणिग्रन्थस्य प्रणयनकर्ता कविः चक्रवर्ती जगदेकमल्लः काललक्षणं प्रतिपादयन् एवं लिखति यत् -

**''तालः कालस्य यन्मानं मापा-(मात्राजं) हि क्रिया कृतम्''[8]**

आचार्येण अभिनवगुप्तेन नाट्यशास्त्रटीकायाम् उक्तम्

''इत्यत्र क्रिया च ताल कालो वा। ताल इत्याक्षित्य गांधर्वनाट्यभेदेन यो विषय विभाग त स तुच्छ इत्यस्मञ्यं न रोचते। यद् धनं नाम वाद्योमातोद्य प्रोक्तमुद्दिष्टं तस्य तालेन भवनाशम्यादिशस्दावापनि, शब्दक्रियाविशेषणस्य योगेन सति यस्ताल (कालः) परिच्छित्यात्मक कालखंडे क्रियारूपो द्रव्यात्मा स एव गीतक्रियाप्रमाण परिच्छेदोपायः''[9]

अर्थात् सशब्दनिः शब्दक्रियायोगेन निर्मितः यः तालः कालस्य विभागकः, क्रियारूपः च, द्रव्यात्मा च अस्ति, स एव गीतक्रियायाः मापनसाधनं भवति। अस्य व्याख्यानस्य अनुसारं तालस्य क्रियायाः महान् महत्वं विद्यते। तस्य कारणम् अस्ति यत् क्रियांविना कालज्ञानं न सम्भवति।

आचार्येण शार्ङ्गदेवेन उक्तं काललक्षणम्-

**''कालो लध्वादिमितया क्रियया संमितो मितम्**
**गीतार्दि धित्तालः स च द्वेधा बुधैः स्मृतः''**[10]

अर्थात् लघुगुर्वादिएककैरपि नीतः, सशब्दनिःशब्दक्रियाभिः संसीमितः, गीतादीनां मापनं विशेषेण कुर्वन् यः कालखण्डः स एव ताल इत्युच्यते। यावत् निरूपितेषु काललक्षणेषु एतल्लक्षणं सर्वेभ्यः सुलभतरं च सटीकतरं च अस्ति। एतत् लक्षणं न केवलं सुलभं सहजं च, अपि तु स्पष्टं सुसंगतं च अस्ति। सङ्गीतवर्ण्यविषयाणां लक्षणेषु यः सौलभ्यमयः गुणः दृश्यते, स आचार्यशार्ङ्गदेवस्य अद्वितीयः स्वभावगुणः इति वक्तुं युक्तम्।

आचार्येण पार्श्वदेवेन संगीतसमयसारे यथोक्तम्-

**''गीतं वाद्यं च नृत्तं च यतस्ताले विराजते ,**
**स तालः कालमानं यत् क्रियया परिकलिप्तम्''**[11]

अर्थात् गीतवाद्यनृत्यरूपाणि त्रयमपि ताले एव विराजते। क्रियया परिकल्पितः कालमानः तालः इत्युच्यते। संगीतसमयसारग्रन्थानन्तरं ये परवर्तिनः ग्रन्थाः दृश्यन्ते, तेषां तालविषये यानि लक्षणानि निर्दिष्टानि, तानि एतेभ्यः लक्षणेभ्यः स दृशानीव दृश्यन्ते।

उदाहरणत्वेन चतुर्दशशतके विरचिते ग्रन्थे संगीतोपनिषत्सारोद्धारे निर्दिष्टं काललक्षणं पश्यतु।-

**''कालमानंकरस्तालश्चतुर्था स द्रुतादिभिः।**
**द्रुतो लघुर्गुरुश्चैव प्लुतः संज्ञाथ तद्भवा''**[12]

अर्थात् कालस्य परिमेयः यः तालः, स द्रुतादिविभेदेन चतुर्धा विभज्यते। एवं सर्वेषु संगीतशास्त्रीयलक्षणग्रन्थेषु तालं प्रतिष्ठानमापनयोः दृष्ट्या एव निरीक्ष्यते।

वयं विभिन्नमतमतान्तरैः तालस्य लक्षणं स्वरूपं च ज्ञातवन्तः। एषु सर्वेषु मतेषु तालस्य सम्बन्धः प्रमाणेन वा मापनेन सह एकरूपतया दृष्टिगोचरः जातः। समस्तलक्षणपरिभाषाणाम् अध्ययनानन्तरं 'संगीतरत्नाकर' इति ग्रन्थशिरोमण्यां निरूपितं तालं निम्नरूपेण परिभाषयितुं शक्यते-दृश्यः कालखण्डः समविषममात्राभिः नीतः, विभागतालिखालाभिः संसीमितः, गीतवाद्यनृत्यानाम् उपायान् विशेषेण परिमापति, स तालः इत्युच्यते।

**तालशास्त्रम्**

तालशास्त्रस्य परिभाषां यथावत् प्रतिपादनात् पूर्वं ''शास्त्र'' इत्यस्य शाब्दिकम् अर्थं तस्य च विस्तारं ज्ञातुं समीचीनम्। गम्भीरानुसन्धानान्तरं ''शास्त्र'' शब्दस्य नानार्थाः प्रकाशमागताः। किञ्चित् सारगर्भिताः आसन् किञ्चित् कल्पितकल्पिताः।

**''शिष्यते अनेन इति शास्त्रम्।''**

**''शास्ति च त्रायते च असौ शास्त्रम्।''**

इत्यस्मात् तात्पर्यम् येन ज्ञानं प्राप्यते, या विद्या यत् शिक्षायुक्तं विज्ञानं च प्रददाति, यः अज्ञानरूपतिमिरं नाशयति तत् एव शास्त्रम् इत्युच्यते। अन्यैः शब्दैः, यत् ज्ञानं, या विद्या, या कला, यत् विषयविषयं च व्यवस्थितया क्रमबद्धतया च संकल्यते, तदभिधानं ''शास्त्र'' इत्यस्ति।

उदाहरणतया यथा नाट्यशास्त्रं यत्र नाट्यविषयकं समग्रं ज्ञानं संगृहीतम् अस्ति, तेन नाट्यं शास्त्ररूपेण प्रतिपाद्यते। एवं च कौटिल्यस्य अर्थशास्त्रं, पिङ्गलस्य छन्दशास्त्रं च अन्यानि च बहूनि उदाहरणानि प्रदातुं शक्यन्ते।

तालशास्त्रस्य प्राचीनत्वम्-तालशास्त्रस्य अध्ययनं भरतकालतः आरभ्य संगीतशास्त्रन्तार्गतं निरन्तरं प्रवर्तमानम् अस्ति। तस्मात तालशास्त्रं संगीतशास्त्रस्य एकां शाखामिति स्वीकार्यते, यद्यपि तस्य विषयविस्तारः इतोऽपि व्यापकः विस्तीर्णश्च दृश्यते। अतः, वर्तमाने कालखण्डे तालशास्त्रस्य स्वातन्त्र्येण शास्त्ररूपेण अध्ययनम् अत्यावश्यकं प्रतीयते। भरत, नारद, सोमेश्वर, शार्ङ्गदेव, पार्श्वदेव, सुधाकलश इत्यादीनां प्राचीनमध्यमयुगीनाचार्याणां संगीतविषयेकं यत् ज्ञानं तेषां

ग्रन्थेषु सम्पूर्णरूपेण विस्तृतं च निरूपितम् अस्ति  गीतं, चतुर्विधं वाद्यं, तालः, नृत्यं च समन्वितं दृश्यते।

आधुनिक दृष्ट्या तालशास्त्रम् आधुनिके काले नृत्यस्य अध्ययनं संगीततः पृथक् आरब्धं जातम्। पाश्चात्यसंगीतशास्त्रेऽपि केवलं गायनवादनयोः अध्ययनं दृश्यते। अतः, तालशास्त्रस्य अपि स्वातन्त्र्येण पाठनं करणीयम्।

यदि कोऽपि विद्वान् एवं वदेत् यदि तालशास्त्रं स्वतंत्रं पाठ्यविषयत्वं प्राप्नोति, तर्हि रागशास्त्रं, तन्त्रीवाद्यशास्त्रं च किमर्थं न प्राप्नुयात्?  इत्यत्रोत्तरम् अस्ति रागस्य, तन्त्रीवाद्यविषयकस्य च स्वरूपं यत् तत् संगीतशास्त्रस्य मूलं स्वरात्मकं विषयमेव।

रागस्य आधारः स्वरः, स्वरस्य आधारः श्रुतिः, श्रुतेः आधारः नादः इति क्रमेण तस्य सम्बन्धः गायनवाद्ययोः एकत्वेन दृश्यते। यथा वर्णाः, गमकाः, तानाः, अलंकाराः च सर्वे अपि स्वरसंश्रयाः एव। अतः, रागतन्त्रीवाद्यविषया अपि संगीतशास्त्रान्तर्गतत्वेन गण्यन्ते।

तालशास्त्रस्य विषयवैशिष्ट्यम् एतद्विपरीतम्-तालस्य स्वरैः सम्बन्धः सीमितमेव। केवलम् अवनद्यवाद्यानां सहयोगे, तद्वादनमार्जनादिषु च दृश्यते। तालस्य विशेषविषयाः-मार्गः, यतिः, ग्रहः, क्रिया, मार्जना, पाटाक्षरम्, पाणी, प्रहतः, प्रहारः इत्यादयः अतीव व्यापकाः गूढार्थयुक्ताः च सन्ति, यैः तालस्य स्वतन्त्रता-प्रमाणं लभ्यते। देशीताललक्षणानि, तेषां व्याख्याः, अवनद्यवाद्यानां विविधशैल्यः, विविधरचनाः च एते विषयाः केवलं तालशास्त्रे प्राप्नुवन्ति। नवप्रवृत्तिः अवनद्धवाद्यानां स्वतन्त्रवादनप्रणाली आरभ्य वर्तमानकाले तालशास्त्रसिद्धान्तेषु नूतनानां प्रवृत्तीनां च समावेशा जातः। अतः, तालशास्त्रस्य अध्ययनं स्वातन्त्र्येण करणीयं, तदेव समीचीनं युक्तं च भविष्यति।

**तालशास्त्रम् -**

यस्मिन् शास्त्रे यस्मिन् ग्रहेऽङ्गे क्रियायां यतौ चादिषु परिभाषिकेषु पदेषु च, सिद्धान्तेषु च अतीव सूक्ष्मतया, तार्किकतया, वैज्ञानिकतया च शोधपूर्णं विस्तृतं च अध्ययनं क्रियते, तत् तालशास्त्रम् इति कथ्यते। अन्यैः सरलैः शब्दैः उक्तं चेत् तालविषयस्य व्यवस्थितं क्रमबद्धं च अध्ययनं तालशास्त्रम् इत्युच्यते।

**तालशास्त्रस्य विभागः**

भारतीयतालशास्त्रं द्विधम् विभक्तुं शक्यते

(1) सैद्धान्तिकतालशास्त्रम्

(2) प्रयोगात्मकं वा क्रियात्मकं तालशास्त्रम्।

(1) **सैद्धान्तिकतालशास्त्रम्** - तालशास्त्रस्य अस्यां शाखायां तालस्य मूलभूततत्त्वैःनां सह विस्तीर्णविषयाणां तत्त्वानां च गम्भीरं अध्ययनं क्रियते। एषा शाखा पूर्णतया तत्त्वनिष्ठा अस्ति। अस्यां यतिः, मार्गः, लयः, क्रिया इत्यादयः पारम्परिकतालाश्रितशब्दाः विस्तारतः अधीयन्ते, तथा च आधुनिक प्रचलिततालतत्त्वानां परिभाषा अपि अस्यां क्रियते। यथा, कस्यचित् तालस्य ठेकः प्रयोगाधारितः भवति, परन्तु ठेकस्य यद्यत् परिभाषिकशब्दरूपेण स्वरूपग्रहणं भवति, तेषां शब्दानां अध्ययनं सैद्धान्तिकतालशास्त्रस्य अन्तर्गतं स्यात्। आधुनिकस्य तालस्य अनिवार्याङ्गानि मात्रा, विभागः, सम्, ताली, खाली च एतेषां सर्वेषाम् अध्ययनम् अपि अस्यां शाखायां भवति।

अवनद्धवाद्येषु ये रचनारूपप्रयोगाः सन्ति उठान पेशकारः, कायदा, रेला, रौं, टुकडाः, मोहराः, मुखडाः, तिहायी, चक्रदारप्रकाराः, पडाल, गतम्, गतस्य विविधप्रकाराः, फर्द् इत्यादयः ते सर्वे परिभाषिकरूपेण सैद्धान्तिकतालशास्त्रे एव निर्दिष्टाः सन्ति। तिहायी, फरमायशी, कमाली, नवहक्का इत्यादयः रचनाः गणिततत्त्वाधारिताः भवन्ति। तेषां रचनापद्धतिः, सूत्राणि, तत्त्वानि च अस्यैव शाखायाः अन्तर्गतं वर्ण्यन्ते। यदा कश्चन तालाचार्यः कस्यचित् साहित्य छन्दस्याधारेण रचनां करोति, तदा स छन्दः अपि सैद्धान्तिक एव अधीयते। अवनद्धवाद्ये छन्दानुरूपरचनायाः सृष्टिः अपि सैद्धान्तिकतालशास्त्रस्यैव सीमान्तर्गतं अस्ति। यद्यपि तस्याः रचनायाः प्रयोगे सति सा रचना क्रियात्मकरूपं गृह्णाति। प्रयोगात्मकतालशास्त्रे कौशलप्राप्तये सैद्धान्तिकतत्त्वज्ञानं परमावश्यकं भवति।

(2) **प्रयोगात्मकं वा क्रियात्मकं तालशास्त्रम्** - अस्याः शाखायाः नाम्नैव स्पष्टं भवति यत् एषा शाखा क्रियामूलकतातत्त्वनिष्ठा च अस्ति। यत्र रचनानां तालबद्धलेखनपद्धतिः अपि सम्मिलितास्ति। सैद्धान्तिकतालशास्त्रस्य अन्तर्गतं ये पारम्परिकतालपरिभाषिकशब्दाः (ग्रहः, यतिः) इत्यादयः सन्ति, तान् वाद्यविशेषोपयोगेन उदाहरणेन सह प्रतिपादयितुं शक्यते, प्रयोगेणैव। यत्र सैद्धान्तिकतालशास्त्रे विस्तृतं विवेचनं क्रियते तत्रैव ऐतषां घटकानां प्रत्यक्षप्रयोगरूपेण प्रदर्शनं अस्य प्रयोगात्मकशाखायाः अन्तर्गतं गण्यते। यतिः, ग्रहः

इत्यादयः तु तत्त्वतः व्याख्यायन्ते, परन्तु उदाहरणरूपेण प्रयोगेणैव तेषां प्रतिपादनं कर्त्तुं शक्यते। अनेकासु रचनासु विविधयतिप्रयोगः, ग्रहप्रयोगश्च दृश्यते। प्रयोगात्मकतालशास्त्रस्य द्वितीयः पक्षः अस्ति प्राचीनतालपद्धतिः। यत्र ग्रन्थेषु देशीपक्षे बहवः तालाः लक्षणैः सह निरूपिताः, किन्तु तेषु क्रियाविध्यः, पाट्, वर्णः वा बोलः च न निर्दिष्टः। प्राचीनमध्ययुगीनग्रन्थेषु संगीतशास्त्रे च तालशास्त्रे च ऐते द्वौ पक्षौ दृष्टे। यदा कश्चन संगीतग्रन्थः विश्लेष्यते तदा प्रथमं संगीततत्त्वानि च तालतत्त्वानि च सैद्धान्तिकपद्धत्याः द्वारा निरूप्यन्ते, तदनन्तरं तान्येव तत्त्वानि क्रियात्मकपद्धत्याः स्पष्टीकृत्य दर्शयन्ते। यथा संगीतरत्नाकर, संगीतसमयसार इत्यादिषु ग्रन्थेषु पूर्वं नादः, श्रुतिः, स्वरः, ग्रामः, मूर्च्छना, जातिः, रागः च सैद्धान्तिकरूपेण निरूपिताः, रागस्य दशलक्षणानि अपि निरूप्यन्ते, तत्पश्चात् तेषां क्रियात्मकव्याख्या क्रियते। तालाध्याये अपि एवं दृश्यते प्रथमं तालप्राणाः, लयः, जातिः, यतिः इत्यादयः सैद्धान्तिकरूपेण प्रतिपाद्यन्ते, ततः प्रयोगात्मकरूपेण तेषां लक्षणानां निरूपणं क्रियते। अतः यो जनः तालशास्त्रस्य तत्त्वगर्भमर्थं ज्ञातुमिच्छति, तेन उभयोरपि पक्षयोः सैद्धान्तिकस्य च प्रयोगात्मकस्य च दक्षता अनिवार्यतया अर्जनीया।

### तालशास्त्रस्य ऐतिहासिकविश्लेषणम्

भारतीयतालशास्त्रस्य इतिहाससन्दर्भे वयं न पाषाणयुगं न च प्राचीनसभ्यतानां युगं प्रविशामः। पाषाणकाले सभ्यतायां च चर्मावरणयुक्तानां वाद्यनां प्राप्तेः सम्यग् अनुमानं प्राप्यते यत् तस्मिन्नेव काले तालानां परिकल्पना जाता स्यादिति। अत्र केवलम् एतावद् वक्तव्यं यत् यदि अवनद्धवाद्यानां विकासः पाषाणयुगे तथा सभ्यताकाले जातः, तर्हि तेषां वाद्यानां नादयोग्यतालरचनापि न्यूना जाता स्यात। निश्चितरूपेण मानवेन नानातालपरिकल्पना कृता स्यात् किन्तु तेषां कालनिर्दिष्टानां लिखितप्रमाणानां पूर्णतया अभावात्, तस्य कालस्य तालविषये मौनं समुचितं मन्यते। यथा संगीतशास्त्रस्य इतिहासः अतीव प्राचीनः तथा एव तालशास्त्रस्य अपि। तालशास्त्रस्य अंकुरः वैदिककाले एव सञ्जातः आसीत्। यद्यपि समग्रे वैदिकवाङ्मये ऋग्वेदात् शिक्षाग्रन्थपर्यन्तम् 'ताल' शब्दस्य प्रयोगः दृश्यते न, तथापि तस्यानुरूपं काचित् रचना तस्मिन् काले स्यादिति सम्भाव्यते। अथवा तालशब्दस्य स्थाने कश्चनान्यः विशेषः संज्ञाशब्दः प्रयोगे जातः स्यात्। यथा

वैदिकवाङ्मये 'संगीत' इत्यस्य प्रयोगः न दृश्यते, किन्तु तस्यार्थे 'गीत', 'गान', 'शिल्प', 'गान्धर्व' इत्यादीनां शब्दानां प्रयोगः दृश्यते, एवं तु तालविषये अपि सम्भाव्यते।

छन्दानां रचना वेदेषु जातापि। गायत्री, अनुष्टुप्, जगती, बृहती, उष्णिक् पङ्क्तिः इत्यादयः छन्दाः ऋग्वेदे बहुधा उपयुज्यन्ते। तालश्च छन्दश्च परस्परपूरकस्वभावौ स्तः। यत् कार्यं संगीतविषये तालः करोति, तत् कार्यं साहित्ये छन्दः करोति। आचार्यैः निरूपितं यत् तालवर्जितं संगीतं 'अरण्यसंगीत' इत्याख्यया निर्दिष्टम्। ऋचां छन्दाधारेण एव सामगानं क्रियते स्म। सामगाने दुन्दुभ्यादीनां अवनद्धवाद्यैः सह आधाटि इत्यस्य घनवाद्यस्य प्रयोगः, दर्शयति यत् वैदिककाले सामगानेभ्यः सम्पूर्णं तालज्ञानं प्राप्तम्। सर्वेषां वैदिकछन्दानां गतिर्भिन्ना अस्ति।

यथा गायत्रीछन्दस्य त्रयो भागाः सन्ति, प्रतिचरणे अष्टाक्षराः, एवम् चतुर्विंशतिः अक्षरात्मकं छन्दरूपम्। तस्य गायनकाले चतुरश्रताला त्र्यश्रतालश्च सम्भाव्येते। एवं सर्वेषां वैदिकछन्दानां वर्णचालनं भिन्नं, यस्मिन् सर्वासाम् तालजातीनां प्रयोगः सहजतया कर्तुं शक्यते। यजुर्वेदे तालशास्त्रसम्बद्धः कश्चन मन्त्रः नूनम् उपलभ्यते, यस्मिन् तालसम्बन्धिनः महत्वपूर्णाः शब्दाः दृश्यन्ते।-

**''नर्माय पुँश्चलूँ हसाय कारि यादसे शावल्यां ग्रासष्य गणकममिकोशकं तान्महसे वीणावादं पाणिहनं तूणवहमं तान्नृत्तायानन्दाय तलवम्''**[13]

अस्मिन् मन्त्रे 'पाणिध्यं' तथा 'तलवम् 'इति एतौ द्वौ शब्दौ तालशास्त्रस्य सन्दर्भे अतीव महत्वपूर्णौ स्तः।

'पाणि' इति शब्दः तालशास्त्रे अतिविशिष्टं स्थानं धारयति। नाट्यशास्त्रानन्तरप्रणीतग्रन्थेषु 'पाणि'शब्दस्य स्थाने 'ग्रह' इत्यस्य प्रयोगः कृतः दृश्यते। नाट्यशास्त्रे दत्तिलम्-ग्रन्थेः 'ग्रह' शब्दस्य अर्थे 'पाणि' शब्दस्य प्रयोगः कृतः अस्ति। नाट्यशास्त्रे त्रयः पाणिप्रकाराः उल्लिखिताः सन्ति, यथा

समपाण्यवपाणिश्च तथा उपरिपाणिकम्।
पाणिस्तु त्रिविधो ज्ञेयो गीतवाद्यसमाश्रयः।।

अर्थात् गीतस्य, वाद्यवादनस्य च सम्बन्धेन अथवा तदवलम्बनेन या पाणिः कथ्यते, सा त्रिविधा दृश्यते समपाणिः, अवपाणिः, उपरिपाणिश्च। परवर्तिषु ग्रन्थेषु पाणेः 'ग्रह' इत्यपि नामाभिधानं प्राप्तम्, यत्र सम-विषम-अतीत-अनागत एतेषां चतुर्णां स्वरूपं वर्ण्यते। ग्रहः पाणिः वा गीतस्य उत्थानेन सह

सम्बद्धः स्यादिति। ‘पाणि’ इत्यस्य प्रयोगः नाट्यशास्त्रे अवनद्धवाद्यानां संदर्भे ‘पाणिप्रहत’ इत्यत्र दृष्टव्यः। उपर्युक्ते मन्त्रे ‘पाणिध्यं’ इति यः शब्दः प्रयुक्तः, तत्र ‘ध्यं’ इत्यस्य अर्थः ‘धारण’ इति गृह्यते। यतो हि ‘पाणिध्यं’ इत्यस्य तात्पर्यम्यः पाणिं धारयति इति। यः गायनकाले तालस्य स्थानं निश्चितुं शक्नोति, गीतस्य उठानस्य सह तालस्यापि उठानं दर्शयति, तस्यैव बोधकं ‘पाणिध्यं’ इत्यत्र व्यक्तम्।

द्वितीयः महत्त्वपूर्णः शब्दः ‘तलवम्’ इत्यस्ति। अयं शब्दोऽपि ‘तल’ धातोः उद्भूतः। ‘तलवम्’ इत्यस्य व्याख्या एवं प्रकारेण प्रदत्ता ‘‘यः हस्तादीनां तलानि वाति हिनस्ति तम्’ इति’’[14]। अर्थात् यः पुरुषः हस्तादीनां तलवाद्यान् वादयति स ‘तलवम्’ इत्युच्यते। ‘पाणिध्यं’ इत्ययं शब्दः गीतस्य उठानं सूचयति, ‘तलवम्’ तु अन्यः कश्चन पुरुषः भवेत्।

पाणिध्यस्य अनुसरणं कृत्वा तालवाद्येन तालस्य निर्वहनं क्रियते स्म। अतः वयं कथयितुं शक्नुमः यत् वैदिककाले एव तालशास्त्रस्य विविधसिद्धान्तानां बीजारोपणं सम्पन्नम् आसीत्। महर्षेः वाल्मिकेः काव्यम् ‘रामायणम्’ अपि भारतीयसंस्कृतेः मूलाधाररूपेण स्थितम्। अस्मिन् रामायणे सङ्गीतस्य सङ्गीतशास्त्रस्य च सन्दर्भाः अनेकेषु श्लोकेषु आगताः सन्ति। ‘ताल’ इति शब्दोऽपि वाल्मिकी-रामायणे बहुषु स्थलेषु उल्लिखितः दृश्यते।

**‘‘षट्पादतंत्रीमधुराभिधानं प्लवंगमोदीरितकण्ठतालम्’’**[15]

अर्थात् भ्रमराणां गुंजनं वीणायाः मधुरस्वरस्य सदृशं प्रतीतिं जनयति, मण्डूक इव स्वकण्ठनिःस्वनेन तालस्य निर्वहनं कुर्वन्निव दृश्यते। अत्र तु तालवर्णैः उपमायाम् मण्डूककण्ठध्वन्या समालोचना क्रियते। टर्र-टर्र इति यः शब्दः मेढकध्वनिः, सा ध्वनिः करतालादितालवाद्यसमकक्षा भवति, अतः मेढकध्वन्याः उपमा तालवर्णैः कृता दृश्यते। ‘ताल’ इत्यस्य उल्लेखस्य अतिरिक्तं तालशास्त्रसंबद्धाः अपराः अपि पारिभाषिकशब्दाः अस्मिन्काले सुष्टु गोचराः भवन्ति। एवं वयं पश्यामः यत् रामायणकालपर्यन्तं भारतीयतालशास्त्रस्य सिद्धान्तानां स्थापना पूर्णरूपेण जाता आसीत्। अनन्तरं कालेषु नानाग्रन्थानां रचनां कृतवन्तः, किन्तु तेषु ग्रन्थेषु तालशास्त्रसंबन्धिनः सन्दर्भाः अल्परूपेण दृश्यन्ते। ‘शिक्षा’- नाम्निग्रन्थेषु तु नूनम् एव तालसंबन्धिनः प्रमाणिकतथ्यानि स्पष्टतया दृश्यन्ते याज्ञवल्क्यस्मृतौ निमेषमात्रयोः लक्षणं प्रतिपादितम् यथा

**''निमेषमात्रः कालः स्यादद्धिसिद्युत्कालस्तथापरे।**
**अक्षरात्तुव्ययोगाच्चगतिः स्यात्सोमशर्मणः''**[16]

अर्थात् यावत कालेन नेत्रपटलयोः निमीलनं भवति, स एव कालः 'निमेष' इति कथ्यते। द्वितीयं मतं यावत्कालेन विद्युल्लता ज्वलति, तावत्कालः अपि 'निमेष' इति निर्दिष्टः।

यत्र वर्णानां कुसुमितम् (विलग्नम्) असमानसम्बन्धरहितं उच्चारणं क्रियते, तत्र यः कालः व्यतीतः, स 'एकमात्रा' इति परिगण्यते। एवमेव अस्यैव शिक्षायां 'अणु' इति पदस्य निरूपणं कृतम्। अयं च 'अणु' इतीदं पदं तालशास्त्रे 'अणुद्रुत' इत्याख्यया प्रसिद्धम्।

**''सूर्यरश्मि-प्रकाशाद्याकाणिकाय दृश्यते।**
**आणवस्य तु सा मात्रा मात्रा च चतुराणवा''**[17]

अर्थात् सूर्यकिरणानां प्रकाशे ये अणवः दृश्यन्ते, ते एव 'अणु' इत्यस्य मात्रारूपेण परिगण्यन्ते। चत्वारः अणवः मिलित्वा एका मात्रा भवति। 'अवग्रह' इति शब्दस्यापि प्रयोगः अस्यां शिक्षायां कृतः अस्ति। आधुनिके आभिजातसङ्गीते 'अवग्रह'-शब्दस्य परमं महत्त्वं विद्यते।

**''अवग्रहेतुकालः स्यादर्थमात्राप्रकीर्तिता**
**पदयोरेतरेकाल एकमात्रा विधीयते''** [18]

ततः पश्चात् मात्राणां स्वरूपं निर्दिष्टम् ह्रस्वः एकमात्रिकः, दीर्घः द्विमात्रिकः, प्लुतः त्रिमात्रिकश्च। व्यञ्जनं च अर्धमात्रिकं कथ्यते। एवं प्रकारस्य अनेकेः शब्दाः अस्मिन् शिक्षाग्रन्थे दृष्टाः येषां तालशास्त्रे गाढः सम्बन्धः विद्यते। अस्याः शिक्षायाः अतिरिक्तं माण्डूकीशिक्षा अपि वृत्तित्वतः (लयतः) आरभ्यते। एवं वैदिकवाङ्मयकालात् अल्पकालेनानन्तरं तालशास्त्रं पूर्णरूपेण विकसितम् अभवत्। पाणिनेया अष्टाध्यायी अपि मात्रासु निमेषेषु च विमर्शं कृतवती। एवं मान्यता अस्ति यत् संस्कृतस्य चतुर्दश-सूत्राणि, येषुः समग्रं व्याकरणं प्रतिष्ठितं, शिवस्य ढक्कया उत्पन्नानि। अतः यद्दृष्ट्या संस्कृतव्याकरणस्य उद्भवः तालादेव अभूत्-

**''नृत्तावसाने नटराजराजो ननाद ढक्कां नवपंचवारम्।**
**उद्धर्तुकामः सनकादिसिद्धान्, एतद्विमर्शे शिवसूत्रजालम्''**[19]

अर्थात् सनकादयः ऋषिणां स्वहिताय नवराजेन (शिवेन) 'ढक्का' इति डमरूनामकं वाद्यम् नवपञ्चवारं वादितम् यतः शिवसूत्राणि समुत्पन्नानि। शिवस्य

डमरुणा उत्पादिताः एतानि सूत्राणि माहेश्वरसूत्राणि इति कथ्यन्ते। प्रसिद्धः शास्त्रीयगायकः छन्नूलालमिश्रः एतानाम् सूत्राणां आधारेण विविधानां तालजातीनां उत्पत्तिम् अनुमन्यते। प्रथमम् सूत्रम् अइउण् इति, यत्र चत्वारः वर्णाः सन्ति, ये चतुश्श्रेणिं प्रतिपादयन्ति। द्वितीयम् सूत्रम् ऋलृक् इति, यत्र त्रयः वर्णाः सन्ति, यत् तृतीयां जातिं दर्शयति।

तृतीयम् सूत्रम् एओङ्, चतुर्थम् सूत्रम् ऐऔच्, मिश्रेण खण्डजातिरूपेण निर्मितम्। पञ्चमम् सूत्रम् हयवरट् , षष्ठम् सूत्रम् लण् संयोगेन मिश्रजातिं वहति। अथ एकादशम् सूत्रं खफछठथचटतव यस्मिन् नव वर्णाः सन्ति, तत् संकीर्णजातिं सूचयति। अत्र वयं तालशास्त्रप्रसङ्गे प्राचीनसन्दर्भस्य निरूपणं कृतवन्तः। प्राचीनग्रन्थेषु तालशास्त्रस्य पारिभाषिकशब्दाः सुष्टु दृश्यन्ते, किन्तु तेषां शब्दानाम् अर्थव्याख्या न लभते। शिक्षाग्रन्थेषु निमेष-वृत्त्यादीनां लक्षणानि दृश्यन्ते, तथापि तानि पूर्णरूपेण तालशास्त्रप्रसङ्गे न दृश्यन्ते। अस्तु।

नारदीयशिक्षा इति सङ्गीतस्वरशास्त्रस्य प्रथमः प्रमाणितः ग्रन्थः मन्यते। नारदीयशिक्षायां तालस्य तालशास्त्रस्य वा प्रसङ्गे कश्चन संदर्भः न दृश्यते। नाट्य-सङ्गीतादिषु अन्येषु विषयेषु तास्य च तालशास्त्रस्य च विस्तृतं विवेचनं पञ्चमवेदे नाट्यशास्त्रे एव लभ्यते। अतः प्रथमप्रमाणितग्रन्थरूपेण नाट्यशास्त्रम् अनुमोदनीयम्।

नाट्यशास्त्रस्य एकत्रिंशः अध्यायः तालविद्यानां विषयं वहति, यस्मिन् तालशास्त्रस्य विस्तारः क्रियते। अस्मिन्नध्याये 502 श्लोकाः विद्यमानाः। एतस्मिन् न्यूनपदादीनां ग्रन्थानां अपि विद्यमानत्वं दृश्यते, यथा नारदीयशिक्षा, दत्तिलम् आदयः। आचार्यः भरतेन तालस्य द्वौ प्रकारौ  पञ्च भेदात् च (चाचपुटादयः) विस्तरेण निरूपिताः। आचार्यस्य पारिभाषिकशब्दाः याः तालशास्त्रे निर्दिष्टाः, ते अद्यापि प्रासङ्गिकाः सन्ति। केषाञ्चनत् शब्दानां संज्ञासु परिवर्तनं जात, परं तेषाम् अर्थाः तथैव यथा भरत कृतं विधानम्। कतिपयानां शब्दानां भेदाः तैः एव यथा निर्दिष्टाः। कतिपयेषु भेदेषु वृद्धिः जाताः।

यथा भरतः 'पाणि' शब्दम् उपयुज्यत इति, परवर्तिषु ग्रन्थेषु तं 'ग्रह' इति आचष्टे।

ये न परिवर्तिताः भेदाः, यथा 'लयः' इति, यत्र त्रयः भेदाः सर्वत्र स्वीकार्याः। 'पाणिप्रहतस्य संख्या' पञ्च एव। 'सशब्द-निशब्दक्रियाणां च' भेदाः

चत्वारः एव। यथा वृद्धाः भेदाश्च, यथा- 'यतिः' इति। भरतेन त्रयः एव ज्ञायन्ते, परं कालान्तरेण 'पिपीलिका', 'मृदङ्गः' च यतिषु संयुक्ताः। मार्गसन्दर्भे भरतेन ध्रुवमार्गः न निर्दिष्टः, परन्तु परवर्तिन आचार्याः तं प्रथमस्थानं कृतवन्तः। सर्वाधिकं महत्त्वपूर्णं परिवर्तनं यत् भरतेन यः 'तालः' उक्तः (त्र्यश्रः चतुश्रः च), ताः अद्य जातयः सन्ति।

भरतेन यत् तालः यः शास्त्रं निरूपितम्, तत् प्रत्येककाले प्रासङ्गिकम् आसीत्, अद्य अपि प्रासङ्गिकम् अस्ति। परवर्तिग्रन्थकाराः भरतस्यैव सिद्धान्तानां निरूपणं स्वग्रन्थेषु विवेचनं च कृतवन्तः।

तालशास्त्रस्य द्वितीयः महत्वपूर्णः प्रमाणितः च ग्रन्थः 'दत्तिल' इति अस्ति। अस्मिन् ग्रन्थे कुल 244 श्लोकाः सन्ति। श्लोकात् 109 तः 244 पर्यन्तं तालशास्त्रस्य विस्तारः क्रियते। अस्य विस्तृत-निरूपणस्य आधारः नाट्यशास्त्रम् एव। षष्ठशताब्द्यां 'बृहद् देशी' इति ग्रन्थः रचितः। अस्मात् ग्रन्थात् भरतस्य सिद्धान्तानांः पृथक् प्रतिपादनं दृश्यते, यतः अस्य ग्रन्थस्य विषयः देशी सङ्गीतः एव। दुर्भाग्यवशात् अस्य ग्रन्थस्य तालवाद्याध्यायः कालान्तरे लुप्तः। यदि तस्य तालप्रकरणस्य प्राप्तिः जायते तर्हि तालशास्त्रस्याधिकानि रहस्यानि प्रकाशितानि स्युे। बृहद् देशीयस्य पश्चात् अष्टमशताब्द्यां नारदेन सङ्गीतमकरन्दनामकस्य ग्रन्थस्य प्रणयनं कृतम्। एषः ग्रन्थः देशीवर्गस्य तालानां च प्रथमः ग्रन्थः इति मन्यते, यद्यपि देशीतालसंज्ञायाः अस्मिन् ग्रन्थे उपयोगिता नास्ति। देशीवर्गतालाना निरूपणात् अतिरिक्तं दशप्राणतालसंकल्पनां अपि अस्मिन् ग्रन्थे द्रष्टुम् शक्यते। यः अध्यायः विविधतालानां च तालशास्त्रसिद्धान्तानां च निरूपणं करोति स नृत्याध्यायः इति विख्यातः।

दशमशताब्द्याम् आचार्येण अभिनवगुप्तेन नाट्यशास्त्रे बृहट्टीकायाः लेखनं 'अभिनवभारती' इति नाम्ना कृतम्। नाट्यशास्त्रस्य तालविधानाध्यायस्य अवगाहनार्थम् एषा टीका अतिप्रयुक्ता। आचार्यभरतः सङ्गीततालविधानानां विस्तारयुक्तं व्याख्यानं एषु प्राप्यते। एवमेव समये नान्यदेवेन 'सरस्वतीहृदयालङ्कार' इति ग्रन्थस्य प्रणयनं कृतम्। अस्य ग्रन्थस्य द्वादशोऽध्यायः तालाध्यायः इति। अस्मिन् ग्रन्थे तालविवेचनं विस्तरेण कृतम्।

दशमशताब्द्याः एकादश शताब्द्याश्च च मध्ये 'मानसोल्लास' इति ग्रन्थः महाराजसोमेश्वरदेवेन रचितः। एषः ग्रन्थः मुख्यतया सङ्गीतग्रन्थः नास्ति, परं

तस्याः चतुर्थविश्रान्तिः, 'विनोदविंशति' इति विख्याता, यः 16, 17, 18 उपाध्यायाः गीतनृत्यवाद्यविनोदनाम्ना प्रसिद्धाः। एषु त्रिषु विनोदेषु समग्रं 1406 श्लोकाः सन्ति।

वाद्यविनोदमध्ये तालभागस्य विस्तृतचर्चा अस्ति। अवनद्धवाद्यप्रबन्धानां विस्तृतवर्णनं अपि अस्मिन् ग्रन्थे कृतम्। काललक्षणं, तालमहत्त्वं, तालवेदनपद्धतिः, लघुगुरुचिह्नानि च, पञ्चविंशतितः अधिकानि देशीवर्गतालानां च निरूपणमत्र कृतम्। यद्यपि देशीसंज्ञा तालानां कृते न उपयुज्यते। यत्र भरते द्वौ तालभेदौ त्र्यश्रः चतुरश्रः च निर्दिष्टौ, तत्र सोमेश्वरराजेन चतुर्भेदाः प्रतिपादिताः कृत्र्यश्रः, चतुरश्रः, मिश्रः संकीर्णः च।

**''तेन ताल इति ख्यातः सोमेश्वरमहीभुजा।**
**चतुरस्त्र त्र्यरश्रा मिश्राः खण्डा भवन्ति हि''**[20]

अस्य ग्रन्थस्य पश्चात् महाराजसोमेश्वरस्य पुत्रः कार्यचक्रवर्ती जगदेकमल्लः सङ्गीतचूडामणि नामकग्रन्थं रचयत। अस्मिन् ग्रन्थे द्वितीये प्रकरणे तालप्रकरणम् अस्ति। तस्मिन् तालप्रकरणे तालदशप्राणात् सप्तप्राणानां क्रिया, जाति, मार्ग, ग्रह, लय, यति, प्रस्तार इति लक्षणानि भेदाश्च निरूपिताः। पूर्वेषु ग्रन्थेषु त्र्यश्रः, मिश्रः इत्यादयः तालभेदरूपेण निर्दिष्टाः, एतस्मिन् ग्रन्थे त्र्यश्रादीनि जातिरूपेण प्रतिपादितानि। पञ्चमार्गतालाः च षण्णव देशीवर्गतालाः च अस्मिन् ग्रन्थे- तालप्रकरणे निरूपिताः।

एतेषां एकाधिकैकशतालानाम् बहूनि प्रकाराणि सन्ति। एतेषु तालेषु त्र्यश्रः चतुरश्रः च जात्योः एकाधिकैकशतानि तालाः कविचक्रवर्ती विस्तरेण निरूपितवान्। ततः 'सङ्गीतशास्त्रग्रन्थः'शिरोमणि सङ्गीतरत्नाकर' इति ग्रन्थः युजश्रेष्ठाचार्य शारङ्गदेवेन रचितः। अस्मिन् ग्रन्थे पञ्चमः अध्यायः तालाध्यायः इति। अहं पुनः स्मर्तुमिच्छामि यत् प्राचीनमध्यकालेषु तालसम्बन्धेन कश्चन विशेषग्रन्थः स्वतन्त्ररूपेण न रचितः, किन्तु ग्रन्थानां तालप्रकरणानि स्वतन्त्रग्रन्थतुल्यानि। तालसम्बन्धे मार्गदेशी इत्येतयोः शब्दयोः प्रथमप्रयोगः अस्मिन् ग्रन्थे वर्तते। मार्गपरिप्रेक्ष्ये भरतेन ध्रुवमार्गः न निर्दिष्टः, परं अस्मिन् ग्रन्थे ध्रुवसहिताः इति चत्वारः मार्गाः। यतिः, लयः, क्रियाश्च भरतानुसारं एव। अस्य अध्यायस्य द्वे प्रकरणे मार्गतालतत्त्वलक्षणप्रकरणं प्रकरणारण्यगीतप्रकरणं च।

द्वितीयप्रकरणस्य संज्ञा देशीतालप्रकरणम्। प्रथमे प्रकरणे द्वितीयखण्डः गीतकाधारितः। मन्द्रकः, अपरान्तकः, उल्लोप्यकः, ओवेणकः, प्रकटी, रोबिन्दकश्च सप्त गीतकाः प्रकाराः। छन्दकः, आसारितः, वर्धमानः, पाठिका, ऋग्, गाथा, साम् एतेऽपि सप्त गीतकाः। द्वितीयप्रकरणे देशीतालप्रकरणे एकविंशत्यधिकशतालानां वर्णणम् आचार्येण लक्षणसहितं कृतम्।

मार्गतालानां प्लुतगुरू आदि नां खण्डनात्, लघुवैखण्डिकाधिक्येन देशीतालानां आचार्येण खण्डतालः इति नाम कृतम्। अध्यायान्ते प्रस्तारः, संख्या, नष्टः, पातालः, द्रुतमेरुः, लघुमेरुः, प्लुतमेरुः चादयः उन्नवतिः नव च सरलसाधनाः निरूपिताः, यै एतेन तालाः सरलतया ज्ञातुम् अर्हन्ति।

एवं वयं पश्यामः यत् भारतीय-तालशास्त्रस्य सिद्धान्तानामुपस्थापनं वैदिकयुगे एव जातम्। शनैः शनैः स्वयमेव तालशास्त्रं विकासं प्राप्तवान्। यथा यथा तालशास्त्रस्य विकासः अभवत्, तथैव तस्य जटिलता अपि वर्धिताभवत्। आचार्यभरतस्य कालपर्यन्तं तालशास्त्रं स्वतन्त्रशास्त्ररूपेण विकसितम् अभवत्। युजश्रेष्ठाचार्यशारङ्गदेवस्य काले तालशास्त्रं स्वकीयं पूर्णविकसितावस्थां प्राप्नोति।

**संदर्भ :**


1. *शार्ङ्गदेवः। सङ्गीत रत्नाकर 5/2*
   *सम्पा. डॉ. सुभद्रा चौधरी, दिल्ली, राधा पब्लिकेशन, संस्करण प्रथम 2006*
२. *आचार्य पार्श्वदेवः। सङ्गीत समयसार 8/2*
   *सम्पा. आचार्य बृहस्पति : दिल्ली, भारतीय ज्ञानपीठ। प्रथम संस्करण : 2006*
   *पृष्ठ 265*
3. *जगदेकमल्लः । सङ्गीतचूडामणिः 43*
   *सम्पा. डी के वेलणकर, बड़ौदा, ओरिएंटल इंस्टीट्यूट 1958, पृष्ठ ६*
4. *भरतमुनिप्रणीत-नाट्यशास्त्रम् 31/1*
   *(श्रीमदभिनवगुप्ताचार्यविरचितया अभिनवभारती व्याख्ययासमुद्भासितम्)*
   *प्रधानसम्पा.- डॉ. रविशंकरः नागरः , संपा.-कन्हैयालाल जोशी*
   *दिल्ली, परिमल पब्लिकेशन्स, द्वितीय संस्करण 1989, पृष्ठ - 147*

5. दत्तिलमुनिप्रणीतं दत्तिलं श्लोक 110
संशोधक के. साम्बशिव शास्त्री, त्रिवेन्द्रम् संस्कृत सीरीज, 1930, पृष्ठ- 10
6. नारदः । संगीत मकरंद, 2/1/40
सम्पा. मंगेश रामकृष्ण तेलंग, बड़ौदा, सेंट्रल लाईब्रेरी, 1920, पृष्ठ 33
7. महाराज सोमेश्वरः । मानसोल्लासः 17/837
सम्पा . जी के श्री गोंडेकर, बड़ौदा, ओरिएंटल इंस्टीट्यूट, 1961
8. सङ्गीतचूडामणिः श्लोक 44, पृष्ठ - 6
9. भरतमुनिप्रणीत-नाट्यशास्त्रम्
(श्रीमदभिनवगुप्ताचार्यविरचिन्तया अभिनवभारती संस्कृतव्याख्यया समुद्भासितम्)
पृष्ठ १४७
10. संगीत रत्नाकर भाग, 5/3
11. संगीत समयसार, 8/3
12. संगीतोपनिषदसारोद्धारः
(संपा) शाह उमाकांत । बड़ौदा, ओरिएंटल इंस्टीट्यूट 1961, पृष्ठ16
13. दयानन्द-यजुर्वेदभाष्य-भास्करः
व्याख्याता- श्री पण्डित सुदर्शनदेव आचार्य
प्रकाशकः ऋआर्ष साहित्य प्रचार ट्रस्ट खारी बावली, दिल्ली-
प्रथम संस्करण संवत 2021, पृष्ठ 530
14. दयानन्द-यजुर्वेदभाष्य-भास्करः (तृतीय भाग)
व्याख्याता -श्री पण्डित सुदर्शनदेव आचार्य
प्रकाशकः आर्ष साहित्य प्रचार ट्रस्ट, पृष्ठ- 530
15. वाल्मीकिरामायणं किष्किन्धाकाण्ड- 28/36
अनुवादकः -चतुर्वेदी द्वारकाप्रसाद शर्मा
प्रकाशक रामनारायण लाल, पब्लिशर और बुकसेलर इलाहाबाद
प्रथम संस्करण 1927, पृष्ठ 268
16. श्रीमद्याज्ञवल्क्यमहर्षिप्रणीत याज्ञवल्क्यशिक्षा श्लोक 10
भाषाटीका- स्व. पण्डित श्रीज्वालाप्रसाद क्षेमराज-श्रीकृष्णदास श्रेष्ठी
प्रकाशक-श्रीवेङ्कटेश्वर मुद्रणालय, संस्करण - 1850, पृष्ठ- 4

*17. वहीं श्लोक 11, पृष्ठ - 4*

*18. याज्ञवल्क्य शिक्षा श्लोक 13*
*हिन्दी भाष्यकार -स्वामी ब्रह्ममुनि परिव्राजक विद्यामार्तण्ड*
*प्रकाशक- श्री प्रतापसिंह ट्रस्ट, एल माडल् टाऊन करनाल*
*प्रथम संस्करण - 1967 , पृष्ठ -4*

*19. लघु सिद्धांत कौमुदी*
*व्याख्या कार- पं गोमती प्रसाद शास्त्री मिश्र*
*प्रकाशक- चौखंभा सुभारती प्रकाशन वाराणसी, पृष्ठ 3*

*20. मानसोल्लास, 4/17/830*

●●●

# 22

# संस्कृते कथायाः यात्रा

*दीपेन्द्रकिशोरार्यः*

कथायाः मुख्यः उद्देशः मनोविनोदः। अस्याः अवान्तरप्रयोजनानि बहूनि भवेयुः चेदपि मनोविनोदस्य एव प्रामुख्यम्। अतएव बाणभट्टः वदति - 'हरन्ति कं नोज्ज्वलदीपिकोपमैः नवैः पदार्थैरुपपादिताः कथाः'[1] इति। कथायाः प्रपञ्चस्तु अतिविस्तृतः। तत्र भवन्ति अनेके प्रकाराः। तेषु अन्यतमा अस्ति 'लघुकथा'।

'लघुकथा' (Short Story) इति निर्दिश्यमानः अयं कथाप्रकारः आधुनिकः। क्वचित् 'कथा' शब्दमात्रेण अपि अयं निर्दिश्यते। प्रसङ्गादिबलात् 'कथा' पदेन 'लघुकथायाः एव अवगमनं भवति।

**कथायाः उत्पत्तिः**

कथा संस्कृतक्षेत्रे अविदितपूर्वा न। वस्तुतः कथानां जन्मभूमिः संस्कृतमेव। अस्याः उद्भवः कदा जातः स्यात् इति वक्तुं न शक्यते। अन्यासां भाषाणाम् इतिहासः अल्पकालिकः वर्षमेयः च भवति इत्यतः तत्र कथायाः उत्पत्तिकालः स्पष्टतया अवगन्तुं शक्यः। अस्याः भाषायाः इतिहासः तु सुदीर्घः। उद्गमकालः अपि अतिप्राचीनत्वात् अस्पष्टः। अतः कथानाम् आरम्भकालस्य स्पष्टतया अवगमनं क्लेशाय एव। वेदोपनिषदादिषु कथानां सत्ता तु अभिज्ञायते एव। इतिहासपुराणादिषु तु तस्याः स्वरूपस्य स्पष्टावगतिः भवति। महाभारतादिषु कियत्यः कथा न सन्ति? अन्ये बृहत्कथा - पञ्चतन्त्र - हितोपदेश- शुकसप्तत्यादिषु कथानां रूपम् इतोऽपि स्फुटतया दृश्यते। कथासरित्सागरः, सिंहासनद्वात्रिंशिका वेतालपञ्चविंशतिका, भोजप्रबन्धः इत्यादयः अपि अत्रैव अन्तर्भावम् अर्हन्ति। जैनबौद्धादिपरम्परायामपि विपुलः एव कथाप्रपञ्चः दृश्यते।

एवं कथायाः बीजं यद्यपि अ बहोः कालात् संस्कृतकथासु दृश्यते, तथापि लघुकथानां यत् स्वरूपम् अद्य दृष्टिगोचरतां याति तत् तु नवदशे शतके एव विकसितम् इत्यत्र नास्ति सन्देहः। अस्य कथाप्रकारस्य उदयः तु पाश्चत्त्यदेशेषु अभवत्। तस्य प्रभावतः भारतीयासु भाषासु अपि तस्य प्रकारस्य उद्गमः विकासश्च जातः। एवं भारतीयभाषासु पुष्टिं गतस्य अस्य प्रकारस्य प्रभावः संस्कृत क्षेत्रे जातः। अभिनवगुप्तः कथाप्रपञ्चे प्राधान्येन त्रीन् प्रकारान् उल्लिखति[2] -

1. धर्मादिपुरुषार्थमुद्दिश्य प्रकारवैचित्र्येण अनन्तवृत्तान्तवर्णनप्रकारा परिकथा।
2. एकदेशवर्णना खण्डकथा।
3. समस्तफलानतेतिवृत्तवर्णना सकलकथा।

आधुनिकदृष्ट्या वयं खण्डकथाप्रकारमेव 'लघुकथा' (Short Story) इति निर्देष्टुं शक्नुयाम। परिकथा सकलकथा च 'उपन्यासः' (Nowel) इति निर्देशम् अर्हेत्।

**का नाम लघुकथा?**

का नाम लघुकथा? विविधाः जनाः विविधप्रकारकाणि विवरणानि वदन्ति। पाश्चात्त्यविद्वान् एडर-एलनः वदति - "A Storey is a narrative, short enough to be read in a single sitting, written to make an impression on the reader, excluding all that does not forward that impression and final in itself"[3] इति। एतादृशानि अन्यविधविवरणानि अपि बहूनि उपलभ्यन्ते एव। सर्वाणि सङ्कलय्य प्रसिद्धः हिन्दीकथाकारः प्रेमचन्दः कथायाः परिभाषाम् इत्थं विवृणोति - ''यह एक ऐसी रचना है जिसमें जीवन के किसी एक अंग या मनोभाव को प्रदर्शित करना ही लेखक का उद्देश्य रहता है। उसके चरित्र, उसकी शैली तथा कथा-विन्यास सब उसी एक भाव को पुष्ट करते हैं।''[4]

कथा तु गद्यस्यैव प्रकारः। अग्निपुराणादिषु तस्य प्रकारकथनं दृश्यते। साहित्यदर्पणकारः स्वरूपम् अवलम्ब्य चतुरः प्रकारान् वदति -

**वृत्तबन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च।**
**भवेदुत्कलिकाप्रायश्चूर्णकं च चतुर्विधम्।।**
**आद्यं समासरहितं वृत्तभागयुतं परम्।**
**अन्यत् दीर्घसमासाढ्यं तुर्यं चाल्पसमासकम्।।**[5]

बन्धाधारेण पञ्च प्रकारान् निर्दिशति अग्निपुराणम् -

**आख्यायिका कथा खण्डकथा परिकथा तथा।**
**कथानकेति मन्यते गद्यकाव्यं च पञ्चधा।।**[6]

हेमचन्द्रः काव्यानुशासने[7] आख्यानम्, उपाख्यानम् निदर्शना, प्रवह्लिका, मन्यप्रचलिका, मणिकुल्या, परिकथा, खण्डकथा, सकलकथा, उपकथा, बृहत्कथा इत्यादीन् प्रकारान् निर्दिशति। राजा भोजः शृङ्गारप्रकाशे[8] आख्यायिका (हर्षचरितम्), उपाख्यानम् (नलोपाख्यानम्), आख्यानकम् (गोविन्दाख्यानकम्), निदर्शनम् (पञ्चतन्त्रम्), प्रवह्लिका (चेटकम्), मन्थुल्ली (अनङ्गवती), मणिकुल्या (मत्स्यहसिता), कथा ( कादम्बरी), परिकथा ( शूद्रककथा ), खण्डकथा (इन्दुमती), उपकथा (चित्रलेखा), बृहत्कथा (बृहत्कथा), चम्पूः (वासवदत्ता) दूर्मिलता (....) इत्येतान् भेदान् दर्शयति। का नाम लघुकथा इति विषये डॉ. रहसबिहारी द्विवेदी वदति -

**उपन्यासस्य चैकांशः चारुगद्यसमन्वितः।**
**प्रायशः कल्पितं वृत्तं समाश्रित्य प्रवर्तते।।**
**स्थाने काले क्रियायां च यत्रैक्यं तथ्यगर्भितम्।**
**प्रेरणादायि सोद्देश्यं यस्या लघुकथा च सा।।**[9]

डॉ. राजेन्द्रमिश्रः 'अभिराजजयशोभूषणम्' इत्यत्र लघुकथालक्षणम् इत्थं विवृणोति -

**नाऽतिविस्तृतसन्दर्भा विद्युदुन्मेषसन्निभा।**
**नूनं लघुकथेयं स्यादेकपात्रावसायिनी।।**
**अकस्माद्धि परीहारश्चिरसंस्तुतवर्त्मनः।**
**असंस्तुतसरणेश्चाऽप्यङ्गीकारो ह्यतर्कितम्।।**
**सुग्रहणमग्राह्यस्य गृहीतस्याप्युपेक्षणम्।**
**कस्यचन सङ्कल्पस्य झटित्येव समुद्भवः।।**
**भावोन्मेषो विवर्तो वा भावानां समयोचितः।**
**चिररूढमनोभावस्यापि द्राक्परिवर्तनम्।।**
**उल्कापिण्डस–क्षाभा हत्तन्त्रीझङ्कृतिक्षमा।**
**अल्पाक्षराऽल्पपात्रापि कथा लघ्वी महीयते।।**[10]

डॉ राधावल्लभत्रिपाठी कथयति- **जीवनस्यैकदेशनिरूपणपरमाख्यानं कथा।**[11]

**कथायाः युगत्रय विभागः**

संस्कृतक्षेत्रे पत्रकारितायाः विकासः यदा अभवत् तदा अस्यापि प्रकारस्य पल्लवितत्वं पुष्पितत्वं च सम्पन्नम् इति वक्तुं शक्नुमः। तस्मिन् काले प्रकाशितासु कथासु प्रमुखतया द्वौ भागौ - मौलिक्यः अनूदिताः चेति। मौलिकीषु अपि द्वौ भागौ- स्वोपज्ञाः प्रेरिताः चेति। एते सर्वे अपि प्रकाराः नवदशशतकस्य उत्तरार्धे विंशतितमशतकस्य पूर्वार्धादिषु च विशेषतः विकासं गताः। अद्यापि अनुदिनं विकसन्ति ते।

संस्कृतपत्रकारिता, आधुनिकसंस्कृतसाहित्यं च विद्वद्भिः त्रिधा विभक्तम्। लघुकथाविषये अपि अयमेव अंशः अन्वेति इत्यतः ते त्रयः विभागाः अत्र उपस्थाप्यन्ते। 'आधुनिक संस्कृतसाहित्य का इतिहास' इत्यत्र (संस्कृतवाङ्मय का बृहत् इतिहास - सप्तम खण्ड ) प्रधानसम्पादकः बलदेवोपाध्यायः इत्थं विभजति -

**1. अप्पशास्त्रिराशिवडेकरयुगम्** (1890 - 1930 )

'संस्कृतचन्द्रिका' (1893) 'सूनृतवादिनी' (1906) इत्येतयोः पत्रिकयोः सम्पादकः अप्पाशास्त्री राशिवडेकर (1873 - 1983) नवयुगानुगुणं लिखन् लेखान् प्रकाशयन् च संस्कृतसमाजे जागरणम् उद्भावितवान्। यद्यपि तेन लिखिताः कथाः न अधिकाः, तथापि नवजागरणस्य उत्पादने तस्य पात्रं महत् एव। अप्पाशस्त्रियुगे एव 'संस्कृतरत्नाकरः', (1904) 'सहृदया', 'विद्योदयः', (1871), 'परिषत्पत्रिका' इत्यादीनां पत्रिकाणां प्रकाशनम् आरब्धम्। ताः अपि लघुकथाप्रकारस्य अभिवृद्धौ सेवाम् अकुर्वन् एव।

**2. भट्टमथुरानाथशास्त्रियुगम्** ( 1930 - 1960 )

'संस्कृतरत्नाकरः' 'भारती' इत्यनयोः पत्रिकयोः सम्पादकः मथुरानाथ शास्त्रिवर्यः लघुकथाक्षेत्रस्य समृद्ध्युत्पादने विशेषप्रयासम् अकरोत्। बहवः लेखकाः अस्मिन् युगे कथाः अलिखन्। मथुरानाथशास्त्रिवर्येण स्वयम् एव शताधिकाः कथाः लिखिताः। ताः 'मञ्जुनाथग्रन्थावलिः' इत्यस्य द्वितीयभागस्य प्रथमे खण्डे प्रकाशिताः सन्ति। अस्मिन् अपि कालखण्डे 'सुरभारती' (1947) 'भारती' (1950) 'वैजयन्ती' (1953) 'शारदा' (1958), 'अमरवाणी' ( 1959) इत्यादयः पत्रिका कथाप्रकाशने कथाप्रकारस्य विकासे च महत् साहाय्यम् अकुर्वन् एव।

### 3. राघवन्युगम् (1960-1980)

'संस्कृतप्रतिभा' याः (साहित्य अकादमी इत्यनया संस्थया प्रकाश्यमानायाः) सम्पादकस्य डॉ. वेङ्कटराघवन्महोदयस्य काले लघुकथानां गुणस्तरे वृद्धिः, सङ्ख्यावृद्धिः, लेखकवृद्धिः इत्यादयः जाताः। नवा दिशा एव कथाक्षेत्रेण प्राप्ता इति वक्तुं शक्यते। अखिलभारतस्तरे साहित्यक्षेत्रस्य नवां दिशं नवं लक्ष्यं च परिकल्पितम् अभवत् एतस्मिन् एव कालखण्डे।

एतदनन्तरकाले भवः कालखण्डः आधुनिककालत्वेन निर्देष्टुं शक्यः। सः अद्यापि अनुवर्तते। केचन नवदशशतकस्य उत्तरार्धं कथासाहित्यस्य उदयकालत्वेन स्वातन्त्र्यात् पूर्वतनं विंशतितमशतकीयं कालं विकासकालत्वेन स्वातन्त्र्योत्तरकालम् आधुनिककालत्वेन च निर्देष्टुम् इच्छन्ति।

पूर्वं ये कालखण्डाः निर्दिष्टाः तेषां विषये जगन्नाथपाठकः 'आधुनिक संस्कृत साहित्य का इतिहास' इत्यस्य सप्तमखण्डस्य सम्पादकीये यत् वदति तस्य उल्लेखः अत्र औचित्यम् आवहति इति भाति।

''राशिवडेकरयुगे संस्कृतलेखने समासबाहुल्यं गतम्, तच्च बोधगम्यं प्रवाहमयञ्च विधातुं प्रयासः कृतः। प्राचीनादेव कालात् संस्कृतभाषा व्याकरण शास्त्रस्य नियमैः समधिकतया प्रशस्ता। तस्याश्च गद्यापेक्षया पद्येषु लेखनमधिकतरं जातमिति निर्विवादम्। राशिवडेकरयुगे गद्यलेखनम्प्रति रचनाकृद्भिर्ध्यानं दीयमानमाकलयितुं शक्यम्। अस्मिन् युगे संस्कृते कवितानिर्माणे सम्प्रवृत्ताः सुकवयः कवितायाः कलाविलासरूपं पक्षं शिथिलीकृत्य मानवस्य सुखदुःखयोः अभिव्यञ्जनेऽवाहिता अभूवन्।

भट्टयुगे विशेषेण परिष्कारः सम्प्रवर्तितः। किमप्यतिरिक्तमोजः प्रवाहमयत्वं अनुभूतिपथमागतम्, गद्यविधासु वैचारिका निबन्धा अलिख्यन्त, तत्र च सामयिकेभ्यो विषयेभ्यः प्रश्रयो दत्तः। युगमिदं राशिवडेकरयुगमधिश्रितम्। तस्मिन् युगे आधुनिकं संस्कृतसाहित्यमेकखण्डकं भवनमिव सुविनिर्मितमिति शक्यते वक्तुम्।

राघवन्युगे तदेकखण्डकं भवनं द्विखण्डकभवनरूपतया निर्मितं सत् समधिकतया भव्यतां गतम्। तस्मिन् नानावर्णाः कालकृतयः शृङ्गाणि च सुविनिर्मितानि। युगेनानेन आधुनिकसंस्कृतसाहित्यभवनं सुदर्शनार्हं कृतम् ।''[12]

**प्रथमा लघुकथा का ?**

सर्वेषु अपि भाषाक्षेत्रेषु प्रथमा लघुकथा का इत्यस्य अभिज्ञानं भवति एव। तस्याः कथायाः गुणानां विमर्शः अपि प्रचलति। किन्तु संस्कृतक्षेत्रस्य प्रथमा लघुकथा का इति अभिज्ञानं क्लेशाय एव। प्रथमः उपन्यासः अम्बिकादत्त-व्यासविरचितः 'शिवराजविजयः'। एषा संस्कृतचन्द्रिकायां धारावाहिनीत्वेन आदौ प्रकाशितः। प्रकाशनारम्भः 1888 तमे वर्षे जातः। समाप्तिः तु ततः षष्ठे सप्तमे वा वर्षे। अनन्तरकाले अयम् उपन्यासः पुस्तकरूपेणापि प्रकाशितः। प्रथमः लघुकथासङ्ग्रहः तु प्रायः 'रत्नाष्टकम्'। अत्र अष्टौ कथाः सन्ति। एताः अपि अम्बिकादत्तव्यासविरचिताः एव। किन्तु प्रथमा लघुकथा का इत्यत्र प्रमाणम् उल्लेखः वा न उपलभ्यते। अप्पाशास्त्रियुगे प्रकाशितानां कासाश्चन कथानां यत् विवरणम् उपलभ्यते तत्र एव अन्तर्भूतासु काचित् कथा प्रथमा स्यात्, उत अन्या एव काचित् इति तु न ज्ञायते।

**कथाप्रकाराणां नामानि**

कथाप्रकाराणां नाम्नां विषये किञ्चित् दृष्टिपातम् अत्र करवाम। आदौ स्वरूपं मनसि निधाय कल्पितान् प्रकारान् परिशीलयामः। स्वरूपम् अवलम्ब्य उपन्यासः, लम्बकथा, लघुकथा, पुटकथा, पत्रकथा, टुप्कथा इत्यादयः भेदाः कृताः दृश्यन्ते लोके।

**उपन्यासः -** 'नावेल्' इत्यस्य कथाप्रकारस्य निर्देशाय अयं शब्दः उपयुज्यते। यद्यपि संस्कृतक्षेत्रे अयं शब्दः न नूतनः, किन्तु कथाप्रकारस्य निर्देशाय क्रियमाणः प्रयोगस्तु आधुनिकः एव। वाक्यस्य उपक्रमः, विचारः इत्यादयः अर्थाः उपन्यासपदस्य उपवर्णिताः कोषकारैः। नाट्यशास्त्रे नाट्यसन्धेः उपभेदः अपि कश्चन अस्ति 'उपन्यास' नामा। 'उपन्यासः प्रसादनम्' इति तल्लक्षणम्। 'उपपत्तिकृतो भावः उपन्यासः प्रकीर्तितः।' हिन्द्यादिभाषासु दीर्घकथाप्रकारस्य निर्देशाय अयं शब्दः प्रयुक्तः। आन्ध्रगुजरातादिषु 'नवला' शब्दः प्रयुज्यते, 'नावेल्' इत्यस्य सादृश्य-दर्शनाय। 'नवं नवत्वं लाति इति नवला' इत्यादिक्रमेण व्युत्पत्तिं दर्शयन्ति ते। कर्णाटकमहाराष्ट्रादिषु तस्मिन् अर्थे 'कादम्बरी' शब्दः रूढः। बाणभट्टस्य कादम्बरी-कथाग्रन्थस्य सादृश्यात् दीर्घकथाग्रन्थाः अपि तेन पदेन एव तैः निर्दिष्टाः। एवं विविधेषु प्रदेशेषु विविधानि पदानि प्रयुज्यमानानि सन्ति। सर्वेषामपि काञ्चित् व्युत्पत्तिं तु वयं वक्तुं शक्नुयाम एव। तथापि प्रचुरप्रयोगात् 'उपन्यास' पदस्य प्रयोगः एव योग्यः इति भाति।

**लघुकथा -** 'शार्ट स्टोरी' इत्येतं प्रकारं निर्देष्टुम् अयं शब्दः भूयसा प्रयुज्यते। क्वचित् लाघवेन 'कथा' इत्येतावन्मात्रमेव अपि प्रयुज्यते। प्रकरणादिवशात् श्रोतारः ततः 'लघुकथायाः' एव बोधं प्राप्नुवन्ति। अत्रापि शब्दप्रयोगे वैविध्यम् अस्ति एव। 'कथानिका' दयः अपि कैश्चित् प्रयुक्ताः। तथापि 'लघुकथा' इत्यस्यैव प्राचुर्येण प्रयोगः सर्वत्र। लघुकथायाः पुटपरिमित्यादिविषये न कोऽपि स्पष्टः नियमः। क्वचित् द्वित्रपुटात्मकता, क्वचित् पञ्चपुटात्मकता, क्वचित् उपदशपुटात्मकता च। क्वचित् ततोऽपि दैर्घ्यम्! कथावस्तुनः विस्तारम् अवलम्ब्य पुटपरिमितिः भवति। पुटपरिमितिं मनसि निधाय कोऽपि कथां न लिखति ।

**लम्बकथा -** अयम् उपन्यास - लघुकथयोः मध्ये विद्यमानः प्रकारः। लघुकथा एव यदि अधिकपृष्ठात्मिका भवति, उपन्यासत्वं च आप्तुं न अर्हति, तर्हि सा 'लम्बकथा' इति निर्दिश्यते। अयं प्रकारः कैश्चित् 'उपन्यासिका' इति पदेन निर्दिष्टः दृश्यते।

**पुटकथा -** लघुकथा एव अल्पाकारा सती पुटमात्ररूपा यदि स्यात् तर्हि सा 'पुटकथा' इति निर्दिश्यते। कथावस्तुनः अनतिविस्तारः अत्रत्यं वैशिष्ट्यं भवति।

**पत्रकथा -** समपत्रे (Post Card) यावान् स्थलावकाशः स्यात् तावति एव स्थले या लिख्यते सा 'पत्रकथा' इति उच्यते। अत्रापि वस्तु अनतिविस्तृतम् पुटकथातः अपि अल्पा भवति एषा आकारेण।

**टुप्कथा -** अतिसङ्क्षिप्तकथायाः निर्देशाय अयं शब्दः प्रयुज्यते। अत्र 'टुप' शब्दः सङ्क्षेपवाचकः। वस्तुतः अयं शब्दः शब्दकोशेषु न दृश्यते। कुमारिलभट्टस्य शाबरभाष्यटीका अतिसङ्क्षिप्ता। सा 'टुप्टीका' इति प्रसिद्धा। सः एव अत्रापि उपात्तः। अतिसङ्क्षेपं द्योतयितुम् एतादृशः शब्दः अन्यः न लभ्येत।

वस्तुनः आधारेण अपि केचन प्रकाराः परिकल्पिताः दृश्यन्ते। ते च स्पशकथा, वैज्ञानिककथा, बालकथा, चित्रकथा, सत्यकथा, आत्मकथा, ऐतिहासिक कथा, हास्यकथा इत्यादयः। स्पशः नाम यः रहसि करणीये कार्ये नियुक्तः भवति सः। स्पशसम्बद्धा कथा 'स्पशकथा'। आधुनिके काले 'डिकेक्टिव् नावेल्' इत्येषः यः प्रकारः अस्ति तस्य निर्देशाय एतत् पदं प्रयुज्यते। विज्ञानात्मकं वस्तु आधारीकृत्य रचिता कथा 'वैज्ञानिककथा'। बालान् मनसि निधाय सरलया शैल्या बालोचितं विषयम् आधृत्य रचिता कथा 'बालकथा'। चित्रमाध्यमेन कथा यत्र निरूप्यते तत्र 'चित्रकथा' इत्यस्य पदस्य प्रयोगः। आङ्ग्लभाषया अयं प्रकारः 'कामिक्स्' इति पदेन निर्दिष्टः अस्ति। सत्यघटनाम् आधारीकृत्य निरूपिता कथा

एव 'सत्यकथा'। स्वस्य चरित्रमेव कथारूपेण यत्र कथालेखकः निरूपयेत्, कथापात्रं किञ्चन स्वचरित्रं स्वयमेव यत्र निरूपयेत् सा कथा 'आत्मकथा' इति कथ्यते। इतिहासघटनाम् अवलम्ब्य निरूपिता कथा 'ऐतिहासिकथा'। हास्यवस्तु अवलम्ब्य विनोदशैल्या निरूपिता कथा 'हास्यकथा' इति उच्यते। एवमेव अन्ये अपि प्रकाराः भवितुम् अर्हन्ति एव।

अद्यत्वे लघुकथालेखकाः बहवः दृश्यन्ते। कथासङ्ग्रहाः अपि बहवः प्रकाश्यन्ते। संस्कृतपत्रिकासु नूतनलेखकैः लिखिताः कथाः बहुधा दृष्टिपथम् आयान्ति। अन्यभाषाक्षेत्रं पश्येम चेत् यद्यपि भाति यत् अस्मदीया कृषिः अत्यल्पा एव इति, तथापि सन्तोषस्य विषयः तु - अस्मिन् क्षेत्रे प्रगतिः विशेषतः दृश्यते इति। अस्माकम् एषा प्रगतिः अन्यभाषाक्षेत्रस्थानाम् अवधानम् आक्रष्टुम् अपि यदि शक्नुयात् तर्हि सार्थक्यं सिद्ध्येत्।

**सन्दर्भः -**


1. *कादंबरी, पूर्वभागः 9*
2. *ध्वन्यालोकलोचनम्, 3/7 वृत्तिभागः*
3. *Edgar Allan Poe: Essays and Reviews pp 569-577*
4. *हिंदी आलोचना की पारिभाषिक शब्दावली, अमरनाथ, राजकमल प्रकाशन, 2016*
5. *साहित्यदर्पणम्, 6/330*
6. *अग्निपुराणम्, 337/2*
7. *काव्यानुशासनम्, 406.3*
8. *श्रृंगारप्रकाशः, 11.339*
9. *दूर्वा, जून 2005*
10. *अभिराजयशोभूषणम्, 115-119*
11. *अभिनवकाव्यालंकारसूत्रम्, 3.1.12*
12. *आधुनिक संस्कृत साहित्य का इतिहास, प्रस्तावना भाग*


●●●

# 23

# कालिदाससाहित्ये पञ्चमहाभूतविमर्शः

*सत्यव्रतपाण्डेयः*[1]

**या सृष्टिः स्रष्टुराद्या बहति विधिहुतं या हविर्या च होत्री**
**ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।**
**यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः**
**प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतुवस्ताभिरष्टाभिरीशः।।**[2]

महाकविकालिदासेन लिखितं ''अभिज्ञानशकुन्तलम्'' न केवलं संस्कृतसाहित्यस्य अपितु विश्वसाहित्यस्य अमूल्यं निधिः, यस्मिन् कविः स्वप्रतिभां विकसितवान् अभिज्ञाने पृथ्वीतत्त्वं पृष्ठभूमिरूपेण न अपितु नाटकस्य अत्यावश्यकरूपेण प्रयुक्तम् आसीत्। महाकविः यत् मानवीयं मूल्यं प्रस्तुतवान् तत् अत्यन्तं प्रशंसनीयम् अस्ति। स्वस्य प्रियदेवस्य शिवस्य अष्टमूर्त्तीन् कविः प्राकृतिकरूपमात्रं पूजितवन्तः।।

मंगलाचरणेएवअष्टमूर्तीनां वर्णनं कृते सति सप्तमे क्रमे पृथ्वीरूपमूर्तेः वर्णनं कृतमस्ति। तत्रोक्तं ''यामाहुःसर्वबीजप्रकृतिरिति''(अभि.शा.1/1) या पृथ्वी (पृथ्वीरूपमूर्तिं) समस्त-बीजानां(धान्यादिकानां) अपि मूलंकारणं कथ्यते। यतोहि पृथिव्यादेव समेषां बीजानाम् उत्पत्तिर्भवति अतएव पृथिवी भवति सर्वबीज प्रकृतिरिति। अत्र प्रश्नो भवति यत् पृथिव्याः सप्तमः क्रमः किमर्थम्? तर्हि वक्तुं शक्यते अत्र सप्तम संख्या सप्तलोकानां व्यवहारं दर्शयति। यतो हि सृष्टिक्रमे उपर्युपरि सप्तलोकानां मध्ये आदौ पृथिव्याः क्रमः दृश्यते। अथ च अधोपरि चतुर्दशलोकानां केन्द्रभूतास्ति पृथिवी। यथा वेदान्तसारे श्रूयते **''एतेभ्यः पञ्चीकृतेभ्यो भूतेभ्यो भूर्भुवः स्वर्महःर्जनस्तपः सत्यमित्येतन्नामकानामुपर्युपरि विद्यमानानामतलवितलसुतलरसातलतलातल- महातलपातालनामकानामधोऽधो**

**विद्यमानानां लोकानां ब्रह्माण्डस्य तदन्तर्वर्तिचतुर्विधस्थूलशरीराणां तदुचितानामन्नपानादीनां च उत्पत्तिर्भवति''।**[3] पुनश्च नैय्यायिकाः अपि स्वकीये सप्तपदार्थक्रमे पृथिव्या एव व्यवहारः सर्वादौ कृतवन्तः। पठ्यते तर्कसंग्रहे **''द्रव्य गुणकर्म-सामान्यविशेष-समवायाभावाः सप्तपदार्थाः। सप्त द्रव्याणि पृथिव्यप्तेजो-वाय्वाकाश-काल-दिगात्मा-मनांसि नवैव''।**[4] इदमपि वक्तुं शक्यते यत् पृथिव्याः सप्तमः क्रमः सांख्यानां प्रकृति- विकृति पदार्थानां परिलक्ष्यं करोति। यतो हि तेषामपि संख्या सप्तैव दृश्यते यथा सांख्यकारिकायां –**''महदाद्याः प्रकृति-विकृतयः सप्त''**[5] अथापि योगशास्त्रे योगस्य अष्टाङ्गानि उच्यते महर्षिपतञ्जलिना। परञ्च घेरण्डसंहितानुसारेण योगस्य सप्ताङ्गानि एव भवन्ति ।यथा–

**षट्कर्मणा शोधनं च आसनेन भवेद्दृढम्।**
**मुद्रया स्थिरता चैव प्रत्याहारेण धीरता।।**
**प्राणायामाल्लाघवं च ध्यानात्प्रत्यक्षमात्मनः।**
**समाधिना निर्लिप्तं च मुक्तिरेव न संशयः।।**[6]

कालिदासेन तल्लक्ष्यंकृत्वा पृथिव्याः सप्तमः क्रमः प्रदत्तः। भवतु नाम आचार्येण किमर्थं पृथिव्या सप्तमः क्रमः निर्धारितस्तत्तु स एव जानाति। वयं तु कल्पनां एव कर्तुं शक्नुमः।

नान्द्यां शिवस्याष्टौमूर्तीन् पूजयित्वा प्रस्तावनान्ते सर्वादौ राजा दुष्यन्त स्योपमा पिनाकिन् इति शब्देन विहितः। कृष्णसारमृगानुसरणावसरेऽपि स्यन्दनस्य पतनभयात्सूतो वदति **''आयुष्मन् ! उद्घातिनी भूमिरिति मया रश्मिसंयमनाद्रथस्य मन्दीकृतो वेगः''**[7] अर्थात् हे चिरंजीवराजन्! भूरियं उच्चावचाः स्खलनयोग्या वर्तते अत एवाहंर श्मेः प्रग्रहस्य संयमनात् तदल्पीकरोमि। कथनस्याशयो वर्तते यत् तदावसरेऽपि भूमौ भूमेः लक्षणम् आशीर्वादो वा आसीदिति। यथा श्रूयते-

**भूमिस्तुरीयं जग्राह खातपूरवरेण वै। ईरिणं ब्रह्महत्यायाः रूपं भूमौ प्रदृश्यते।।**[8]

भ्रमरप्रसङ्गसमयेऽपि राजादुष्यन्तः भ्रमरं प्रति दुष्ट इति अनुमीयवाचं ब्रवीति– ''कः पौरवे वसुमतीं शासति 1/21 वक्तुं शक्यते यत् आदिकालादेव नित्य रूप-परमाणु-पृथिवी परब्रह्म भगवता एवञ्च अनित्यरूपा पृथिवी केनचित् अन्येन वा शासिता वर्तते। यथाभागवते पृथुप्रसङ्गे लभ्यते -

**''वसुधेत्वां वधिष्यामि मच्छासन... ।..योगबलेनेमा धारयिष्याम्यहं प्रजाः''।।**[9]

एवं प्रकारेण कलियुग – परीक्षित-संवादे अपि लभ्यते। यथा– **''मा रोदीरम्बभद्रं ते खलानां मयि शास्तरि''**[10] द्वितीयाङ्के राजादुष्यन्त-विदूषकयोः संवादे विदूषकः वनचरवृत्तिराजकार्ययोः तुलनां कृत्वा कथयति **''युक्तं नामैवं, यतस्त्वया राजकार्याणि उज्झित्वा तादृशमस्खलितं प्रदेशञ्च वनचरवृत्तिना भवितव्यमिति''।**[11] अत्राशयो वर्तते यत् समतल-भूभागात् राजवृत्तिः वनचरवृत्तेः श्रेष्ठतरः। अत्र राजव्यवहारे वनचरवृत्तिं प्रति व्यंग्यमपि परिलक्ष्यते।

दुष्यन्तस्य प्रशंसावसरे शकुन्तलायाः द्वितीयसखी ब्रवीति —

नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्रीमेकः कृत्स्नां नगरपरिघप्रांशुबाहु र्भुनक्ति।
आशंसन्ते सुरयुवतयो बद्धवैरा हि दैत्यैरस्याधिज्ये धनुषि विजयं पौरुहूते च वजे।।[12]

श्लोकस्य ''उदधिश्यामसीमां धरित्री'' इतिअंशः विचारणीयो वर्तते । यत् समुद्र-रूप – नीलवर्णीयसीमायुक्तपृथिवी अर्थात् पृथ्वीतत्त्वं जलेनावच्छिन्नं वर्तते। अथवा वक्तुं शक्यते पृथिवीतत्त्वं जलतत्त्वस्य संरक्षणेआसीत्, अस्ति एवं च भविष्यति। यतो हि यस्य यस्मात् प्रादुर्भावो भवति तद् तस्मिन् एवाश्रये तिष्ठति। नापि पुराणे अपितु प्रायः समग्रशास्त्रे दरीदृश्यते यत् पृथिव्याः प्रादुर्भावो विद्यते जलादेव। यथा ऋग्वेदे श्रूयते –**''ऋतं च सत्यं च ... दिवं च पृथिवीं चान्तरिक्षमयो स्वः''।**[13] ईश्वरात् जगत्-रूप-कार्यस्योत्पत्ति–क्रमे तदेव निरूपितं सदानन्दः वेदान्तसारे यथा- **''आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी चोत्पद्यते''** इति।[14] अत्रावधातव्यं वर्तते यत् इयं प्रशंसा किञ्चिदपि असत्यरुपेण नास्ति यतोहि अग्रे दुष्यन्तः स्वमेववदति यत् -

**परिग्रह बहुत्वेपि द्वेप्रतिष्ठे कुलस्य नः। समुद्ररसना चोर्वी सखी च युवयोरियम्।।**[15]

अर्थात् स्त्रीणां बहुत्वे सत्यपि अस्माकं वंशस्य द्वे एव प्रतिष्ठे वर्तेते एका तु समुद्ररूपमेखलाच्छादितपृथिवी एवञ्च भवत्योः सखीयं शकुन्तला। अनेन स्पष्टं भवति यत् पृथिव्याः यत् स्थूलरूपत्वं वर्तते तस्य संरक्षकेन सन्तिष्ठति राजा दुष्यन्तः। अतएव तत्रैवाग्रे शकुन्तलां त्यक्तुं कामोत्सुकी उभेऽपि वदतः **''त्वं तावदसहायिनी यस्याः पृथ्वीनाथः समीपेवर्त्तते''**[16] अत्र दुष्यन्तस्य कृते पृथ्वीनाथ इति पदस्य व्यवहारःपरिदृश्यते। चतुर्थाङ्के शकुन्तलायाः हस्तिनापुरं गमनावसरेऽपि पृथ्वीतत्त्वं मांगलिक-तिलके तीर्थमृत्तिका रुपेण दरीदृश्यते। यथा- **''यावदस्या अहमपि गोरोचनां तीर्थमृत्तिकांदूर्वाकिसलयानि मंगल समालम्भनं विरचयामि''**[17]

पुनश्च अग्रेऽपि आचार्यः कण्वः शकुन्तलांप्रति देवान् प्रार्थ्यते । यथा –

**रम्यान्तरः कमलिनीहरितैः सरोभिश्छायाद्रुमैर्नियमितार्कमरीचितापः।**

**भूयात्कुशेशयरजोमृदुरेणुरस्याः शान्तानुकूलपवनश्च शिवश्च पन्थाः।।**[18]

श्लोकेऽस्मिन् ''भूयात्कुशेशयरजोमृदुरेणुरस्याः'' इति पंक्तिः महत्त्वपूर्णा वर्तते। कारणमस्ति यत् महर्षिकण्वः शकुन्तलायाः सुमार्गाय भवितुं पृथिवीं प्रार्थ्यते भवत्वं कमलपराग इव सुकोमला इति यतो हि नाटकेऽस्मिन्पृथिवीतत्त्वं शकुन्तलयाः मातृरुपेण यत्र कुत्रापि संदृश्यते अतएव अग्रे शकुन्तलालतामपि- मुहुर्मुहुः स्वकीयाभगिनीरूपेण व्यवहरति। यथा –''तात! लताभगिनीं तावत् माधवीमामन्त्रयिष्ये। लताभगिनि प्रत्यालिङ्ग्य मां शाखामयर्बाहुभिः। अद्यप्रभृति दूरवर्तिनी खलु ते भविष्यामि। तात! अहमिव इयं चिन्तनीया।। अत्रावधेयमस्ति यत् शकुन्तला लतां स्वभगिनी वदति एवं च लतायाः उत्पत्तिः पृथिव्यादेव दृश्यते। यथा- **''एतेभ्यः पञ्चीकृतेभ्यो भूतेभ्यो भूर्भुवः स्वः.... लोकानां ब्रह्माण्डस्य तदन्तर्वत्ति चतुर्विधस्थूलशरीराणां.... चोत्पत्तिर्भवति। चतुर्विधशरीराणि तु जरायुजाण्डजोद्रि-भज्जस्वेदजाख्यानि।.... उद्रिभज्जानिभूमिमुद्रिभद्यजातानि कक्षवृक्षादीनि''।।**[19] एतस्मात् कारणात् पृथिवीतत्त्वं साक्षात् अत्र मातृरूपमि। अतएव यदा शकुन्तला हस्तिनापुरं प्रति मार्गे गच्छन् अस्ति तदावसरे यद्यपि कण्वः सावधानं करोति तथापि तत्र न स्यात्कापि हानिः। **अस्मिन्नलक्षितनतोन्नत-भूमिभागे मार्ग-पदानि खलु ते विषमीभवन्ति।।**[20] भावो वर्तते यदत्र उपरुद्ध-वृत्ति-वाष्पकारणात् मार्गे नतोन्नत भूमिभागः अलक्षितमिव परिदृश्यते तेन तव चरणविन्यासः विषभीभवन्ति अतः रुदितेनालं भवतु। अत्र शकुन्तलां प्रति पृथिव्याः मातृत्व-रूप-स्नेहः परिलक्ष्यते।
चतुर्थाङ्केपुनः कण्वः आशीर्वादे कथयति यत् –

**भूत्वा चिराय चतुर्दिगन्तमहीसपत्नीदौष्यन्तिमप्रतिरथं तनयं प्रसूय।**

**तत्सन्निवेशितधुरेण सदैव भर्त्राशान्ते करिष्यसि पदंपुनराश्रमेऽस्मिन्।।**[21]

अर्थात् हेशकुन्तला ! चिरकालं यावत् चतुर्दिगस्तपर्यन्तविस्तृता पृथ्वी तस्याः समानभर्तृका भूत्वा जगदे-कवीरपुत्रं दुष्यताङ्गजम् उत्पाद्यतत्सन्निवेशित धुरेण स्वामिना साकमेव शान्तिपूर्ण-दृश्यमाने तपोवने भूयः स्थानं विधास्यसि इति भगवन्तं प्रार्थये। श्लोकेस्मिन् ''महीसपत्नीति'' पदे वैचित्र्यं वर्तते। यतो हि पूर्वप्रसङ्गानुसारं पृथ्वी शकुन्तलायाः मातृत्वं निर्वहति एवञ्चात्र सपत्नीरुपेण

संतिष्ठति। तर्हि प्रश्नो भवति कथं वैमत्यमिति परिदृश्यते? तदा वक्तुं शक्यते यत् पूर्वप्रसङ्गे यस्याः पृथिव्याः वर्णनं विद्यते तद्भिन्ना पृथिवी एवं च अस्मिन् प्रसङ्गे भिन्ना पृथिवी इति। यथा बृहदारण्यकोपनिषदि श्रूयते – **''द्वात्रिंशतं वै देवरथाह्याथिन्ययंलोकस्तं समन्तं पृथिवी द्विस्तावत् पर्येति, तां समन्तं पृथिवींद्विस्तावत् समुद्रः पर्येति''**[22] इदंतावत् सिद्ध्यति यत्द्वात्रिंशत् (32) देवरथाह्वयान्ययपरिमाणंयावत् वर्तते अयं लोकः। तदपेक्षया द्विगुणितविस्तृतः तद्भिन्नपृथिवीलोकः वर्तते। अयंपृथिवीलोकः भूलोकात् भिन्नः सुवर्णमयं च वर्तते। एतद्भूलोकः समुद्रादाच्छादितं विद्यते इति। अस्याः पृथिव्याःराजा (स्वामी) वर्तते दुष्यन्तः अतः इयं पृथिवी भवति शकुन्तलायाः सपत्नी। उभयोः भर्ता दुष्यन्तः एव। तथैवाग्रेकञ्चुकी ब्रवीति"कुतो लोकपालानाम्? तथाहि–

**भानुः सकृद्युक्ततुरङ्ग एवरात्रिन्दिवं गन्धवहः प्रवाति।**
**शेषः सदैवाऽऽहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः।।**[23]

श्लोकेऽस्मिन्तृतीय-चतुर्थपंक्तौ दुष्यन्तस्य धर्मविषये ब्रुवन् कञ्चुकीतं शेषनागेन उपमीयते। यथा शेषनागः सर्वदाभूमिभारः वहति तथैव नृपस्य एषः धर्मो भवति यत् दिवारात्रौ विश्रामेण विना भूमेः राज्यस्यपत्नयाः वा रक्षां करोति। कालिदासेन द्वितीयांके लतां शकुन्तलायाः भगिनीपदेनालङ्कृतः तथाचपुनः पञ्चमाङ्के यदा शकुन्तला प्रथमवारं दुष्यन्तस्य सभामध्ये आयाति तदा सः (दुष्यन्तः) तान् दृष्ट्वा वदति–

**कास्विदवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या।**
**मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम्।।**[24]

अत्र कविना शकुन्तलायाः उपमाकिसलयेन दत्तः। एवमिदं सुनिश्चितं भवति यत् पृथिव्याः मातृत्वं परिलक्षयति कविकालिदासः। एतदेव दृढीकर्तुं अग्रे उच्यते यदा दुष्यन्तस्य पुरोहितः शकुन्तलां शुद्धान्ते नयति तदा शकुन्तला वदति **''भगवति बसुन्धरे। देहि मे ये अन्तरम्''**[25] इति अनेनापि सिद्ध्यते शकुन्तला भूमिं स्वमातामन्यते । सप्तमाङ्के अपि कालिदासेन एतत्रूपकमाध्यमेन प्रदर्शितम्। यथा– **''तेन हि ऋतुसमागमचिह्नं प्रतिपद्यतां लताकुसुमम्''**[26] इति। अत्र लतापदेन शकुन्तलायाः व्यवहारः।

वसन्तोत्सवप्रसङ्गे पृथिव्यादेवोत्पन्नाः वृक्षादयाः अपि महाराजाज्ञां पालयति एवञ्चोचरान्निर्गताकलिकापि स्वं परागं न धत्ते।

**चूतानां चिरनिर्गतापि कलिका बध्नाति न स्वं रजः सन्नद्धं यदपि स्थितं कुरुबकं तत् कोरकावस्थया। कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतंशङ्के संहरति स्मरोऽपि चकितस्तूणार्धकृष्टं शरम् ।।**[27]

पुनःश्च अङ्गुलीयकं दृष्ट्वा शकुन्तलायाः ज्ञानं भवति तदा दुष्यन्तः क्षुब्धो भूत्वा पश्चात्तापंकरोति एवं च स्वयमेव स्वं निन्दति।

तस्मिन्नवसरेअपि तेन तां शकुन्तलां पृथिव्यादेव उपमीयते। यथा-

**संरोपितेऽप्यात्मनि धर्मपत्नीत्यक्ता मया नाम कुलप्रतिष्ठा।**
**कल्पिष्यमाणा महते फलाय वसुन्धरा काल इवोप्तबीजा।।**[28]

भावोऽस्ति यथोचितसमये आहितबीजा प्रभूताय शस्याय प्रभाविष्यन्ती भूमिरिवपुरुवंशप्रतिष्ठास्वरुपा स्वस्मिन् गर्भरूपेण तदुदरे बीजे निषिक्तेऽपि मया अवधीरिता। सप्तमाङ्के यदा राजादुष्यन्तः स्वर्गलोकात् आगच्छन् अस्ति तस्मिन्नवसरे अस्माकमयं पृथ्वीलोकः कीदृशो दरीदृश्यते इति कविना अद्भुतरीत्या संपादितः। तत्त दुष्यन्तेनोक्तं यत् ''मातले! वेगादवतरणादाश्चर्य- दर्शनः संलक्ष्यते मनुष्यलोकः। तथाहि– **शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनीपर्णाभ्यन्तर-लीनतां विजहति स्कन्धोदयात् पादपाः। सन्धानं तनुभागनष्टसलिलव्यक्त्या व्रजन्त्यापगाः केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते।।**[29]

अर्थात् पृथ्वी प्रकटीभवतां पर्वतानां शृङ्गात् अवतरति इव संदृश्यते। अथ च वृक्षाः प्रकाण्डस्य आविर्भावात् पर्णाभ्यन्तरलीनतां त्यजन्ति। एवं च नद्यः अविस्तृतभागेषु दूरतयाऽनुपलब्धानां सलिलानां क्रमशो नैकट्यात् प्रकाशेन संयोगम विच्छिन्नत्वमिति यावत् प्राप्नुवन्ति। अथाप्यवलोकयऊर्ध्व प्रेरयता केनापि अदृश्येन सत्वेन पृथ्वीलोकः ममसमीपयुपस्थाप्यते इव संलक्ष्यते।

एवं च अभिज्ञाने अपितु कालिदासस्य समग्रशास्त्रो तत्त्वानां समाहारोदरी दृश्यते यथा श्लोकेऽस्मिन् भौगोलिकतत्त्वं वैज्ञानिकतत्त्वं स्पष्टरूपेणोल्लिखितं वर्तते। यतो हि यस्मिन्काले अयं ग्रन्थः महाकवि-कालिदासेन रचितः तस्मिन्नवसरे निर्धारणं कर्तुं अतिकाठिन्यं आसीत् यत् आकाशात् अवतरणावसरे पृथिवी अथवा तत्र स्थित-पदार्थः कथं दृश्यते परञ्च महद् गौरवस्य विषयोऽयमस्ति यत् कालिदासस्य कल्पना महनीया अस्ति।

**सन्दर्भः -**

1. *वेदविभागः*
   *महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः, उज्जयिनी (म. प्र.)*

2. *अभिज्ञान. 1/1*
3. *वेदान्तसारः 30*
4. *तर्कङ्ग्रहः 1*
5. *साङ्ख्यकारिका(3)*
6. *घेरण्डसंहिता 1/10,11*
7. *अभिज्ञान. 1/7 (गद्यं)*
8. *(भा.पु. 6/9/7)*
9. *(भा.पु. 4/17/22-27)*
10. *(भा.पु. 1/17/9)*
11. *अभिज्ञान. 2/3 गद्यं*
12. *अभिज्ञान. 2/15*
13. *(ऋग. 10/190/1-3)*
14. *वेदांतसारः 18*
15. *अभिज्ञान. 3/17*
16. *अभिज्ञान. 3/18 गद्यं*
17. *अभिज्ञान. 4/4 गद्यं*
18. *अभिज्ञान. 4/10*
19. *वेदान्तसारः 30*
20. *अभिज्ञान. 4/15*
21. *अभिज्ञान. 4/26*
22. *बृहदा. उ. 3/3/2*
23. *अभिज्ञान. 5/4*
24. *अभिज्ञान. 5/13*
25. *अभिज्ञान. 5/30 गद्यं*
26. *अभिज्ञान. 7/26 गद्यं*
27. *अभिज्ञान. 6/4*
28. *अभिज्ञान. 6/24*
29. *अभिज्ञान. 7/8*


●●●

# 24

# अग्निपुराणे रसतत्त्वविवेचनम्

*प्रवीणकुमारः*

सुधीजनाः साहित्यशास्त्रात् पूर्वमेव वेदकालात् रस-तत्त्वेन परिचिताः अभवन्। अस्य बीजानि वेदेषु प्राप्यन्ते। उपनिषत्सु सम्पूर्णतया रसतत्त्वं पल्लवितं, पुष्पितं भवति। तदुत्तरोत्तरं साहित्यशास्त्रेषु फलितवत्। तैत्तरीयोपनिषदि 'रसो वै सः। रसं ह्येवायं लब्ध्वानन्दी भवति।[1] अर्थात् सः परमात्मा रसस्वरूपः अस्ति एतत् रसं प्राप्य पुरुषः आनन्दीभवति। एवं प्रकारेण रसो वै सः तथा आनन्दो वै सः इत्यादयः व्यञ्जनाः दृश्यते।

रस-शब्दस्य निष्पत्तिः 'रस आस्वादने' धातोः अच् प्रत्ययेन मिलित्वा अभवत्। रस्यते आस्वाद्यते इति रसः अर्थात् यद् आस्वद्यते तद् रसमुच्यते। रसनप्रक्रिया एव रसमुच्यते।

उपनिषत्सु स्थापितम् अयं रसतत्त्वं कालान्तरेण पुराणानां साहित्यशास्त्रणां च विषयः अभवत्।

**अग्निपुराणकारानुसारेण रस-विवेचनम् -** अग्निपुराणकारस्य रसविवेचनम् अतीव उपयोगि, सारगर्भितं बोधगम्यं च यत् अर्वाचीन-साहित्यशास्त्रीयाणां कृते एकम् अवदानम् अस्ति। अग्निपुराणकारस्य मतानुसारेण-

**अक्षरं परमं ब्रह्म सनातनमजं विभुम्।**
**वेदान्तेषु वदन्त्येकं चैतन्यं ज्योतिरीश्वरम्।।**
**आनन्दः सहजस्तस्य व्यज्यते स कदाचन।**
**व्यक्तिः सा तस्य चैतन्यचमत्काररसाह्वया।।**[2]

सः ब्रह्म अक्षरः, सनातनः, अजन्मा सर्वव्यापी विद्यते तस्य ब्रह्मणः अद्वितीयः चैतन्यस्वरूपः ज्योतिर्मयः अस्ति। तस्य सहजस्वरूपः आनन्दः कदाचित्

व्यक्तं भवति। तस्य आनन्दाभिव्यक्तिः, चैतन्य-चमत्कारः रस इति नाम्ना वर्णिता भवति।

अग्निपुराणे परमात्मनः सत्वादिगुणस्य विस्तारात् ते रसाः प्रकटीभवन्ति। अनुरागरसात् श्रृंगारः, तीक्ष्णतात् रौद्ररसः, उत्साहात् वीररसः तथा संकोचात् बीभत्सरसस्य उदयः भवति। श्रृङ्गाररसात् हास्यः रौद्ररसात् करुणरसः वीररसात् अद्भुत रसः तथा बीभत्सरसात् भयानकरसस्य निष्पत्तिः भवति।

**सत्त्वादिगुणसंतानाज्जायन्ते परमात्मनः।**
**रागाद्भवति श्रृङ्गारो रौद्रस्तैक्ष्ण्यात्प्रजायते।।**
**वीरोऽवष्टम्भजः संकोचभूर्बीभत्स इष्यते।**
**श्रृङ्गाराज्जायते हासौ रौद्रात्तु करुणो रसः।**[3]

वीराच्चाद्भुतरसस्य निष्पत्तिः स्याद् बीभत्सातच्च भयानकरसः उत्पत्तिर्भवति। अग्निपुराणकारः श्रृङ्गारः हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः, अद्भुतः, शान्तः च एते नव रसाः मन्यते।

**श्रृङ्गार-हास्य-करुण-रौद्रवीर-भयानकाः**
**बीभत्साद्भुतशान्तारत्या स्वभावाच्चतुरो रसाः।**[4]

एवं खलु चत्वारः प्राकृतिकाः रसाः सन्ति। श्रृङ्गारः रौद्रः, वीरः बीभत्सश्च एते चत्वारः रसाः सहजा एवा।

अग्निपुराणकारः अतीव सुन्दररीत्या रसस्य महत्त्वं व्याख्याय कथयति -

**लक्ष्मीरिव विना त्यागान्न वाणी भाति नीरसा।**
**अपारे काव्य संसारे कविरेव प्रजापतिः।।**
**यथा वै रोचते विश्वं तथेदं परिवर्तते।**
**श्रृङ्गारी चेत्कविः काव्ये जातं रसमयं जगत्**
**स चेत्कविर्वीतरागो नीरसं व्यक्तमेव तत्।**[5]

अर्थात् यथा त्यागेन बिना धनस्य शोभा न भवति तथा रसरहिता वाक् न शोभते। अस्मिन् विशाले काव्यलोके कविः एव प्रजापतिः भवति। जगतः यत्किमपि रूपं तस्यकृते रुचिकरं दृश्यते तस्य काव्ये तस्मिन् रुपे जगत् परिणमति। यदि कविः श्रृङ्गारी अस्ति तर्हि जगत् श्रृङ्गारमयं रसमयं च भवति। यदि कविः नीरसः भवति तर्हि काव्यमपि अवश्यमेव नीरसं भवति।

रसं भावं सम्बन्धं च व्यञ्जयन् अग्निपुराणकारः कथयति-

**न भावहीनोऽस्ति रसोन भावो रसवर्जितः।**
**भावयन्ति रसानेभिर्भाव्यन्ते च रसा इति।**[6]

अर्थात् रसः भावहीनः नास्ति भावः अपि रसहीनः नास्ति। यतो हि एतेभ्यः भावेव्यः रसस्य भावना (अभिव्यक्तिः) भवति। 'भाष्यन्ते रसः एभिः' भाविताः भवन्ति रसाः अस्य अनया व्युत्पत्यानुसारेण एते रसाः, भाव एव। अग्निपुराणकारः रत्यादि अष्टौरिति स्थायीभावाः, स्तम्भादि अष्टौ सात्विकभावाश्च मन्यते। ये क्रमेण वर्णिता सन्ति।

**स्थायिनोऽष्टौ रतिमुखाः स्तम्भाद्या व्यभिचारिणः।**
**मनोनुकूलेऽनुभवः सुखस्य रतिरिष्यते।।**
**हर्षादिभिश्च मनसो विकासो हास उच्यते।**
**मनोवैक्लैव्यामिचन्ति शोकमिष्टक्षयादिभि।।**
**क्रोधस्तैक्ष्ण्यं प्रबोधश्च प्रतिकूलानिकारिणी।**
**पुरुषानुसमोऽव्यर्थो यः स उत्साह उच्यते।।**
**चित्रदिदर्शनाच्चेतो वैक्लव्यं ब्रुवते भयम्।**
**जुगुप्सा च पदार्थानां निन्दा दौर्भाग्य वाहिनाम्।।**
**विश्वमयोऽतिशयेनार्थ-दर्शनाच्चित्त-विस्मृतिः।**
**अष्टौ स्तम्भादयः सत्वाद्रजस्मसः परम्।।**
**तम्भश्चेष्टा प्रतीघातो भयरागाद्युपाहितः।**
**श्रम रागाद्युपेतान्तः क्षोभजन्म वपुर्जलम्।।**
**स्वेदो हर्षादिभिर्देहोच्छ्वासोऽन्तः पुलकोद्गमः।**
**हर्षादिजन्मवान्सङ्गः स्वरभेदो भयादिभिः।।**
**चित्तक्षोभ भवस्तम्भो वेपथुः परीकीर्तितः।**
**वैवर्ण्य च विवादिजन्मा कान्ति विपर्ययः।।**
**दुःखानन्दादिजं नेत्रजलमश्रु च विश्रुतम्।**
**इन्द्रियाणास्तमयः प्रलयोलङ्घनादिभिः।।**[7]

अर्थात् रत्यादिरिति अष्टौ स्थायीभावः भवन्ति। स्तम्भादिरिति अष्टौ सात्त्विकभावाश्च भवन्ति। सुखस्य मनोऽनुकूलआनन्दः 'रतिः' कथ्यते। हर्षादिभिः

चित्तस्य विकासः 'हासः' उच्यते। इष्टवस्तुनाशजां मानसिक-चिन्ता 'शोकम्' इति कथ्यते। आत्मविरुद्धे प्रतिकूलाचरणे सति यो व्यवहारः स 'क्रोध' इति कथ्यते। मानवीयप्रयत्ने अनुकूलः भावः 'उत्साह' इति कथ्यते। चित्रादिदर्शनेन यः मानसिक विकलता भवति सः 'भयम्' इति कथ्यते। दुर्भाग्यं जनयन्ती पदार्थानां निन्दा 'जुगुप्सा' इति उच्यते।

यदा किमपि वस्तुनः दर्शनेन चितं अत्यन्तं विस्मय-पूरितं भवति तर्हि तत् विस्मयं कथ्यते। स्तम्भादि अष्टौ सात्विकभावाः सन्ति ये ते रजोगुणतमोगुणात् पराः सन्ति। नयेन रागेण वा कर्मबाधः 'स्तम्भः' इति उच्चते। परिश्रम-रागात् हृदयस्य विकारात् उत्पन्नं जलं 'स्वेदः' इति कथ्यते। हर्षादि कारणात-देहोच्छवासः, देहे च पुलकस्य उद्भावः रोमाञ्चः इति कथ्यते। हर्षकारणात् च भयकारणात् वाक्-अस्पष्टता शब्दोच्चारण-अशक्तता च 'स्वरभेद' इति उच्चते। चितस्य क्षोभात् उत्पन्नं स्पन्दनं वेपथुः इति च कथ्यते। शोकादिकारणात् शरीरस्य कान्तिपरिवर्तनं 'वैवर्ण्यम्' इति कथ्यते। शोकेन आनन्देन वा उत्पन्नं नेत्रजलं 'अश्रु' इति च कथ्यते। उपवासादिना इन्द्रियाणां हानिः 'प्रलय' इति कथ्यते। अग्निपुराणकारः व्यभिचारिणां भावानां संख्या त्रयस्त्रिंशत् मन्यते तेषां व्यभिचारि-भावानां वर्णनं कुर्वन् कथयति अग्निपुराणकारः -

**वैराग्योदेर्मनंखेदो निर्वेद इति कथ्यते**
**मनः पीडादिजन्मा च सादो ग्लानिः शरीरगा।**
**शङ्काऽनिष्टागमोत्प्रेक्षा स्यादसूया च मत्सरः**
**मदिराद्युपयोगोत्थं मनः संमोहनं मदः।**
**क्रियातिशयजन्माऽन्तः शरीरोत्थक्लमः श्रमः**
**श्रृङ्गारदि क्रियाद्वेषाश्चिन्तस्याऽऽलस्यमुच्यते।**
**दैन्यं सत्त्वादपभ्रंशशातिन्तार्स्यपरिभावनम्**
**इति कर्तव्योतोपायादर्शनं मोह उच्यते।**
**स्मृतिः स्यादनुभूतस्य वस्तुनः प्रतिविम्बनम्**
**मतिरर्थपरिच्छेदस्तत्त्वोज्ञानोपनायितः।**
**व्रीडानुरागादिभवः संकोचः कोऽपि चेतसः**
**भवेच्चपलताऽस्थैर्यं हर्षचि (श्चि) त्प्रसन्नता।**

**आवेशश्च प्रतिकाराशया वैधुर्यमात्मनः**

**कत्तव्ये प्रतिभाभ्रंशो जड़तेत्यभिधीयते ।**

**इष्टप्राप्तेरूपाचितः संपदाभ्युदयो धृतिः**

**गर्वः परेष्ववज्ञानमात्ममन्युत्कर्ष भावना ।**

**भवेद्विषादो दैवार्देविघातोऽभीष्टवस्तुनि**

**औत्सुक्यमीप्सिताप्राप्तेर्वाञ्छया तरलास्थितिः ।**

**चित्तेद्रियाणां स्तौमित्यमपस्मारोऽनवस्थितिः**

**युद्दे व्याथादिभिस्त्रासौ वीप्सा चित्रचमत्कृतिः ।**

**कोधस्याप्रशमोऽमर्षः प्रबोधश्चेतनोदयः**

**अवहित्थं भवेद्गुप्तिरिङ्गताकारगोचरा ।**

**रोषतोगुरुवाग्दण्ड पारुष्यं विदुरुग्रताम्**

**उहो वितर्कः स्याद्व्याधिर्मनोवेपुरग्रहः ।**

**अनिबद्धबद्धप्रलापादिरुन्मादो मदनादिभिः**

**तत्त्वज्ञानादिना चेतःकषायोपरमः शमः ।**[8]

विभावस्य लक्षणं प्रकारं च व्याख्याय अग्निपुराणकारं कथयति-

**विभाव्यते हि रत्यादिर्यत्र येन विभाव्यते ।**[9]

अर्थात् रत्यादीनां स्थायिभावानां विभावः यस्य यस्य माध्यमेन भवति सः विभावः कथ्यते। एतत् आलम्बनं उद्दीपनं च भेदद्वयेन कथ्यते-

**विभावा नाम स द्वेधाऽऽलम्बनोद्दीपनात्मकः ।**[10]

आलम्बनस्य लक्षणं अग्निपुराणकारः कथयते-

**रत्यादिभाव वर्गोऽयं यमाजीव्दोपजायते ।**

**आलम्बनविभावोऽसौ नायकादिभवस्तथा ।**[11]

तस्याश्रयेण रत्यादिभावानां समूहः यः उत्पद्यते सः आलम्बनमिति विभावः। यः नायकादि सामर्थ्ये प्रादुर्भवति।

अग्निपुराणकास्य मतानुसारेण उद्दीपनविभावस्य लक्षणं -

**उद्दीपनविभावास्ते संस्कारैविर्विधैः स्थिता**

**आलम्बनविभावेषु भावानुद्दीपयन्ति ये ।**[12]

अर्थात् उद्दीपमितिभावः नाना संस्काररूपेण विद्यते। एते आलम्बन-विभावेषु भावम् उद्दीपयन्ति। अग्निपुराणकारः अनुभावस्य लक्षणं प्रस्तौति-

**आलम्बन विभावस्य भावैरुद्बुद्धसंस्कृतैः**
**मनोवाग्बुद्धिवपुषां स्मृतीच्छा-द्वेषयत्नतः।**
**आरम्भ एव विदुषामनुभाव इति स्मृतः**
**स चानुभूयते चात्र भवत्युत निरुच्यते।**[13]

आलम्बनस्य विभावस्य उद्बुदसंस्कारयुक्त-भावेन स्मृतीच्छाद्वेष-प्रयत्नसंयोगात् कृतस्य मनः-वाणी-बुद्धि-शरीरस्य च कार्यं विद्वज्जनै अनुभावः इति उच्यते। आलम्बने यत् अनुभूयमानः अस्ति वा आलम्बने यत् दर्शनस्य अनन्तरं प्रकटीभवति स एव अनुभाव इति इत्येवं प्रकारेण अनुभावशब्दो निष्पद्यते।

अग्निपुराणकारेण अष्टौ पुरुषकर्माणां द्वादश स्त्री कर्मणां च उल्लेखः कृतः अस्ति-

**शोभा विलासो माधुर्य स्थैर्य गाम्भीर्यमेव च**
**ललितं च तथोदार्य तेजोऽष्टाविति पौरुषाः।**[14]

अर्थात् शोभाः, विलासः, माधुर्यम्, स्थैर्यं, गाम्भीर्यं, ललितं, औदार्यं तथा तेजः एतानि अष्टौ पुरुषकर्माणि सन्ति।

तदनुरुपं च - भावो हारश्च हेला च शोभा-कान्तिस्तथैव च
**दीप्तिर्माधुर्यशौर्यश्च प्रागल्भ्यं स्यादुदारता।**
**स्थैर्य गम्भीरता स्त्रीणां विभावा द्वादशेरिताः।**[15]

अर्थात् भावः, हावः, हेला, शोभा, कान्तिः, दीप्तिः, माधुर्यं, शौर्यं, प्रगल्भता, उदारता, स्थिरता, गम्भीरता च स्त्रीणां द्वादश गुणाः उच्यन्ते।

अग्निपुराणकारस्य रसविश्लेषणं अतीव सरलं, स्वाभाविकं स्पष्टं च अस्ति। आधुनिक-साहित्यशास्त्रीयाणां कृते उज्ज्वलमार्गं प्रशस्तं करोति। इदं रसस्य सकलपक्षैः आनन्द-चमत्कार-इत्यादिभिः पूर्णतया संपृक्तमास्ति। 'लक्ष्मीरिव विना त्यागान्न वाणी भाति नीरसा' तथा 'श्रृङ्गारी चेत्कविः काव्ये जातं रसमयं जगत्'। अग्निपुराणकारस्य एताः पङ्क्तयः अग्निपुराणकारस्य रसतत्त्वस्य अद्वितीय-महत्तां उपजीव्यतां च साधयन्ति।

**सन्दर्भः -**

1. *तैत्तिरीय उपनिषद्- 3/7*
2. *अग्निपुराण, 339/1-2*
3. *अग्निपुराण, 339/6-8*
4. *अग्निपुराण, 339/8-9*
5. *अग्निपुराण - 9/11*
6. *अग्निपुराण - 9/12*
7. *अग्निपुराण- 339/13-21*
8. *अग्निपुराण- 339/22-34*
9. *अग्निपुराण- 339/35*
10. *अग्निपुराण- 339/36*
11. *अग्निपुराण- 339/36-37*
12. *अग्निपुराण- 339/42*
13. *अग्निपुराण- 339/44-45*
14. *अग्निपुराण- 339/49-50*
15. *अग्निपुराण- 339/49-5*

●●●

# लेखक - परिचयः

| | | |
|---|---|---|
| ***कपिलदेव हरेकृष्ण शास्त्री*** | - | *सहायक आचार्यः,<br>संस्कृतपाली, प्राकृतविभागः<br>महाराजा सयाजीराव<br>विश्वविद्यालयः बड़ोदरा गुजरात-390002* |
| ***हेमन्तशर्मा*** | - | *साहित्यप्राध्यापकः संस्कृतसाहित्यम्<br>शासकीय दू.श्री.वै. स्नातकोत्तर-<br>संस्कृतमहाविद्यालयः रायपुरम् (छ.ग.)* |
| ***एम.किशनः*** | - | *सहाकाचार्यः संस्कृतविभागः<br>दिल्ली विश्वविद्यालयः, नईदिल्ली-110007* |
| ***उमाशंकरः*** | - | *सहाचार्यः- संस्कृत-विभागः<br>दिल्ली विश्वविद्यालयः, नईदिल्ली-110007* |
| ***सुधाश्रीवास्तवः*** | - | *सहाकाचार्या<br>पाणिनिकन्यामहाविद्यालयः, वाराणसी* |
| ***प्रियव्रतमिश्रः*** | - | *सह-आचार्यः,<br>एसवीडीवी बी.एच.यू. संकायः, वाराणसी,* |
| ***शुभम् जैन*** | - | *संस्कृतप्राध्यापिका, जबलपुरम् म.प्र.* |
| ***शुभ्रजित सेनः*** | - | *सहायकप्राध्यापकः<br>गौडवङ्ग-विश्वविद्यालयः, मालदा* |
| ***अञ्जना शर्मा*** | - | *सह-आचार्या, संस्कृत-विभागः,<br>वनस्थलीविद्यापीठम्, राजस्थानम्* |
| ***आशुकुमारठाकुरः*** | - | *शोधच्छात्रः संस्कृतविभागः<br>दिल्लीविश्वविद्यालयः* |

***रञ्जनकुमार त्रिपाठी*** - *आचार्यः संस्कृतविभागः*
*दिल्लीविश्वविद्यालयः*

***बाबूलालः मीना*** - *संस्कृतविभागः, कलासंकायः*
*दिल्ली विश्वविद्यालय, दिल्ली-110007*

***आशासिंह रावत*** - *सहाचार्या- संस्कृत विभागः,*
*दिल्ली विश्वविद्यालय, दिल्ली*

***सदानन्दत्रिपाठी*** - *सहायक प्राध्यापकः*
*शासकीय संस्कृतमहाविद्यालयः*
*उज्जयिनी (म.प्र.) 456001*

***भास्वती रायः*** - *शोधच्छात्रा-संस्कृत विभागः,*
*कोचविहार पञ्चानन*
*वर्मा विश्वविद्यालयस्यः, पश्चिमबङ्गस्य।*

***सौम्यजित् सेनः*** - *सहायकाध्यापकः, संस्कृत-विभागः,*
*कोचविहारपञ्चानन*
*वर्मा विश्वविद्यालयस्य, पश्चिमबङ्गस्य।*

***सुकदेवः वाजपेयी*** - *विभागाध्यक्षः - संस्कृतविभागः*
*स्वामी-विवेकानंद-विश्वविद्यालय, सागर (म.प्र.)*

***किरण आर्या*** - *सहा. प्रा.- संस्कृत विभाग,*
*डॉ. हरीसिंह गौर विश्वविद्यालय सागरम् (म.प्र.)*

***माधवगोपालः*** - *साहित्यप्राध्यापकः संस्कृतविभागः*
*आत्मारामसनातनधर्ममहाविद्यालयः*
*(दिल्लीविश्वविद्यालयः) धौलाकुआँ,*
*नवदेहली -110021*

| | | |
|---|---|---|
| ***हेमलता रानी*** | - | *सहायकाचार्या-संस्कृतविभागः*<br>*मैत्रेयी-महाविद्यालयः, दिल्ली-विश्वविद्यालयः* |
| ***सौरभमिश्रः*** | - | *शोधच्छात्रः- संस्कृत विभाग*<br>*डॉ.हरीसिंहगौरविश्वविद्यालयः सागरम् (म.प्र.)* |
| ***गुलशनकुमारः*** | - | *शोधच्छात्रः,*<br>*डॉ.हरीसिंहगौरविश्वविद्यालयः सागरम् (म.प्र.)* |
| ***मिन्टुमण्डलः*** | - | *शोधच्छात्रः, संस्कृतविभागः*<br>*डॉक्टरहरीसिंहगौरविश्वविद्यालयः,*<br>*सागरम् (म.प्र.)* |
| ***आकाशः जैनः*** | - | *संगीतविषये शोधार्थी,*<br>*डॉक्टरहरीसिंहगौरविश्वविद्यालयः,*<br>*सागरम् (म.प्र.)* |
| ***दीपेन्द्रकिशोरार्यः*** | - | *सहाकाचार्यः संस्कृतविभागः*<br>*पटना विश्वविद्यालय* |
| ***सत्यव्रतपाण्डेयः*** | - | *सहायकप्राध्यापकः - वेद विभागः*<br>*महर्षिपाणिनि-संस्कृत*-वैदिक-विश्वविद्यालयः,<br>उज्जयिनी (म. प्र.) |
| ***प्रवीणकुमारः*** | - | *शोधार्थी - संस्कृतविभागः,*<br>*डॉक्टरहरीसिंहगौरविश्वविद्यालयः,*<br>*सागरम, म.प्र.* |


●●●


राष्ट्रिय सङ्गोष्ठी
भारतीय ज्ञान परम्परा में पुरुषार्थ चिन्तन
10 - 11 मार्च, 2025
संस्कृत विभाग परिवार
आपका स्वागत
वंदन...
अभिनंदन...

ISSN : 2229-5577
Peer Reviewed Journal

अवनेस्तीव्रपिपासा शान्ता परितापः परिशान्तः
आतपतप्तं मनः प्रशान्तं भूलोकोऽयं शान्तः।
कृष्णं जलदं वीक्ष्य नूतनं हरिदङ्कुरनिकुरम्बा
चिरवियोगिनी गोपी वसुधा प्रेम्णाऽभूत् सकदम्बा।

- पं. प्रेमनारायणद्विवेदी-विरचितम्

सागरिकासमितिः
संस्कृतविभागः
डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम्
मध्यप्रदेशः (भारतम्)